ACADEMY OF SANSKRIT RESEARCH
Accn. No. 2966
Date
Bill No
MELKOTE.

Vedanta Book House,
Near Uma Talkies, Chamarajapet,
[illegible] - 560018. Ph: 607580

ॐ

सामवेद-संहिता

LIBRARY

अनेकवैदिकानां साहाय्येन विविधप्राचीनलिखितपुस्तक-
पाठानुसारेण च संशोध्य

भट्टाचार्येण श्रीपादशर्मणा दामोदरभट्टसूनुना
सातवलेकरकुलजेन संपादिता।

स्वाध्याय-मण्डल, पारडी
जि. बलसाड

प्रकाशक :

वसंत श्रीपाद सातवळेकर, बी. ए.,
स्वाध्याय-मंडळ,
पोस्ट- 'स्वाध्याय-मंडळ (पारडी)'
पारडी [जि. बलसाड]

ACADEMY OF SANSKRIT RESEARCH
MELKOTE LIBRARY
Acc. No. 2966
Date

G 13-2

N.D.

मुद्रक :

वासुदेव भगनलाल परीख
प्रीमियर ऑफसेट वर्क्स,
२ टाटारोड, गिरगांव, मुंबई ४



सामवेद-संहिता

पूर्वार्चिकः (छन्द आर्चिकः)

आग्नेयं काण्डम् ।

अथ प्रथमोऽध्यायः ।

अथ प्रथमप्रपाठके प्रथमोऽर्धः ।

[१]

(१–१०) १–२, ४, ७, ९ भरद्वाजो बार्हस्पत्यः, ३ मेध्यातिथिः काण्वः, ५ दध्यङ्ङाथर्वणः, ६ सुदीतिपुरुमीढावाङ्गिरसौ तयोर्वान्यतरः, ८ वत्सः काण्वः, १० वामदेवः ॥ अग्निः ॥ गायत्री ॥

१ अग्न आ याहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥ १ ॥

२ त्वमग्ने यज्ञानाꣳ होता विश्वेषाꣳ हितः । देवेभिर्मानुषे जने ॥ २ ॥

३ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ॥ ३ ॥

४ अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥ ४ ॥

५ प्रेष्ठं वो अतिथिꣳस्तुषे मित्रमिव प्रियम् । अग्ने रथं न वेद्यम् ॥ ५ ॥

६ त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः । उत द्विषो मर्त्यस्य ॥ ६ ॥

७ पशू षु ग्रवाणि तेऽग्न इत्थेतरा गिरः । एभिर्वर्धास इन्दुभिः ॥ ७ ॥

८ आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् । अग्ने त्वां कामये गिरा ॥ ८ ॥

९ त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥ ९ ॥

१० अग्ने विवस्वदा भरास्मभ्यमूतये महे । देवो ह्यसि नो दृशे ॥ १० ॥

इति प्रथमा दशतिः ॥ १ ॥ प्रथमः खण्डः ॥ १ ॥ [स्वरिताः ९ । उ० ना० । ऋ० ३७ । वे ॥]

[२]

(१–१०) १ आयुरक्ष्याग्निः (ऋ० विरूप आङ्गिरसः); २ वामदेवो गौतमः; ३, ८–९ प्रयोगो भार्गवः; ४ मधुच्छन्दा वैश्वामित्रः; ५, ७ शुनःशेप आजीगर्तिः; ६ मेधातिथिः काण्वः; १० वत्सः काण्वः ॥ अग्निः ॥ गायत्री ॥

१२ ० १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
११ नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः । अमैरमित्रमर्दय ॥ १ ॥

३ १ २ ३ १ २ ३ १ २ ३ १ २
१२ दृतं वो विश्ववेदसꣳ हव्यवाहममर्त्यम् । यजिष्ठमृञ्जसे गिरा । ॥ २ ॥

३ १ ३ १ २ ३ १ २ ३ १ २ ३ १ २
१३ उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः । वायोरनीके अस्थिरन् ॥ ३ ॥

३ १ ३ १ २ ३ १ २ ३ १ २ ३ १ २
१४ उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ॥ ४ ॥

३ १ ३ १ २ ३ १ २ ३ १ २ ३ १ २
१५ जराबोध तद्विविड्ढि विशेविशे यज्ञियाय । स्तोमꣳरुद्राय दृशीकम् ॥ ५ ॥

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २
१६ प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे । मरुद्भिरग्न आ गहि ॥ ६ ॥

२ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
१७ अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः । सम्राजन्तमध्वराणाम् ॥ ७ ॥

३ १ २ ३ १ २ ३ १ २ ३ १ २
१८ और्वभृगुवच्छुचिमप्नवानवदा हुवे । अग्निꣳसमुद्रवाससम् ॥ ८ ॥

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
१९ अग्निमिन्धानो मनसा धियꣳसचेत मर्त्यः । अग्निमिन्धे विवस्वभिः ॥ ९ ॥

२ ३ ३ १ २ ३ १ २ ३ १ २ ३ १ २
२० आदित्पक्षस्य रेतसो ज्योतिः पश्यन्ति वासरम् । परो यदिध्यते दिवि ॥ १० ॥

इति द्वितीया दशतिः ॥ २ ॥ द्वितीयः खण्डः ॥ २ ॥ [स्व० ६ । उ० २ । धा० ५२ । ऋ ॥]

[३]

(१–१४) १ प्रयोगो भार्गवः; २, ५ भरद्वाजो बार्हस्पत्यः; ३, १० वामदेवो गौतमः; ४, ६ वसिष्ठो मैत्रावरुणिः; ७ विरूप आङ्गिरसः; ८ शुनःशेप आजीगर्तिः; ९ गोपवन आत्रेयः; ११ प्रस्कण्वः काण्वः; १२ मेधातिथिः काण्वः; १३ सिन्धुद्वीप आम्बरीषः, त्रित आप्त्यो वा; १४ उशना काव्यः ॥ अग्निः ॥ गायत्री ॥

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
२१ अग्निं वो वृधन्तमध्वराणां पुरूतमम् । अच्छा नप्त्रे सहस्वते ॥ १ ॥

३ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
२२ अग्निस्तिग्मेन शोचिषा यꣳसद्विश्वं न्यꣳत्रिणम् । अग्निर्नो वꣳसते रयिम् ॥ २ ॥

१ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
२३ अग्ने मृड महाꣳ अस्यय आ देवयुं जनम् । इयेथ बर्हिरासदम् ॥ ३ ॥

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
२४ अग्ने रक्षा णो अꣳहसः प्रति स्म देव रीषतः । तपिष्ठैरजरो दह ॥ ४ ॥

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
२५ अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्त्याशवः ॥ ५ ॥

१ २ ३ १ २ ३ १ २ ३ १ २
२६ नि त्वा नक्ष्य विक्षपते द्युमन्त धीमहे वयम् । सुवीरमग्न आहुत ॥ ६ ॥

३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
२७ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति ॥ ७ ॥

३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
२८ इममू षु त्वमस्माकꣳ सनिं गायत्रं नव्यꣳसम् । अग्ने देवेषु प्र वोचः ॥ ८ ॥

१ २ ३ १ २ ३ १ २ ३ १ २
२९ तं त्वा गोपवनो गिरा जनिष्टदग्ने अङ्गिरः । सं पावक श्रुधी हवम् ॥ ९ ॥

३० परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥ १० ॥
३१ उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥ ११ ॥
३२ कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे । देवममीवचातनम् ॥ १२ ॥
३३ शं नो देवीरभिष्टये शं नो भवन्तु पीतये । शं योरभि स्रवन्तु नः ॥ १३ ॥
३४ कस्य नूनं परीणसि धियो जिन्वसि सत्पते । गोपाता यस्य ते गिरः ॥ १४ ॥

इति तृतीया दशतिः ॥३॥ तृतीयः खण्डः ॥३॥ [स्व० ९ । ऊ० २ । ऋ० ५७ । ये ॥]

[४]

(१-१०) १,३,७ शंयुर्बार्हस्पत्यः (७ तृणपाणिः); २,५,८-९ भर्गः प्रागाथः; ४ वसिष्ठो मैत्रावरुणिः; ६ प्रस्कण्वः काण्वः; १० सोभरिः काण्वः ॥ अग्निः ॥ बृहती ॥

३५ यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे । प्रप्र वयममृतं जातवेदसे प्रियं मित्रं न शंसिषम् ॥१॥
३६ पाहि नो अग्न एकया पाहूत द्वितीयया । पाहि गीर्भिस्तिसृभिरूर्जा पते पाहि चतसृभिर्वसो ॥२॥
३७ बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा । भरद्वाजे समिधानो यविष्ठ्य रेवत्पावक दीदिहि ॥३॥
३८ त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः । यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् ॥४॥
३९ अग्ने जरितर्वितपतिस्तपानो देव रक्षसः । अप्रोषिवान् गृहपते महाँ असि दिवस्पायुर्दुरोणयुः ॥५॥
४० अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य । आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः ॥६॥
४१ त्वं नश्चित्र ऊत्या वसो राधांसि चोदय । अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥७॥
४२ त्वमित्सप्रथा अस्यग्ने ज्रातश्रुतः कविः । त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥८॥
४३ आ नो अग्ने वयोवृधं रयिं पावक शंस्यम् । रास्वा च न उपमाते पुरुस्पृहं सुनीती सुयशस्तरम् ॥९॥
४४ यो विश्वा दयते वसु होता मन्द्रो जनानाम् । मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये ॥१०॥

इति चतुर्थी दशतिः ॥४॥ चतुर्थः खण्डः ॥४॥ [स्व० ९ । ऊ० ३ । ऋ० ८३ । दी ॥]

[५]

(१-१०) १ वसिष्ठो मैत्रावरुणिः; २ भर्गः प्रागाथः; ३, ७ सौभरिः काण्वः; ४ मनुर्वैवस्वतः; ५ सुदीतिपुरुमीळावांगिरसौ; ६ प्रस्कण्वः काण्वः; ८ मेधातिर्मेध्यातिथी काण्वौ; ९ विश्वामित्रो गाथिनः; १० कण्वो घौरः ॥ अग्निः, ८ इन्द्रः ॥ बृहती ॥

४५ एना वो अग्निं नमसोर्जो नपातमा हुवे । प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥१॥
४६ शेषे वनेषु मातृषु सं त्वा मर्तास इन्धते । अनन्द्रो हव्यं वहसि हविष्कृत आदिदेवेषु राजसि ॥२॥
४७ अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः । उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः ॥३॥

*

४८ अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे । ऋचा यामि मरुतो ब्रह्मणस्पते देवा अवो वरेण्यम् ॥४॥

४९ अग्निमीडिष्वावसे गाथाभिः शीरशोचिषम् । अग्निꣳ राये पुरुमीढ श्रुतं नरोऽग्निः सुदीतये छर्दिः ॥५॥

५० श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः । आ सीदनु बर्हिषि मित्रो अर्यमा प्रातर्यावभिरध्वरे ॥६॥

५१ प्र देवोदासो अग्निर्देव इन्द्रो न मज्मना । अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि ॥७॥

५२ अध ज्मो अध वा दिवो बृहतो रोचनादधि । अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥८॥

५३ कायमानो वना त्वं यन्मातॄरजगन्नपः । न तत्ते अग्ने प्रमृषे निवर्तनं यद् दूरे सन्निहाभुवः ॥९॥

५४ नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते । दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥१०॥

इति पञ्चमी दशतिः ॥५॥ पञ्चमः खण्डः ॥५॥ [स्व० उ०६ । धा० ७१ । षा ॥]

इति प्रथमप्रपाठके प्रथमोऽर्धः ॥ १ ॥

[६]

(१–८) १, ७ वसिष्ठो मैत्रावरुणिः; २,३,५ कण्वो घौरः; ४ सौभरिः काण्वः; ६ उत्कीलः कात्यः; ८ विश्वामित्रो गाथिनः ॥ अग्निः, २ ब्रह्मणस्पतिः; ३ यूपः ॥ बृहती ॥

अथ प्रथमप्रपाठकस्य द्वितीयोऽर्धः ॥ १ ॥

५५ देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम् । उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देष ओहते ॥१॥

५६ प्रेतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥२॥

५७ ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता । ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥३॥

५८ प्र यो राये निनीषति मर्तो यस्ते वसो दाशत् । स वीरं धत्ते अग्न उक्थशꣳसिनं त्मना सहस्रपोषिणम् ४

५९ प्र वो यह्वं पुरूणां विशां देवयतीनाम् । अग्निꣳसूक्तेभिर्वचोभिरीमहे यꣳसमिदन्य इन्धते ॥५॥

६० अयमग्निः सुवीर्यस्येशे हि सौभगस्य । राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥६॥

६१ त्वमग्ने गृहपतिस्त्वꣳ होता नो अध्वरे । त्वं पोता विश्ववार प्रचेता यक्षि च वायम् ॥७॥

६२ सम्वायस्व वावृमहे देवं मर्तास ऊतये । अपां नपातꣳ सुभगꣳ सुदꣳससꣳ सुप्रनूर्तिमनेहसम् ॥८॥

इति षष्ठी दशतिः ॥ ६ ॥ षष्ठः खण्डः ॥ ६ ॥ [स्व० ११ । उ० २ । धा० ५७ । ख ॥]

[७]

(१–१०) १ इध्मवाहो वामदेवो वा; २ उपस्तुतो वार्हिष्टव्यः; ३ बृहदुक्थो वामदेव्यः; ४ कुत्स आङ्गिरसः; ५-९ भरद्वाजो बार्हस्पत्यः; ७ वामदेवो गौतमः; ८, १० वसिष्ठो मैत्रावरुणिः; ९ शिशिरास्त्वाष्ट्रः ॥ १,३,५,९ त्रिष्टुप्; २,४ जगती; १० त्रिपाद्विराड्गायत्री ॥

६३ आ जुहोता हविषा मर्जयध्वं नि होतारं गृहपतिं दधिध्वम् ।
इडस्पदे नमसा रातहव्यꣳ सपर्यता यजतं पस्त्यानाम् ॥ १ ॥

६४ चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातराव्नेति धातवे ।
अनूधा यदजीजनदधा चिदा ववक्षत्सद्यो महि दूत्यं३ चरन् ॥ २ ॥

६५ इदं त एकं पर उ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशनस्तन्वे३चारुरेधि प्रियो देवानां परमे जनित्रे ॥ ३ ॥

६६ इमꣳ स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य सꣳसद्यग्ने सख्ये मा रिषामा वयं तव ॥ ४ ॥

६७ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविꣳ सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः ॥ ५ ॥

६८ वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरग्ने जनयन्त देवाः ।
तं त्वा गिरः सुष्टुतयो वाजयन्त्याजिं न गिर्वाहो जिग्युरश्वाः ॥ ६ ॥

६९ आ यो राजानमध्वरस्य रुद्रꣳ होतारꣳ सत्ययजꣳ रोदस्योः ।
अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥ ७ ॥

७० इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन ।
नरो ह्व्येभिरीडते सबाध आग्निरग्रमुषसामशोचि ॥ ८ ॥

७१ प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति ।
दिवश्चिदन्तादुपमामुदानडपामुपस्थे महिषो ववर्ध ॥ ९ ॥

७२ अग्निं नरो दीधितिभिररण्योर्हस्तच्युतं जनयत प्रशस्तम् । दूरेदृशं गृहपतिमथव्युम् ॥ १० ॥

इति सप्तमी दशतिः ॥ ७ ॥ सप्तमः खण्डः ॥ ७ ॥ [स्व० १५। उ० ८। ऋ० १०४। बी ॥]

[८]

(१-८) १ बुधगविष्ठिराबार्षौ; २, ५ वत्सप्रिभालन्दनः; ३ भरद्वाजो बार्हस्पत्यः; ४, ७ विश्वामित्रो गाथिनः; ६ वसिष्ठो मैत्रावरुणिः; ८ पायुर्भारद्वाजः ॥ आग्नेः, ३ पूषा ॥ त्रिष्टुप् ॥

७३ अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सस्रते नाकमच्छ ॥ १ ॥

७४ प्र भूर्जयन्त महां विपोधां मूरेरमूरं पुरां दर्माणम् ।
नयन्तं गीर्भिर्वना शिर्यं धा हरिश्मश्रुं न वर्मणा धनर्चिम् ॥ २ ॥

७५ शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावन्भद्रा ते पूषन्निह रातिरस्तु ॥ ३ ॥

७६ इडामग्ने पुरुदꣳसꣳ सनिं गोः शश्वत्तमꣳ हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ४ ॥

७७ प्र होता जातो महान्नभोविन्नृषद्मा सीददपां वितते ।
दधद्यो धायी सुते वयाꣳसि यन्ता वसूनि विधते तनूपाः ॥ ५ ॥

७८ प्र सम्राजमसुरस्य प्रशस्तं पुꣳसः कृष्टीनामनुमाद्यस्य ।
इन्द्रस्येव प्र तवसस्कृतानि वन्दद्वारा वन्दमाना विवष्टु ॥ ६ ॥

७९ अरण्योर्निहितो जातवेदा गर्भ इवेत्सुभृतो गर्भिणीभिः ।
दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥ ७ ॥

८० सनादग्ने मृणसि यातुधानान्न त्वा रक्षाꣳसि पृतनासु जिग्युः ।
अनु दह सहमूरान्कयादो मा ते हेत्या मुक्षत दैव्यायाः ॥ ८ ॥

इति अष्टमी दशतिः ॥८॥ अष्टमः खण्डः ॥८॥ [स्व० १३ । उ० १ । धा० ६ । द्वौ ॥]

[९]

(१-१०) १ गय आत्रेयः; २ वामदेवः; ३, ७ भरद्वाजो बार्हस्पत्यः; ५ द्वितो मृकण्डाहा आत्रेयः; ६ वसूयव आत्रेयाः; ७,९ गोपवन आत्रेयः; ८ पुरुमीळ्हः; १० वामदेवः, कश्यपो वा मारीचो, मनुर्वा वैवस्वत, उभौ वा ॥ अग्निः ॥ अनुष्टुप् ॥

८१ अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो । प्र नो राये पनीयसे रत्सि वाजाय पन्थाम् ॥ १ ॥

८२ यदि धीरो अनु ष्यादग्निमिन्धीत मर्त्यः । आजुह्वद्ध्व्यमानुषक् शर्म भक्षीत दैव्यम् ॥ २ ॥

८३ त्वेषस्ते धूम ऋण्वति दिवि सं च्छुक्र आततः । सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥ ३ ॥

८४ त्वꣳहि ज्ञेनवद्यशोऽग्ने मित्रो न पत्यसे । त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥ ४ ॥

८५ प्रातरग्निः पुरुप्रियो विश स्तवेतातिथिः । विश्वे यस्मिन्नमर्त्ये हव्यं मर्तास इन्धते ॥ ५ ॥

८६ यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो । महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ ६ ॥

८७ विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् । अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ ७ ॥

८८ बृहद्वयो हि भानवेऽर्चा देवायाग्नये । यं मित्रं न प्रशस्तये मनासो दधिरे पुरः ॥ ८ ॥

८९ अगस्म बृहन्तमं ज्येष्ठमग्निमानवम् । य स्म श्रुतर्वाऽरथ्ये बृहदनीक ईध्यते ॥ ९ ॥

९.० जातः परेण धर्मणा यत्सद्यवृद्धिः सहाभुवः । पिता यत्कश्यपस्यात्रिः भ्रद्धा माता मनुः कविः ॥ १० ॥

इति नवमी दशतिः ॥ ९ ॥ नवमः खण्डः ॥ ९ ॥ [स्व० १४ । उ० ७ । ऋ० ५१ ऋ ॥]

[१०]

(१-६) १ अग्निस्तापसः, २, ३ वामदेवः कश्यपः, असितो देवलो वा, ४ सोमाहुतिर्भार्गवः, ५ पायुर्भारद्वाजः, ६ प्रस्कण्वः काण्वः ॥ अग्निः, १ विश्वेदेवाः; २ अङ्गिराः ॥ अनुष्टुप् ॥

९.१ सोमꣳ राजानं वरुणमग्निमन्वारभामहे । आदित्यं विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिम् ॥ १ ॥

९.२ इत एत उदारुहन्दिवः पृष्ठान्या रुहन् । प्र भूर्जयो यथा पथोद्यामङ्गिरसो ययुः ॥ २ ॥

९.३ राये अग्ने महे त्वा दानाय समिधीमहि । ईडिष्वा हि महे वृषं द्यावा होत्राय पृथिवी ॥ ३ ॥

९.४ दधन्वे वा यदीमनु वोचद्ब्रह्मेति वेरु तत् । परि विश्वानि काव्या नेमिश्चक्रमिवाभुवत् ॥ ४ ॥

९.५ प्रत्यग्ने हरसा हरः शृणाहि विश्वतस्परि । यातुधानस्य रक्षसो बलं न्युग्जवीर्यम् ॥ ५ ॥

९.६ त्वमग्ने वसूꣳरिह रुद्रꣳ आदित्यꣳ उत । यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥ ६ ॥

इति दशमी दशतिः ॥ १० ॥ दशमः खण्डः ॥ १० ॥ [स्व० ४ । उ० ३ । ऋ० २० । दो ।]

॥ इति प्रथमप्रपाठके द्वितीयोऽर्धः प्रथमः प्रपाठकश्च समाप्तः ॥ १ ॥

अथ द्वितीयप्रपाठके प्रथमोऽर्धः ॥

[१]

(१-१०) दीर्घतमा औचथ्यः २, ४ विश्वामित्रो गाथिनः, ३ गोतमो राहूगणः; ५ ब्रित आप्त्यः; ६ हरिश्चिद्रिठिः काण्वः; ७,८,१० विश्वमना वैयश्वः; ९ ऋजिश्वा भारद्वाजः ॥ अग्निः; ५ पवमानः सोमः; ६ अदितिः; ९ विश्वे देवाः ॥ उष्णिक् ॥

९.७ पुरु त्वा दाशिवाꣳवोचेऽरिरग्ने तव स्विदा । तोदस्येव शरण आ महस्य ॥ १ ॥

९.८ प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत् । विपां ज्योतीꣳषि बिभ्रते न वेधसे ॥ २ ॥

९.९ अग्ने वाजस्य गोमत ईशानः सहसो यहो । अस्मे देहि जातवेदो महि श्रवः ॥ ३ ॥

१०.० अग्ने यजिष्ठो अध्वरे देवां देवयते यज । होता मन्द्रो वि राजस्यति स्रिधः ॥ ४ ॥

१०.१ जज्ञानः सप्त मातृभिर्मेधामाशासत श्रिये । अयं धुवो रयीणां चिकेतदा ॥ ५ ॥

१०.२ उत स्या नो दिवा मतिरदितिरूत्यागमत् । सा शन्ताता मयस्करदप स्रिधः ॥ ६ ॥

१०.३ ईडिष्वा हि प्रतीव्याऽ यजस्व जातवेदसम् । चरिष्णुधूममगृभीतशोचिषम् ॥ ७ ॥

१०.४ न तस्य मायया च न रिपुरीशीत मर्त्यः । यो अग्नये ददाश हव्यदातये ॥ ८ ॥

१०.५ अप त्यं वृजिनꣳरिपुꣳस्तेनमग्ने दुराध्यम् । दविष्ठमस्य सत्पते कृधी सुगम ॥ ९ ॥

१०६ श्रुष्टयग्ने नवेस्य मे स्तोमस्य वीर विश्पते । नि मायिनस्तपसा रक्षसो दह ॥ १० ॥

इति प्रथमा दशतिः ॥ १ ॥ एकादशः खण्डः ॥ ११ ॥ [स्व० ९ । उ० ३ । आ० ४१ ॥ दा ॥]

[२]

(१-८) १ प्रयोगो भार्गवः (ऋ० सौभरिः काण्वः); २, ३, ५–७ सौभरिः काण्वः; ४ प्रयोगो भार्गवः सौभरिः काण्वो वा; ८ विश्वमना वैयश्वः ॥ अग्निः ॥ उष्णिक्

१०७ प्र मंहिष्ठाय गायत ऋताग्ने बृहते शुक्रशोचिषे । उपस्तुतासो अग्नये ॥ १ ॥

१०८ प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः । यस्य त्वꣳसख्यमाविथ ॥ २ ॥

१०९ तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे । देवत्रा हव्यमूहिषे ॥ ३ ॥

११० मा नो हृणीथा अतिथिं वसुरग्निः पुरुप्रशस्त एषः । यः सुहोता स्वध्वरः । ॥ ४ ॥

१११ भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः । भद्रा उत प्रशस्तयः ॥ ५ ॥

११२ यजिष्ठं त्वा ववृमहे देव देवत्रा होतारममर्त्यम् । अस्य यज्ञस्य सुक्रतुम् ॥ ६ ॥

११३ तदग्ने द्युम्नमा भर यत्सासाहा सदने कं चिदत्रिणम् । मन्युं जनस्य दूढ्यम् ॥ ७ ॥

११४ यज्ञा उ विश्पतिः शितः सुप्रीतो मनुषो विशे । विश्वेदग्निः प्रति रक्षाꣳसि सेधति ॥ ८ ॥

इति द्वितीया दशतिः ॥ २ ॥ द्वादशः खण्डः ॥ १२ ॥ [स्व० १२ । उ० २ । आ० ४४ । छी ॥]

इत्याग्नेयं पर्व काण्डम् वा ॥ इति प्रथमोऽध्यायः ॥ इति प्रथमं पर्व ॥

आग्नेयकाण्डस्य मन्त्रसंख्या ११४

गायत्र्यः	३४	(१-३४)
बृहत्यः	२८	(३५-६२)
त्रिष्टुभः	१८	(६३-८०)
अनुष्टुभः	१६	(८१-९६)
उष्णिहः	१८	(९७-११४)
	११४	

अथ ऐन्द्रं काण्डम्।

अथ द्वितीयोऽध्यायः।

[३]

(१-१०) १ शंयुर्बार्हस्पत्यः; २ श्रुतकक्षः सुकक्षो वा आंगिरसः; ३ हर्यतः प्रागाथः; ४,५ श्रुतकक्षः (ऋ० सुकक्षो वा, ५ सुकक्षः) आंगिरसः; ६ देवजामय इन्द्रमातरः ऋषिकाः; ७,८ गोपूक्त्यश्वसूक्तिनौ काण्वायनौ; ९,१० मेधातिथिः काण्वः प्रियमेधश्चांगिरसः ॥ इन्द्रः (ऋ० ३ अग्निर्हवींषि वा) ॥ गायत्री ॥

११५ तद्वो गाय सुते सचा पुरुहूताय सत्वने। शं यद्गवे न शाकिने ॥ १ ॥

११६ यस्ते नूनꣳशतक्रतविन्द्र द्युम्नितमो मदः। तेन नूनं मदे मदेः ॥ २ ॥

११७ गाव उप वदावटे महो यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया ॥ ३ ॥

११८ अरमश्वाय गायत श्रुतकक्षाꣳ गवे। अरमिन्द्रस्य धाम्ने ॥ ४ ॥

११९ तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे। स वृषा वृषभो भुवत् ॥ ५ ॥

१२० त्वमिन्द्र बलादधि सहसो जात ओजसः। त्वꣳसन्वृषन्वृषेदसि ॥ ६ ॥

१२१ यश्च इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत्। चक्राण ओपशं दिवि ॥ ७ ॥

१२२ यदिन्द्राहं यथा त्वमीशीय वस्व एक इत्। स्तोता मे गोसखा स्यात् ॥ ८ ॥

१२३ पन्यंपन्यमित्सोतार आ धावत मद्याय। सोमं वीराय शूराय ॥ ९ ॥

१२४ इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम्। अनाभयिꣳरिमा ते ॥ १० ॥

इति तृतीया दशतिः ॥ ३ ॥ प्रथमः खण्डः ॥ १ ॥ [स्व० १०। उ० ४। धा० ४६। मू ॥]

[४]

(१-१०) १, २ सुकक्षश्रुतकक्षौ (ऋ० सुकक्ष आंगिरसः); ३ भारद्वाजः (ऋ० शंयुर्बार्हस्पत्यः); ४ श्रुतकक्षः (ऋ० सुकक्षो वा आंगिरसः)। ५, ६ मधुच्छन्दा वैश्वामित्रः, ७, ९, १० त्रिशोकः काण्वः; ८ वसिष्ठोः मैत्रावरुणिः ॥ इन्द्रः (९ ऋ० अग्नीन्द्रौ) ॥ गायत्री ॥

१२५ उद्वेदभि श्रुतामघं वृषभं नर्यापसम्। अस्तारमेषि सूर्य ॥ १ ॥

१२६ यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य। सर्वं तदिन्द्र ते वशे ॥ २ ॥

१२७ य आनयत्परावतः सुनीती तुर्वशं यदुम्। इन्द्रः स नो युवा सखा ॥ ३ ॥

१२८ मा न इन्द्राभ्याꣳ दिशः सूरो अक्तुष्वा यमत्। त्वा युजा वनेम तत् ॥ ४ ॥

१२९ एन्द्र सानसिꣳरयिꣳसजित्वानꣳसदासहम्। वर्षिष्ठमूतये भर ॥ ५ ॥

१३० इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे । युजं वृत्रेषु वज्रिणम् ॥ ६ ॥
१३१ अपिबत्कद्रुवः सुतमिन्द्रः सहस्रबाह्वे । तत्रादिदिष्ट पौंस्यम् ॥ ७ ॥
१३२ नयमिन्द्र त्वायवोऽभि प्र नोनुमो वृषन् । विद्धी त्वा ३ स्य नो वसो ॥ ८ ॥
१३३ आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा ॥ ९ ॥
१३४ भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः । वसु स्पार्हं तदा भर ॥ १० ॥

इति चतुर्थी दशतिः ॥ ४ ॥ द्वितीयः खण्डः ॥ २ ॥ [स्व० ८ । उ० ३ । धा० ३२ । डा ॥]

[५]

(१–१०) १ कण्वो घौरः; २ त्रिशोकः काण्वः; ३ वत्सः काण्वः; ४ कुसीदी काण्वः; ५ मेधातिथिः काण्वः; ६ श्रुतकक्षः (ऋ० सुकक्षः) आंगिरसः ७ इयावाश्व आत्रेयः; ८ प्रगाथः काण्वः; ९ वत्सः काण्वः; १० हरिंबिठिः काण्वः ॥ इन्द्रः (ऋ० १ मरुतः; ४ विश्वे देवाः; ५ ब्रह्मणस्पतिः; ७ सविता)॥ गायत्री ॥

१३५ इहेव शृण्व एषां कशा हस्तेषु यद्वदान् । नि यामं चित्रमृञ्जते ॥ १ ॥
१३६ इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः । पुष्टावन्तो यथा पशुम् ॥ २ ॥
१३७ समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः । समुद्रायेव सिन्धवः ॥ ३ ॥
१३८ देवानामिदवो महत्तदा वृणीमहे वयम् । वृणामस्मभ्यमूतये ॥ ४ ॥
१३९ सोमानांस्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः ॥ ५ ॥
१४० बोधन्मना इदस्तु नो वृत्रहा मूर्यासुतिः । शृणोतु शक्र आशिषम् ॥ ६ ॥
१४१ अद्या नो देव सवितः प्रजावत्सावीः सौभगम् । परा दुःष्वप्न्यंसुव ॥ ७ ॥
१४२ क्वꣳस्य वृषभो युवा तुविग्रीवो अनानतः । ब्रह्मा कस्तꣳसपर्यति ॥ ८ ॥
१४३ उपह्वरे गिरीणांसङ्गमे च नदीनाम् । धिया विप्रो अजायत ॥ ९ ॥
१४४ प्र सम्राजं चर्षणीनामिन्द्रꣳस्तोता नव्यं गीर्भिः । नरं नृषाहं मꣳहिष्ठम् ॥ १० ॥

इति पञ्चमी दशतिः ॥५॥ तृतीयः खण्डः ॥३॥ [स्व० ९ । उ० ना । धा० ४४ । ली ।]
॥ इति द्वितीयप्रपाठके प्रथमोऽर्धः ॥१॥

[६]

(१–१०) १ श्रुतकक्षः (ऋ० सुकक्षः) आङ्गिरसः; २ मेधातिथिः (ऋ० शंयुर्बार्हस्पत्यः) काण्वः; ३ गोतमो राहूगणः; ४ भरद्वाजो बार्हस्पत्यः; ५ बिन्दुः पूतदक्षो वा आङ्गिरसः; ६,७ श्रुतकक्षः सुकक्षो वा (ऋ० सुकक्षः) आङ्गिरसः; ८ वत्सः काण्वः; ९ शुनःशेप आजीगर्तिः; १० शुनःशेपो आजीगर्तिः; वामदेवो वा ॥ इन्द्रः, (४ ऋ० इन्द्रापूषणौ) ५ मरुतः ॥ गायत्री ॥

१४५ अपादु शिप्रयन्धसः सुदक्षस्य प्रहोषिणः । इन्दोरिन्द्रो यवाशिरः ॥ १ ॥

१४६ इमा उ त्वा पुरुवसोऽभि प्र नोनुनुवुर्गिरः। गावो वत्सं न धेनवः ॥ २ ॥

१४७ अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम्। इत्था चन्द्रमसो गृहे ॥ ३ ॥

१४८ यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः। तत्र पृषाभवत्सचा ॥ ४ ॥

१४९ गर्धयति मरुतश्चवस्युर्माता मघोनाम्। युक्ता वही रथानाम् ॥ ५ ॥

१५० उप नो हरिभिः सुतं याहि मदानां पते। उप नो हरिभिः सुतम् ॥ ६ ॥

१५१ इष्टा होत्रा असृक्षतेन्द्रं वृधन्तो अध्वरे। अच्छावभृथमोजसा ॥ ७ ॥

१५२ अहमिद्धि पितुष्परि मेधामृतस्य जग्रह। अहं सूर्य इवाजनि ॥ ८ ॥

१५३ रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः। क्षुमन्तो याभिर्मदेम ॥ ९ ॥

१५४ सोमः पूषा च चेततुर्विश्वासांसुक्षितीनाम्। देवत्रा रथ्योहिता ॥ १० ॥

इति षष्ठी दशतिः ॥६॥ चतुर्थः खण्डः ॥४॥ [स्व० ८। ऊ० ५। ऋ० ४४। ऋो ७]

[७]

(१-१०) १, ४ श्रुतकक्षः सुकक्षो वा आङ्गिरसः; २ वसिष्ठो मैत्रावरुणिः; ३ मेधातिथिः काण्वः; प्रियमेधश्चांगिरसः; ५ हरिम्बिठिः काण्वः; ६, १० मधुच्छन्दा वैश्वामित्रः; ७ त्रिशोकः काण्वः; ८ कुसीदी काण्वः; ९ शुनःशेप आजीगर्तिः ॥ इन्द्रः ॥ गायत्री ।

१५५ पान्तमा वो अन्धस इन्द्रमभि प्र गायत। विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥१॥

१५६ प्र व इन्द्राय मादनं हर्यश्वाय गायत। सखायः सोमपाव्ने ॥ २ ॥

१५७ वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः। कण्वा उक्थेभिर्जरन्ते ॥ ३ ॥

१५८ इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः। अर्कमर्चन्तु कारवः ॥ ४ ॥

१५९ अयं त इन्द्र सोमो निपूतो अधि बर्हिषि। एहीमस्य द्रवा पिब ॥ ५ ॥

१६० सुरूपकृत्नुमूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि ॥ ६ ॥

१६१ अभि त्वा वृषभा सुते सुतं सृजामि पीतये। तृम्पा व्यश्नुही मदम् ॥ ७ ॥

१६२ य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः। पिबेदस्य त्वमीशिषे ॥ ८ ॥

१६३ योगेयोगे तवस्तरं वाजेवाजे हवामहे। सखाय इन्द्रमूतये ॥ ९ ॥

१६४ आ त्वेता नि षीदतेन्द्रमभि प्र गायत। सखायः स्तोमवाहसः ॥ १० ॥

इति सप्तमी दशतिः ॥ ७ ॥ पञ्चमः खण्डः ॥ ५ ॥ [स्व० ५। ऊ० २। ऋा० ३९। फो ॥]

*

[८]

(१–१) १ विश्वामित्रो गाथिनः; २ मधुच्छन्दा वैश्वामित्रः; ३ कुसीदी काण्वः; ४ प्रियमेध आंगिरसः ५ ६ वामदेवो गौतमः; ७ पुरुकक्षः पुरुकक्षो वा आंगिरसः; (९ ऋ पुरुकक्ष आंगिरसः); ८ मेधातिथिः काण्वः; १ विम्बुः पूतदक्षो वा आंगिरसः ॥ इन्द्र ऋ ७ सदसस्पतिः, १ मरुतः) ॥ गायत्री ॥

१६१ इन्द्रा॑ह्येोजसा सुत॑राधानां पते । पित्रा त्वा॒ऽस्य गिर्वणः ॥ १ ॥

१६२ महा॑न्इन्द्रः पुरश्च नो महित्वमस्तु वज्रिणे । द्यौर्न प्रथिना शवः ॥ २ ॥

१६३ आ तू न इन्द्र क्षुमन्त चित्रं ग्रामं॑स गव्यम् । मह्याहस्ती दक्षिणेन ॥ ३ ॥

१६४ आभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे । सूनुं॑सत्यस्य सत्पतिम् ॥ ४ ॥

१६५ कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ ५ ॥

१६६ त्यमु ष सधस्था॒ग्निं यज्ञेषु पीळ्यम् । आ याचयस्यूतये ॥ ६ ॥

१६७ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषम् ॥ ७ ॥

१६८ यो र॒ पन्था अधो दिवो येभिर्व्यश्वमैरय । उत श्रोषन्न नो गुवः ॥ ८ ॥

१६९ भद्रं॑भद्र न आ भरेषमूर्जं॑शतक्रतो । यद्विद्म सृडयासि नः ॥ ९ ॥

१७० मस्ति सोमो अयं॑सुतः पिबन्त्यस्य मरुतः । उत स्वराजो अश्विना ॥ १० ॥

इति नवमी दशतिः ॥ ८ ॥ षष्ठ खण्डः ॥ ६ ॥ [स्व १२ । उ १ । ऋ ४ ॥ चौ ॥]

[९]

(१–१) १ देवश्रवसो देवातरः; २ गोषा ऋषिः; ३ वृष्णश्चाक्षावर्षणः; ४ मत्स्यवः काण्वः; ५ गोतमो राहूगणः; ६ मधुच्छन्दा वैश्वामित्रः; ७ वामदेवो गौतमः; ८ वत्सः काण्वः; ९ शुनःशेप आजीगर्तिः; १ उखे वातायनः ॥ इन्द्रः (ऋ ४ अश्विनौ; १ वायुः) ॥ गायत्री ॥

१७५ इन्द्रा॑यन्तीव॑स्युथ इन्द्र जातमुपासते । यस्यानासः सुवीर्यम् ॥ १ ॥

१७६ नकि देवा इनीमसि न या योषयामसि । मन्त्रश्रुत्य चरामसि ॥ २ ॥

१७७ दोषो आगाव् बृहद्वाय शुमद्गामन्नाथर्वण । स्तुहि देवं॑सवितारम् ॥ ३ ॥

१७८ एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः । स्तुषे वामश्विना बृहत् ॥ ४ ॥

१७९ इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव ॥ ॥

१८० इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः । महाँ॑ अभिष्टिरोजसा ॥ ६ ॥

१८१ आ तू न इन्द्र वृत्रहन्त्समाकमर्धमा गहि । महान्महीभिरूतिभिः ॥ ७ ॥

१८२ ओजस्तदस्य तित्विष उभे यत्समवर्तयत् । इन्द्रश्चर्मेव रोदसी ॥ ८ ॥

१८३ अयमु ते समतसि कपोत इव गर्भधिम् । वचस्तचिन्न आहरसे ॥ ९ ॥
१८४ यात आ वातु भेषजꣳशम्भु मयोभु नो हृदे । प्र न आयूꣳषि तारिषत् ॥ १० ॥

इति नवमी दशतिः ॥ ९ ॥ सप्तम काण्डः ॥ ७ ॥ [ऋच १ । अ २ । वा ४५ । कु ॥]

[१०]

(१-९) १ कण्वो घौर ; २ ३ ९ वत्सः (ऋ २ ९ मधोरुच्च) काण्वा; ४ श्रुतकक्षः सुकक्षो वा आङ्गिरसः; मधुच्छन्दा वैश्वामित्रः; ६ वामदेवो गौतमः ७ इरिम्बिठिः काण्यः ८ सप्तऋषिर्वसिष्ठो वा ॥ इन्द्रः (ऋ० १ वरुणमित्रार्यमणः; ८ आदित्य) गायत्री ॥

१८५ यꣳ रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा । नꣳ स दभ्यते जनः ॥ १ ॥
१८६ गव्यो षु णो यथा पुराश्वयोत रथया । वरिवस्या महोनाम् ॥ २ ॥
१८७ इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम् । एनामृतस्य पिप्युषीः ॥ ३ ॥
१८८ अया धिया च गव्यया पुरुणामन्पुरुष्टुत । वरसोमꣳसोम आसुवः ॥ ४ ॥
१८९ पाधका नः सरस्वती धाओभिर्याजिनीवती । यज्ञं वष्टु धियावसुः ॥ ५ ॥
१९० क इमं नाहुषीष्वा इन्द्रꣳसोमस्य तर्पयात् । स नो वसूत्या भरात् ॥ ६ ॥
१९१ आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम । एद बर्हिः सदो मम ॥ ७ ॥
१९२ मह्नि श्रीणामवस्तु शुक्षे मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ॥ ८ ॥
१९३ त्वावतः पुरुवसो वयमिन्द्र प्रणेतः । स्मसि स्थातर्हरीणाम् ॥ ९ ॥

इति दशमी दशतिः ॥ १ ॥ अष्टमः काण्डः ॥ ८ ॥ [ऋच १ । अ० ४ । वा ३५ । धु ॥]

इति द्वितीयप्रपाठकं द्वितीयोऽर्धः; द्वितीयः प्रपाठकश्च समाप्तः ।

अथ तृतीयप्रपाठके प्रथमोऽर्धः ।

[१]

(१-१) १ प्रगाथः काण्वः; २ विश्वामित्रो गाथिनः; ३ १ वामदेवो गौतमः; ४, ६ श्रुतकक्षः आङ्गिरसः (ऋ ४ सुकक्षो वा; ५ सुकक्ष आङ्गिरसः); ५ मधुच्छन्दा वैश्वामित्र ; ७ गृत्समदः शौनकः ८,९ भरद्वाजः (ऋ ८ वायुः) बार्हस्पत्यः ॥ इन्द्रः (९ ऋ इन्द्राग्नीवरुणौ) ॥ गायत्री ॥

१९४ उस्रा मन्वन्तु सोमा कृणुध्व राधो अद्रिवः । अध ब्रह्माणि वर्धय ॥ १ ॥
१९५ गिर्वणः पाहि नः सुतं मधोधाराभिरज्यसे । इन्द्र त्वादातमिद्यशः ॥ २ ॥
१९६ सदा व इन्द्रमव्यृषि दक्षं जुष्टमुप ब्रुवे । न देवो भुवत्तूर इन्द्रः ॥ ३ ॥
१९७ आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः । न त्वामिन्द्राति रिच्यते ॥ ४ ॥
१९८ इन्द्रमिद्राधिनो ह्रदविन्द्रमर्कैरकिणः । इन्द्रं वाणीरनूषत ॥ ५ ॥

१९९ इन्द्र इषे ददातु न ऋभुक्षणमृभुं रयिम्। वाजी ददातु वाजिनम् ॥ ६ ॥
२०० इन्द्रो अङ्ग महद्भयमभी षदप चुच्यवत्। स हि स्थिरो विचर्षणिः ॥ ७ ॥
२०१ इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः। गावो वत्सं न धेनवः ॥ ८ ॥
२०२ इन्द्रा नु पूषणा वयं सख्याय स्वस्तये। हुवेम वाजसातये ॥ ९ ॥
२०३ न कि इन्द्र त्वदुत्तरं न ज्यायो अस्ति वृत्रहन्। न कर्षेव यथा त्वम् ॥ १० ॥

इति प्रथमा दशतिः ॥ १ ॥ नवमः खण्डः ॥ ९ ॥ [स्व० ८। ऽ० ७। धा० ३५। ठ ॥]

[२]

(१-१०) १,४ त्रिशोकः काण्वः; २ मधुच्छन्दा वैश्वामित्रः; ३ वत्सः काण्वः; (ऋ० दशोऽन्यः); ५ सुकक्ष आङ्गिरसः; ६, ९ वामदेवो गौतमः; ७ विश्वामित्रो गाथिनः। ८ गोधूक्त्यश्वसूक्तिनौ काण्वायनौ; १० श्रुतकक्षः सुकक्षो वा आङ्गिरसः ॥ इन्द्रः ॥ गायत्री ॥

२०४ तरणिं वो जनानां त्रदं वाजस्य गोमतः। समानमु प्र शंसिषम् ॥ १ ॥
२०५ असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत। सजोषा वृषभं पतिम् ॥ २ ॥
२०६ सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा। मित्रास्पान्त्यद्रुहः ॥ ३ ॥
२०७ यद्वीडाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम्। वसु स्पार्हं तदा भर ॥ ४ ॥
२०८ श्रुत वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम्। आशिषे राधसे महे ॥ ५ ॥
२०९ अरं त इन्द्र श्रवसे गमेम शूर त्वावतः। अरंशक्र परेमणि ॥ ६ ॥
२१० धानावन्तं करम्भिणमपूपवन्तमुक्थिनम्। इन्द्र प्रातर्जुषस्व नः ॥ ७ ॥
२११ अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः। विश्वा यदजय स्पृधः ॥ ८ ॥
२१२ इमे त इन्द्र सोमाः सुतासो ये च सोत्वाः। तेषां मत्स्व प्रभूवसो ॥ ९ ॥
२१३ तुभ्यं सुतासः सोमाः स्तीर्णं बर्हिर्वीभावसो। स्तोतृभ्य इन्द्र मृडय ॥ १० ॥

इति द्वितीया दशतिः ॥ २ ॥ दशमः खण्डः ॥ १० ॥ [स्व० ८। ऽ० २। धा० ३३। ठि ॥]

[३]

(१-९) १ शुनःशेप आजीगर्तिः, २ श्रुतकक्ष आंगिरसः (ऋ० सुकक्षो आंगिरसो वा;) ३ त्रिशोकः काण्वः; ४ मेधातिथिः काण्वः; ५ गोतमो राहूगणः; ६ ब्रह्मातिथिः काण्वः; ७ विश्वामित्रो गाथिनो जमदग्निर्वा; ८ प्रस्कण्वः काण्वः (ऋ० कण्वो घौरः); ९ मेधातिथिः काण्वः ॥ इन्द्रः (ऋ० ५ विश्वेदेवाः), ६ अश्विनौ; मित्रावरुणौ; ८ मरुतः; ९ विष्णुः) ॥ गायत्री ॥

२१४ आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम्। मंहिष्ठंसिञ्च इन्दुभिः ॥ १ ॥
२१५ अतश्चिदिन्द्र नो यहि शतवाजया। इषा सहस्रवाजया ॥ २ ॥

२१६ आ बुन्दं वृत्रहा ददे जातः पृच्छाद्वि मातरम् । क उग्राः के ह शृण्विरे ॥ ३ ॥
२१७ वृषदुक्थं हवामहे सुप्रकरस्नमूतये । साधः कृण्वन्तमवसे ॥ ४ ॥
२१८ ऋजुनीती नो वरुणो मित्रो नयति विद्वान् । अर्यमा देवैः सजोषाः ॥ ५ ॥
२१९ दूरादिहेव यत्सतोऽरुणप्सुरशिश्वितत् । वि भानुं विश्वथातनत् ॥ ६ ॥
२२० आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजांसि सुक्रतू ॥ ७ ॥
२२१ उदु त्ये सूनवो गिरः काष्ठा यज्ञेष्वत्नत । वाश्रा अभिज्ञु यातवे ॥ ८ ॥
२२२ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूढमस्य पाꣳसुले ॥ ९ ॥

इति तृतीया दशतिः ॥३॥ एकादशः खण्डः ॥११॥ [स्व० ६ । उ० १ घा० ३९ । को ॥]

[४]

(१–१०) १,७, ८ मेधातिथिः काण्वः; २ वामदेवो गौतमः; ३, ५ मेधातिथिः काण्वः, प्रियमेधश्चाङ्गिरसः; ४ विश्वामित्रो गाथिनः; ६ दुर्मित्रः (सुमित्रो वा) कौत्सः; ९ विश्वामित्रो गाथिनोऽभीपाद् बदलो वा; १० श्रुतकक्षः (ऋ० सुकक्षो वा) आंगिरसः ॥ इन्द्रः ॥ गायत्री ॥

२२३ अतीहि मन्युषाविणꣳसुषुवाꣳसमुपेरय । अस्य रातौ सुतं पिब ॥ १ ॥
२२४ कदु प्रचेतसे महे वचो देवाय शस्यते । तदिध्यस्य वर्धनम् ॥ २ ॥
२२५ उक्थं च न शस्यमानं नागो रयिरा चिकेत । न गायत्रं गीयमानम् ॥ ३ ॥
२२६ इन्द्र उक्थेभिर्मन्दिष्ठो वाजानां च वाजपतिः । हरिवांस्तुतानाꣳसखा ॥ ४ ॥
२२७ आ याह्युप नः सुतं वाजेभिर्मा हृणीयथाः । महाꣳइव युवजानिः ॥ ५ ॥
२२८ कदा वसो स्तोत्रꣳहूयत आ अव ईमशा रुधद्वाः । दीर्घꣳसुतं वाताप्याय ॥ ६ ॥
२२९ ब्राह्मणादिन्द्र राधसः पिबा सोममृतूꣳरनु । तवेदꣳसख्यमस्तृतम् ॥ ७ ॥
२३० वयं घा ते अपि स्मसि स्तोतार इन्द्र गिर्वणः । त्वं नो जिन्व सोमपाः ॥ ८ ॥
२३१ एन्द्र पृक्षु कासु चित्रभृष्टिं तनूषु धेहि नः । सत्राजिदुग्र पौꣳस्यम् ॥ ९ ॥
२३२ एवा ह्यसि वीरयुरेवा शूर उत स्थिरः । एवा ते राध्यं मनः ॥ १० ॥

इति चतुर्थी दशतिः ॥४॥ द्वादशः खण्डः ॥१२॥ [स्व० १२ । उ० ना । धा० ३० । यौ ॥]

इति द्वितीयोऽध्यायः ॥२॥

इत्यैकसामि समाप्तम् ॥

अथ तृतीयोऽध्यायः।

[५]

(१–१०) १ १ वसिष्ठो मैत्रावरुणिः २ भरद्वाजः (ऋ वीतु) बार्हस्पत्यः, ३ प्रस्कण्वः का० ४ मेधा० गौतमः, ५ ऋषिः प्रागाथः, ६ मेध्यातिथिः काण्वः, ८ अगस्तिः प्रागाथः, ९ प्रगाथो घौरः काण्वः ॥ इन्द्रः, २ मरुतः ॥ द्वितृची ॥

२४३ अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ १ ॥

२४४ त्वामिद्धि हवामहे सातौ वाजस्य कारवः । त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥ २ ॥

२४५ अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे । यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ ३ ॥

२४६ न वो दस्ममुतीषुं वव्नेमेन्द्रानमन्धसः । अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥ ४ ॥

२४७ तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये । बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ ५ ॥

२४८ तरणिर्विषदर्शतो ज्योतिष्कृदसि सूनरः । विभुरप्रो मयो दृशे वाजं पुरन्ध्या युजा । आ व इन्द्रं पुरुहूत नमे गिरा नेमिं तष्टेव सुद्रवम् ॥ ६ ॥

२४९ पिपा सुतस्य रसिनो यत्स्या न इन्द्र गोमतः। आपिर्नो बोधि सधमाद्ये वृधे३ऽस्मा२अधत्तु ते धियः ७

२५० त्व२हि हि वरेण्य पिता भगो वसूनाम् । उक्थापूषस्य मघवन् गविष्टय उरुन्ना२धमिधेये ॥ ८ ॥

२५१ न हि यज्ञमृधं च न वसिष्ठः परिम२ंसते । अस्माकमद्य मरुतः सुते सचा विश्वे पिबन्तु कामिनः ॥९॥

२५२ मा त्वियन्थ्हि शं२सत सखायो मा रिषण्यत । इन्द्रमित्स्तोता वृषण२ं सचा सुते मुहुरुक्था च शं२सत१०

इति पञ्चमी दशतिः ॥ ५ ॥ प्रथमः खण्डः ॥ १ ॥ [स्व० १२ । उ ५ । या० ७६ ॥ नि ॥]

इति तृतीय प्रपाठके प्रथमोऽर्धः ॥ ३ ॥

[६]

(१–१) १ पुरुहन्मा आङ्गिरसः, २ ३ मेध्यातिथि–मेध्यातिथी काण्वौ, ४ विश्वामित्रो गाथिनः, ५ गोतमो (गौतमो वा) राहूगणः, ६ सुमेधपुरुमेधावाङ्गिरसौ, ७ ८, ९ मेध्यातिथिर्मेध्यातिथिर्वा (ऋ मेध्यातिथिः) काण्वः १ देवातिथिः काण्वः ॥ इन्द्रः ॥ बृहती ॥

२५३ नकिष्टं कर्मणा नशद्यश्चकार सदावृधम् । इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्ण्वोजसा ॥ १ ॥

२५४ य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः । सन्धाता सन्धिं मघवा पुरूवसुर्निष्कर्ता विह्रुतं पुनः २

२५५ आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये । ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥ ३ ॥

२५६ आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः । मा त्वा के चिन्नि येमुरिन्न पाशिनोऽति धन्वेव ता३ इहि४

२५७ त्वमङ्ग प्र शं२तिनो देवः शविष्ठ मर्त्यम् । न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ ५ ॥

२५८ त्वमिन्द्र यशा अस्युजीषी शवसस्पतिः । त्वं वृत्राणि हं२न्यप्रतीन्येक इत्पुरुनृम्णश्चर्षणीधृतिः ॥ ६ ॥

२५९ इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे । इन्द्रं२ समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ ७ ॥

२५० इमा उ त्वा पुरुवसो गिरो वर्धन्तु या मम । पावकवर्णाः शुचयो विपश्चितोऽभिस्तोमैरनूषत ॥ ८ ॥

२५१ उप त्वे मधुमत्तमा गिर स्तोमास ईरते । सबाजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥ ९ ॥

२५२ यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् । आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥१०॥

इति पञ्चमी दशतिः ॥ ५ ॥ द्वितीयः खण्डः ॥ २ ॥ [ऋ० ११ । उ० ७ । धा० ७२ । सा० ॥]

[७]

(१–१०) १ भर्गः प्रागाथः; २,८ रेभः काश्यपः; ३ जमदग्निर्भार्गवः; ४,९ मेध्यातिथिः काण्वः; (ऋ० मेध्यातिथिः काण्वः); ५, ६ नृमेधपुरुमेधावाङ्गिरसौ; ७ वासिष्ठो मैत्रावरुणिः; १० भरद्वाजः (ऋ० शंयु) बार्हस्पत्यः ॥ इन्द्रः; ३ मित्रावरुणादित्याः ॥ बृहती ॥

२५३ शग्ध्यू३षु शचीपत इन्द्र विश्वाभिरूतिभिः । भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥ १ ॥

२५४ या इन्द्र भुज आभरः स्ववाँ२असुरेभ्यः । स्तौतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥ २ ॥

२५५ प्र मित्राय प्रार्यम्णे सचध्यमृतावसो । वरूथ्ये३वरुणे छन्द्य वचः स्तोत्र२राजसु गायत ॥ ३ ॥

२५६ अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः । समीचीनास ऋभवः समस्वरन्रुद्रा गृणन्त पूर्व्यम् ॥ ४ ॥

२५७ प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत । वृत्र२हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ॥ ५ ॥

२५८ बृहद्विन्द्राय गायत मरुतो वृत्रहन्तमम् । येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥ ६ ॥

२५९ इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा । शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥७॥

२६० मा न इन्द्र परा वृणग्भवा नः सधमाद्ये । त्वं न ऊती त्वमिन्न आप्यं मा न इन्द्र परावृणक् ॥ ८ ॥

२६१ वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः । पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते ॥ ९ ॥

२६२ यदिन्द्र नाहुषीष्वा ओजो नृम्णं च कृष्टिषु । यद्वा पञ्चक्षितीनां द्युम्नमा भर सत्रा विश्वानि पौंस्या१०

इति सप्तमी दशतिः ॥ ७ ॥ तृतीयः खण्डः ॥ ३ ॥ [ऋ० १० । उ० १ । धा० ६२ । पा ॥]

[८]

(१–१०) १ मेध्यातिथिः (ऋ० मेध्यातिथिः) काण्वः; २ रेभः काश्यपः; ३ वासः (ऋ० वशोऽश्व्यः); ४ भरद्वाजः (शंयुः) बार्हस्पत्यः; ५ नृमेध आंगिरसः; ६ पुरुहन्मा आंगिरसः; ७ नृमेध -पुरुमेधावांगिरसौ; ८ वासिष्ठो मैत्रावरुणिः; ९ मेध्यातिथि-मेध्यातिथी काण्वौ; १० कक्षिः प्रागाथः ॥ इन्द्रः ॥ बृहती ॥

२६३ सत्यमित्था वृषेदसि वृषजूतिर्नोऽविता । वृषा ह्युग्र शृण्वषे परावति वृषो अर्वावति श्रुतः ॥ १ ॥

२६४ यच्छक्रासि परावति यदर्वावति वृत्रहन् । अतस्त्वा गीर्भिर्युगदिन्द्र केशिभिः सुतावा२आ विवासति२

२६५ अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम् । इन्द्रं नाम श्रुत्य२शाकिनं वचो यथा ॥ ३ ॥

२६६ इन्द्र त्रिधातु शरणं त्रिवरूथ२स्वस्तये । छर्दिर्यच्छ मघवन्नपश्च मह्यं च यावया दिद्युमेभ्यः ॥ ४ ॥

२६७ आयन्त इव सूर्य विश्वेदिन्द्रस्य भक्षत। वसूनि जाते जनिमान्योजसा प्रति भागं न दीधिम: ॥ ५ ।
२६८ न सीमदेव आप तविष दीधीर्यो मर्त्यः। पतत्या चिद्यत पतद्यो युयोजत इन्द्रो हरी युयोजते ॥ ६ ।
२६९ आ नो विश्वासु हव्यमिन्द्र: समसु भूषत। उप ब्रह्माणि सवनानि वृत्रहन्परमज्या ऋचीषम ॥ ७ ।
२७० नवेदिन्द्रायमं वसुत्यं पुष्यासि मत्यमम्। सत्रा विश्वस्य परमस्य राजसि न किष्ट्वा गोषु वृण्वते ॥८॥
७१ पवेथ मन्वेदसि पुरुषा चिद्धि ते मनः। अलर्षि युध्म खजकृत्पुरन्दर प्र गायत्रा अगासिषु: ॥ ९ ।
२७२ वयमेनमिदा ह्योपीपेमेह वज्रिणम्। तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते ॥ १० ॥

इति अष्टमी दशतिः ॥ ८ ॥ चतुर्थः खण्डः ॥ ४ ॥ [ऋ० १४ । ऊ १ । चा ७४ । ती ॥]

[९]

(१-१) १ ६ पुरुहन्मा आंगिरसः; २ मगं प्रागाथः; ३ इतिरिविठि काण्वः; ४ ऋभवश्चिभिर्गौपः; ५, ७ देवातिथिः काण्वः; ८ वसिष्ठो मैत्रावरुणिः; ९ भरद्वाजो बार्हस्पत्यः १ मेध्यः काण्वः ॥ इन्द्रः (ऋ ३ वास्तोष्पतिर्वा; ४ सूर्यः; ९ इन्द्राग्नी) ॥ बृहती ॥

२७३ यो राजा चर्षणीनां याता रथेभिरध्रिगुः। विश्वासां तरुता पृतनानां ज्येष्ठो यो वृत्रहा गृणे ॥१॥
२७४ यत्र इन्द्र भयामहे ततो नो अभय कृधि। मघवञ्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि ॥२॥
२७५ वास्तोष्पते ध्रुवा स्थूणां सधस्थं सोम्यानाम्। द्रप्सः पुरां भेत्ता शश्वतीनामिन्द्रो मुनीनां सखा ॥३॥
२७६ बण्महाँ असि सूर्य बडादित्य महाँ असि। महस्ते सतो महिमा पनिष्म महा देव महाँ असि ॥ ४ ॥
२७७ मध्वी रात्री सुरूप बृहोषा अस्यविन्द्र ते सखा। सोमभाजा वयसा सचते सदा चन्द्रेव याति सभामुप ॥५॥
२७८ यद्वाग्यं इन्द्र ते शतं शतं भूमीरुत स्युः। न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥६॥
७९ यद्विन्द्र प्रागपागुदग्न्यग्वा हूयसे नृभिः। सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥ ७ ॥
२८० कस्तमिन्द्र त्वा वसवा मर्त्यो दधर्षति। श्रद्धा हि ते मघवन्पार्ये दिवि वाजी वाजं सिषासति ॥ ८ ॥
२८१ इन्द्राग्नी अपादिय पूर्वागात्पद्वतीभ्यः। हित्वा शिरो जिह्वया रारपच्चरत्यरंशत्पदा न्यक्रमीत् ॥ ९ ॥
२८२ इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः। आ शतम शतामिरभिष्टिभिरा स्वापे स्वापिभिः ॥१०॥

इति नवमी दशतिः ॥ ९ ॥ इति पञ्चमः खण्डः ॥ ५ ॥ [ऋ १६ । ऊ ५ । चा ७२ । का ॥]

[१०]

(१ १) १ नृमेध आंगिरसः; २,३ वसिष्ठो मैत्रावरुणिः; ४ भरद्वाजः (ऋ शंयुः) बार्हस्पत्यः ५ परुच्छेपो दैवोदासिः; ६ वामदेवो गौतमः; ७ मन्यातिर्वि काण्वः; ८ भर्गः प्रागाथः; ९ १० मेधातिथि-मेध्यातिथी काण्वौ ॥ इन्द्रः (५ ऋ० आश्विनौ) ॥ बृहती ॥

२८३ इत ऊती वो अजरं प्रहेतारमप्रहितम्। आशुं जेतारं हेतारं रथीतममतूर्तं तुग्रियावृधम् ॥ १ ॥
२८४ मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन्। आराच्छात्रूयतो नो मा सधमाद न आ गहीह वा सन्नुप श्रुधि ॥ २ ॥

२८५ सुनोत सोमपाते सोममिन्द्राय वज्रिणे। पचता पक्तीरवसे दृणुध्वमित्पृणन्नित्पृणते मयः ॥ ३ ॥

२८६ यः सत्राहा विचर्षणिरिन्द्रं तं हूमहे वयम्। सहस्रमाघ्यो तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥४॥

२८७ शचीभिनः शचीवसू दिवा नक्तं दिशस्पतम्। मा वां रातिरुपदसत्कदाचनास्मद्रातिः कदाचन ॥५॥

२८८ यदा कदा च मीढुषे स्तोता जरेत मर्त्यः। आदिद्वसूषेत वरुणं विपा गिरा मित्रं विप्रतानाम् ॥६॥

२८९ पाहि गा अन्धसो मद इन्द्रजा मेध्यातिथे। यः सम्मिश्ला हर्यार्या हिरण्यय इन्द्रो वज्री हिरण्यय ॥७॥

२९० उभयरंश्रृणवच्च न इन्द्रो अर्वागिदं वचः। सत्राच्या मघवान्त्सोमपीतये धिया शविष्ठ आ गमत् ॥८॥

२९१ महे च न त्वाद्रिवः परा शुल्काय दीयसे। न सहस्राय नायुताय वज्रिवो न शताय शतामघ ॥ ९ ॥

२९२ वस्या२इन्द्रासि मे पितुरुत भ्रातुरभुञ्जतः। माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥१०॥

इति दशमी दशतिः ॥ १ ॥ षष्ठः काण्डः ॥ ६ ॥ [ऋ १५। अ० ७। मा ७६। मू॥]

इति तृतीयमपाठके द्वितीयोऽर्धः। तृतीयः प्रपाठकश्च समाप्तः ॥

अथ चतुर्थमपाठके प्रथमोऽर्धः।

[१]

(१-१) १ वसिष्ठो मैत्रावरुणिः; २, ६ ७ भरद्वाजो बार्हस्पत्यः; ३ मेध्यातिथिः मेध्यातिथी काण्वौ, विश्वामित्र इत्येके; ४ मेधा गौतमः; ५ मेध्यातिथिः (ऋ मेध्यातिथिः) काण्वः; ८ ऋष्टिषेणः काण्वः; ९ मेध्यातिथिः (मेध्यातिथिर्वा) काण्वः; १० ऋभुर्वाज आंगिरसः ॥ इन्द्रः; ७ वसुः ॥ त्रिष्टुप् ॥

२९३ इमं इन्द्राय सुन्विरे सोमासो दध्याशिरः। तांरआ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥१॥

२९४ इमं इन्द्र मदाय ते सोमाश्चिकित्र उक्थिन। मधोः पपान उप नो गिरः शृणु रास्व स्तोत्राय गिर्वणः२

२९५ आ रभ्रा३थ सबर्दुघा२हुवे गायत्रवेपसम्। इन्द्रं धेनु२सुदुघामन्यामिषमुरुधारामरंकृतम् ॥ ३ ॥

२९६ न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीडवः। यच्छिक्षसि स्तुवते मावते वसु न किष्टदा मिनाति ते ॥४॥

२९७ क ईं वेद सुते सचा पिबन्तं कद्वयो दधे। अयं यः पुरो विभिनत्योजसा मन्दानः शिप्रयन्धसः ॥ ५ ॥

२९८ यदिन्द्र शासो अवतं त्वयावता सदस्परि। अस्माकमंशुं मघवन्पुरुस्पृहं वसव्ये अधि वर्हय ॥ ६ ॥

२९९ स्वधा नो वैश्य वचः पर्जन्यो ब्रह्मणस्पतिः। पुत्रैर्भ्रादिभिरदितिर्नु पातु नो दुष्टरं पामरं वचः ॥ ७ ॥

३०० कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे। उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥ ८ ॥

३०१ युक्ष्वा हि केशिना हरी इन्द्र परावतः। अर्वाचीनो मघवन्त्सोमपीतय उग्र ऋष्वेभिरा गहि ॥ ९ ॥

३०२ त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः। स इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि ॥ १० ॥

इति प्रथमा दशतिः ॥१॥ सप्तमः काण्डः ॥७॥ [ऋ १३। ऊ २। मा ५२। हि॥

[१]

(१ १) १ २,७ ८ वसिष्ठो मैत्रावरुणिः ; २ अश्विनौ भैषस्वतौ; ४ प्रस्कण्वः काण्वः; ५ मेधातिथिर्मेध्यातिथी काण्वौ; ६ देवातिथिः काण्वः; ९ गृत्समद आंगिरसः; १ गोषाः गौतमः ॥ इन्द्रः; १ उषाः २ ३ (अ १)

अश्विनौ ॥ बृहती ॥

३०३ प्रत्यु अदर्श्यायत्यू३च्छन्ती दुहिता दिव । अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरी ॥ १

३०४ इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना । अयं वामह्वे वसे शचीवसू विश्वं विश्वेऽहि गच्छथः ॥ २

३० कुष्ठः कां वामश्विना तपानो देवा मर्त्यः । प्रता वामहमया अपमाणोऽशुनत्थमु आहन्यथा ॥ ३

३० अयं वां मधुमत्तमः सुतः सोमो दिविष्टिषु । तमश्विना पिबतं तिरोअह्नं धत्तं रत्नानि दाशुषे ॥ ४

३०७ आ त्वा सोमस्य गल्दया सदा याचन्नहं ज्या । भूणि मृग न सवनेषु चुक्रुधं क ईशानं पाविषत् ॥

३०८ अध्वर्यो द्राव्या त्वं२ सोममिन्द्रः पिपासति । उपो नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥ ६

३०९ अमीषामस्तदा भरेन्द्र ज्याया कनीयसः । पुरूवसुर्हि मघवन्त्सनादसि रेरेभरे न हव्यः ॥ ७

३१० यदिन्द्र यावतस्त्वमेतावदहमीशीय । स्तोतारमिद्दधिषे रदावसो न पापत्वाय रंसिषम् ॥ ८

३११ त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः । अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः ॥ ९

३१२ प्र यो रिरिक्ष ओजसा दिवः सदोभ्यस्परि । न त्वा विव्याच रज इन्द्र पार्थिवमति विश्वं ववक्षिथ ॥ १

इति द्वितीया दशतिः ० २ ॥ अष्टमः खण्डः ॥ ८ ॥ [ऋ १ । ३० १ । मा ७७ । वे ॥

इति बृहती समाप्ता ।

[२]

(१-१) १ २ ५ वसिष्ठो मैत्रावरुणिः ३ गातुरात्रेय ; ४ पुरुहन्म्य ; ५ सप्तगुर्आंगिरसः; ७ गौरिवीतिः शाक्त्यः; ९ गोतमो राहूगण ; सुहोत्रो भारद्वाज ॥ इन्द्रः ; (अ ५ इन्द्रो वैकुण्ठ)

८ सप्त ॥ त्रिष्टुप् ॥

३१३ मक्षायि वेय गाध्रजीकमन्धो न्यस्मिन्निन्द्रो अनुषसुयोध ।
योधामपि त्वा हयश्व यातवा न स्तोममन्धसो मदेषु ॥ १ ॥

३१४ यानिह इन्द्र सदनं अकारि तमा वृणीमः पुरुहूत प्र याहि ।
असो यथा नोऽवितो वृधश्चिद्वो वसूनि ममदच्च सोमैः ॥ २ ॥

३१५ अवर्यदस्मत्समृतो वि खानि त्वमर्जयान्वद्रयानार अरम्णाः ।
महान्तमिन्द्र पर्वतं वि यद्वः सृजद्वारा अव यद्दानवान्हन् ॥ ३ ॥

३१६ सुध्वाजास इन्द्र स्तुमसि त्वा सनिष्यन्तश्चित्तविषुणं वाजम् ।
आ नो मर हृषितं यस्य कोना तना रमना सह्यामात्मोताः ॥ ४ ॥

३१७ जरद्बुधा ते दक्षिणमिन्द्र हस्त वसूयवो वसुपते वसूनाम्।
विद्मा हि त्वा गोपतिꣳशूर गोनामस्मभ्य चित्र वृषणꣳरयिं दाः ॥ ॥

३१८ इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः।
शूरो यृथाना श्रवसश्च काम आ गोमति व्रजे भजा त्व नः ॥ ६ ॥

३१९ यथः सुपर्णा उप सेदुरिन्द्र प्रियमेधा ऋक्वयो नाधमानाः।
अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् ॥ ७ ॥

३२० नाके सुपर्णमुप यत्पतन्तꣳहृदा वेनन्तो अभ्यचक्षत त्वा।
हिरण्यपक्ष वरुणस्य दूत यमस्य योना शकुन भुरण्युम् ॥ ८ ॥

३२१ ब्रह्म जज्ञान प्रथम पुरस्ताद्वि सीमतः सुरुचो वेन आवः।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वियः ॥ ९ ॥

३२२ अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय।
विरप्शिने वज्रिणे शन्तमानि वचाꣳस्यस्मै स्थविराय तक्षुः ॥ १० ॥

इति तृतीया दशति ॥ ३ ॥ इति नवमः खण्ड ॥ ९ ॥ [स्व १३ । ऊ ६ । ऋा ९१ । ऋ ॥

[४]

(१-९) १, २ ४ गृत्समदो भार्गवः (ऋ विरूपोऽङ्गिरसः)। ३ वृषाकपिर्ऐन्द्रः। ५ वामदेव्यः। ६ ८ वसिष्ठो मैत्रावरुणिः। ७ विश्वामित्रो गाथिन ९ गोरिवीतिः शाक्त्यः ॥ इन्द्रः ॥ त्रिष्टुप् (६ ऋ विराट्) ॥

३२३ अव द्रप्सो अꣳशुमतीमतिष्ठदीयानः कृष्णो दशभिः सहस्रैः।
आवत्तमिन्द्रः शच्या धमन्तमप स्नीहितिं नृमणा अधद्राः ॥ १ ॥

३२४ धूनस्य त्वा यशसथादीधयाणा विश्वे देवा अजहुर्ये सखायः।
मरुद्भिरिन्द्र सख्य ते अस्त्यथेमा विश्वाः पृतना जयासि ॥ २ ॥

३२५ विधुं दद्राणꣳसमने बहूनां युवानꣳसन्तं पलितो जगार।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥ ३ ॥

३२६ स्थश्च स्थश्च सोमपा बभूवथुर्विश्वा वां भूतमवसे सधस्थे।
गृहे वामग्निरजनिष्ट पूर्वो विभुमित्रो भवसि दम्पती वां घृतेन द्यावापृथिवी अभ्यक्तं विश्वान्यन्यो भुवनानि यं धाः ॥ ४ ॥

३२७ मंहिष्ठं न त्वा वाजिन भृष्टिमन्तं पृणन्तमानं वृषभं स्थिरꣳशवम्॥
करोष्यर्यस्तरुषीर्वस्त्रिन्द्र क्षुधं वृत्रहणं गृणीषे ॥ ५ ॥

३२८ प्र वो महे महे वृधे भरध्वं प्रअग्नेतसे प्र सुमतिं कृणुध्वम्।
विशः पूर्वीः प्र चर चर्षणिप्राः ॥ ६ ॥

३२९ शुनꣳहुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानि ॥ ७ ॥

३३० उदु ब्रह्माण्यैरत श्रवस्येन्द्रꣳसमर्ये महया वसिष्ठ।
आ यो विश्वानि श्रवसा ततानोपश्रोता म ईवतो वचाꣳसि ॥ ८ ॥

३३१ चक्रं यदस्यान्वा नियत्समुतो तदस्मै मध्विच्छश्चद्यात्।
पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु ॥ ९ ॥

इति चतुर्थी दशतिः ॥ ४ ॥ दशम खण्डः ॥ १ ॥ [ऋ० १६। ४ ६। ऋ० ७२। ऋ॥]

[५]

(१–१) १ अग्निर्नेमिस्त्वाष्ट्र्यः। २ भरद्वाजः (ऋ गर्गो भारद्वाजः)। ३ विश्वव ऐन्द्रः, वसुहव्यो वासुक्रः (ऋ प्राजापत्यो वा) ४–६, ९ वामदेवो गौतमः (९ ऋ यमी वैवस्वती) ७ विश्वामित्रो गाथिनः। ८ रेणु वैश्वामित्र। १ गोतमो राहूगणः ॥ इन्द्रः (ऋ १ त्वाष्ट्र्यः ; ७ पर्वतेन्द्रौ। ९ यमो वैवस्वतः) ॥ त्रिष्टुप् ॥

३३२ त्यमू षु वाजिनं देवजूतꣳ सहोवानं तरुतारꣳरथानाम्।
अरिष्टनेमिं पृतनाजमाशुꣳस्वस्तये तार्क्ष्यमिहा हुवेम ॥ १ ॥

३३३ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम्।
ह्वये शक्रं पुरुहूतमिन्द्रमिदꣳ हविर्मघवा वेत्विन्द्रः ॥ २ ॥

३३४ यजामह इन्द्रं वज्रदक्षिणꣳहरीणा रथ्याꣳवियतानाम्।
प्र यमधुर्विधवेवूर्ध्वधा भुवत्रि सेनाभिर्मयमानो वि राधसा ॥ ३ ॥

३३५ सत्राहणं दाधृषिं तुम्रमिन्द्रं महामपारं वृषभꣳसुवज्रम्।
हन्ता यो वृत्रꣳ सनितोत वाजं दाता मघानि मघवा सुराधाः ॥ ४ ॥

३३६ यो नो वनुष्यन्नभिदासति मर्त उगणा वा मन्यमानस्तुरो वा।
क्षिधी युधा श्रवसा वा तमिन्द्रामी द्यामं वृषमणस्त्योताः ॥ ५ ॥

३३७ य वृत्रेषु क्षितय स्पर्धमाना य युत्सु तुरयन्तो हवन्ते।
दरीषाणो यमपामुपज्मन्प्र विवासो वाजान्ते स इन्द्रः ॥ ६ ॥

३३८ इन्द्रापर्यता बृहता रथेन वामीरिष आ वहतꣳसुवीराः ।
वीतꣳहव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिडया मदन्ता ॥ ७ ॥

३३९ इन्द्राय गिरो अनिशितसर्गा अपः प्रेरयत्सगरस्य बुध्नात् ।
यो अक्षेणेव चक्रियो शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्याम् ॥ ८ ॥

३४० आ त्वा सखायः सख्या ववृत्युस्तिरः पुरू चिदर्णवं जगन्वाः ।
पितुर्नपातमा दधीत वेधा अस्मिन्क्षये प्रतरां दीद्यानः ॥ ९ ॥

३४१ को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हणायून् ।
आसन्नेषामप्सुवाहो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥ १० ॥

इति पञ्चमी दशतिः ॥ ५ ॥ एकादशः खण्डः ॥ ११ ॥ [स्व० १८ । उ० ४ । ऋ० ८६ । ह्रु ॥]

इति त्रिष्टुप् समाप्ता ॥ इति चतुर्थप्रपाठकस्य प्रथमोऽर्धः ॥ १ ॥

[६]

(१-१०) १ मधुच्छन्दा वैश्वामित्रः; २ जेता माधुच्छन्दसः; ३, ६ गोतमो राहूगणः; ४ अत्रिर्भौमः; ५, ८ तिरश्चीराङ्गिरसः; ७ नोधापितिः काण्वः; ९ विश्वामित्रो गाथिनः; १० तिरश्चीरांगिरसः शंयुर्बार्हस्पत्यो वा ॥

॥ इन्द्रः ॥ अनुष्टुप् ॥

३४२ गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः । ब्रह्माणस्त्वा शतक्रत उद्वꣳशमिव येमिरे ॥ १ ॥

३४३ इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतमꣳरथीनां वाजानाꣳसत्पतिं पतिम् ॥ २ ॥

३४४ इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् । शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥ ३ ॥

३४५ यदिन्द्र चित्र म इह नास्ति त्वादातमद्रिवः । राधस्तनो विदद्वꣳस उभयाहस्त्या भर ॥ ४ ॥

३४६ श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति । सुवीर्यस्य गोमतो रायस्पूर्धि महाꣳअसि ॥ ५ ॥

३४७ असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि । आ त्वा पृणक्त्विन्द्रियꣳरजः सूर्यो न रश्मिभिः ॥६॥

३४८ एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ७ ॥

३४९ आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः । अभि त्वा समनूषत गावो वत्सं न धेनवः ॥ ८ ॥

३५० एतो न्विन्द्रꣳस्तवाम शुद्धꣳशुद्धेन साम्ना । शुद्धैरुक्थैर्वावृध्वाꣳसꣳशुद्धैराशीर्वान्ममत्तु ॥ ९ ॥

३५१ यो रयिं वो रयिन्तमो यो गुह्यगुह्यवत्तमः । सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥१०॥

इति षष्ठी दशतिः ॥ ६ ॥ द्वादशः खण्डः ॥ १२ ॥ [स्व० ४ । उ० ४ ऋ० ५४ ॥ ह्री ॥]

इति तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्याय ।

[७]

(१ ८) १ भरद्वाजो बार्हस्पत्य ; २ वामदेवो गौतमः शाकपूतो वा; ३ प्रियमेध आङ्गिरस ४ प्रगाथ काण्वः; ५ इषायाम्य आत्रेय ; ६ सोमुचीर्बार्हस्पत्य ७ वामदेवो गौतमः; ८ नेता मानुष्यस्त्रयः ॥ इन्द्रः; ५ मरुतः; ७ वृष्टिका वा ॥ अनुष्टुप् ॥

३५५ प्रत्यस्मै पिपीषते विश्वानि विदुषे भर । अरङ्गमाय जग्मयेऽपश्चादध्वने नरः ॥ १

३५६ आ नो वयो वयाश्वर्यं महार्न्त गह्वरेष्ठां महान्त पूर्वीनेष्ठाम् । उग्र यत्रो अपावधीः ॥ २

३५४ आ त्वा रथ यथोतये सुम्नाय वर्तयामसि । तुविकूर्मिमृतीषहमिन्द्रं शविष्ठ सत्पतिम् ॥ ३

३ ५ स पूर्व्या महोनां वेनः क्रतुभिरानजे । यस्य द्वारा मनुः पिता देवेषु धिय आनजे ॥ ४

३५६ यदी पवित्रत्याशवो भ्राजमाना रथेष्या । पवन्तो मविर मधु क्षय ऋषारंसि कृण्वते ॥ ५

३५७ त्यमु षा अप्रहणं तुणीये शवसस्पतिम् । इन्द्रं विश्वासाह नरं शविष्ठं विश्ववद्सम् ॥ ६

३५८ वधिक्राण्णो अकारिषु जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखा करत्प्र न आयूंषि तारिषत् ॥ ७

३५९ पुरां भिन्दुर्युवा कविरमितौजा अजायत । इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुत ॥ ८

इति सप्तमी दशतिः ॥ ७ ॥ इति प्रथमः खण्डः ॥ १ ॥ [स्व ५ । उ २ । मा ४५ ॥ पु ॥

[८]

(१–१) १ ३ ५ प्रियमेध आङ्गिरसः; २ १ वामदेवो गौतमः; ४ मधुच्छन्दा वैश्वामित्रः; ६ भरद्वाजो बार्हस्पत्यः; ७ आत्रेयीतिः ८ अच्छ्यः काण्वः ; ९ ऋषि जात्यश्व (ऋ कुत्स आंगिरसो वा) ॥ इंद्रः (६ ऋ अंगिरः) ८ उषाः; ९ विश्वेदेवाः ॥ अनुष्टुप् ॥

३६० प्रप्र वस्त्रिष्टुभमिष धन्वन्त्रीरायेन्वसे । धिया वो मेधसातये पुरन्ध्या विवासति ॥ १

३६१ कदयमस्य स्वर्विदो याथाद्व सयुजाविति । ययोर्विश्वमपि व्रतं यज्ञं धीरा निचाय्य ॥ २

३६२ अर्चत प्रार्चता नरः प्रियमेधासो अर्चत । अर्चन्तु पुत्रका उत पुरमिद्धृष्णवर्चत ॥ ३

३६३ उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे । शक्रो यथा सुतेषु णो रारणत्सख्येषु च ॥ ४

३६४ विश्वानरस्य वस्पतिमनानतस्य शवसः । परुषश्च चषणीनामूती हुवे रथानाम् ॥ ५

३६५ स घा गस्ते दिवो नरा पिया मतश्च शंसत । ऊर्ध्वा स बृहतो दिवो विधन्नरक्षो न तरति ॥ ६

३६६ विभोष इन्द्र राधसो विश्वी राति शतक्रतो । अथा नो विश्वचर्षण द्युम्नरत्नुदश्च मंहय ॥ ७

३६७ वयश्चित्ते पतत्रिण विपाजुतुष्यदद्रुहि । उषः प्रारन्नृतूरनु दिवो अन्तेभ्यस्परि ॥ ८

३६८ अमी ये देवा स्थन मध्य मा रोचने दिवः । कद्ध नूनं कदर्थे का प्रत्ना व आहुतिः ॥ ९

३६९ ऋचः साम यजामहे याभ्यां कर्माणि कृण्वते । वि ते सदांसि राजतो यज्ञं देवेषु वक्षतः ॥१०॥

इति अष्टमी दशतिः ॥ ८ ॥ द्वितीयः खण्डः ॥ २ ॥ इत्यनुष्टुभः ॥ [स्व० ७ । उ० ३ । धा० ५४ । जी ॥]

[९]

(१–११) १ रेभः काश्यपः; २ सुवेदाः शैलूषिः; ३ वामदेवो गौतमः; ४, ७, ८ सप्त्य आङ्गिरसः; ५ विश्वामित्रो गाथिनः; ६ कृष्ण आङ्गिरसः; ९ भरद्वाजो बार्हस्पत्यः; १० मेधातिथिः काण्वः (ऋ० मान्धाता यौवनाश्वः); ११ कुत्स आङ्गिरसः ॥ इन्द्रः; ९ द्यावापृथिवी ॥ जगती; १ अति जगती; १० महापङ्क्तिः ॥

३७० विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जज्ञानुध्र राजसे ।
क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनम् ॥ १ ॥

३७१ अत्ते वधामि प्रथमाय मन्यवेऽहन्यद्स्युं नर्यं विवेरपः ।
उभे यत्वा रोदसी धावतामनु भ्यसाते शुष्मात्पृथिवी चिदद्रिवः ॥ २ ॥

३७२ समेत विश्वा ओजसा पतिं दिवो य एक इद्भूरतिथिर्जनानाम् ।
स पूर्व्यो नूतनमाजिगीषं तं वर्तनीरनु वावृत एक इत् ॥ ३ ॥

३७३ इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
न हि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति तद्धर्यं नो वचः ॥ ४ ॥

३७४ चर्षणीधृतं मघवानमुक्थ्यऽमिन्द्रं गिरो बृहतीरभ्यनूषत ।
वावृधानं पुरुहूतꣳ सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे ॥ ५ ॥

३७५ अच्छा व इन्द्रं मतयः स्वर्युवः सध्रीचीर्विश्वा उशतीरनूषत ।
परि ष्वजन्त जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानमूतये ॥ ६ ॥

३७६ अभि त्यं मेषं पुरुहूतमृग्मियमिन्द्रं गीर्भिर्मदता वस्वो अर्णवम् ।
यस्य द्यावो न विचरन्ति मानुषं भुजे मꣳहिष्ठमभि विप्रमर्चत ॥ ७ ॥

३७७ त्यꣳसु मेषं महया स्वर्विदꣳशतं यस्य सुभ्वः साकमीरते ।
अत्यं न वाजꣳ हवनस्यदꣳ रथमिन्द्रं वव्रुत्यामवसे सुवृक्तिभिः ॥ ८ ॥

३७८ घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥ ९ ॥

३७९ उभे यदिन्द्र रोदसी आपप्राथोषा इव । महान्तं त्वा महीनाꣳ सम्राजं चर्षणीनाम् ।
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ १० ॥

३८० प्र मन्विने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तꣳ सख्याय हुवेमहि ॥ ११ ॥

इति नवम दशति: ॥ ९ ॥ तृतीयः खण्डः ॥ ३ ॥ [स्व १७ । उ ७ । ऋ ९३ । पि ॥ इति ऋगाद्यः ॥

[१०]

(१-१) १ भारद्वः काण्वः २ ३ गोपूरवसयसूचिन्यौ काण्वायनौ; ४ पर्वतः काण्वः ५-७ विश्वमना वैयश्वः; ८ नृमेध आङ्गिरसः; ९ गोतमो राहूगणः ॥ इन्द्रः ॥ उष्णिक् ॥

३८१ इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम् । विदे वृधस्य दक्षस्य महाꣳहि यः ॥ १
३८२ तमु भमि प्र गायत पुरुहूतं पुरुष्टुतम् । इन्द्रं गीर्भिस्तविषमा विवासत ॥ २
३८३ त ते मदं गृणीमसि वृषणं पृश्नु सासहिम् । उ लोककृत्नुमद्रिवो हरिश्रियम् ॥
३८४ यत्सोममिन्द्र विष्णवि यज्ञे वा चित्र आभुवे । यता मरुत्सु मन्वसे सजिन्वुभिः ॥ ४
३८५ एतु मघोर्मदिन्तरꣳ सिञ्चाध्वर्यो अन्धसः । एवा हि वीरस्तवते सदावृधः ॥ ५
३८६ एन्द्रमिन्द्राय सिञ्चत पिबाति सोम्यं मधु । प्र राधाꣳसि चोदयते महित्वना ॥ ६
३८७ एतो न्विन्द्रꣳ स्तवाम सखायः स्तोम्यं नरम् । कृधीयो विश्वा अभिपित्वेषु नः ॥ ७
३८८ इन्द्राय साम गायत विप्राय बृहते बृहत् । ब्रह्मकृते विपश्चिते पनस्यवे ॥
३८९ य एक इद्विदयते वसु मर्ताय दाशुषे । ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥ ९
३९० सख्याय वः शिवामहे ब्रह्मेन्द्राय वज्रिणे । स्तुष ऊ षु वो नृतमाय धृष्णवे ॥ १०

इति दशमी दशतिः ॥ १० ॥ चतुर्थः खण्डः ॥ ४ ॥ [स्व १ । उ ४ । ऋ ६१ । सा ॥ इति चतुर्थप्रपाठके द्वितीयोऽर्धः, चतुर्थः प्रपाठकश्च समाप्तः ॥

अथ पञ्चम प्रपाठक ।

[१]

(१-८) १ प्रगाथो घौरः काण्वः; २ मरद्वानो भारद्वाजयवासः; ३ नृमेध आङ्गिरसः; ४ पर्वतः काण्वः; ५ ७ हरिमिर्विटि काण्वाः; ६ विश्वमना वैयश्वः; ८ वसिष्ठो मैत्रावरुणिः ॥ इन्द्रः; ५ ७ मरुतः ॥ उष्णिक्; ८ विराडुष्णिक् ॥

३९१ शृणे तदिन्द्र ते शव उपमा देवतातये । यत्रा नश्चुम्रभोजसा शचीपते ॥
३९२ यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयन् । अयरस सोम इन्द्र ते सुतः पिब ॥ २
३९३ एन्द्र नो गधि प्रिय सत्राजिद्गोत्र । गिरिन्न विश्वतः पृथुः पतिर्दिवः ॥
३९४ य इन्द्र सोमपातमो मद शविष्ठ चेततति । येना हꣳसि न्याङ्गिरः तमीमहे ॥ ४
३९५ तमे तुनाय तत्व नो ग्राणीव भायुर्यीयस । आदित्यासः समहसः कृणोतन ॥

३९६ वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम् । अहरहः शुन्ध्युः परिपदामिव ॥ १ ॥

३९७ अपामीवामप स्त्रिधमप सेधत दुर्मतिम् । आदित्यासो युयोतना नो अंहसः ॥ ७ ॥

३९८ पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः । सोतुर्बाहुभ्यां सुयतो नार्वा ॥ ८ ॥

इति प्रथमा दशतिः ॥ १ ॥ पञ्चमः खण्डः ॥ ५ ॥ इत्युत्तिष्ठ । [स्व ५ । ख २ । ऋ० ५१ । फ ॥]

[६]

(१-१) सौभरिः काण्वः । ७, ८ वृषेव आंगिरसः ॥ इन्द्रः । ३ ६ मरुतः ॥ ककुप् ॥

३९९ अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि । युधेदाप्नमिच्छसे ॥ १ ॥

४०० यो न इदमिदं पुरा प्र वस्य आनिनाय तमु व स्तुषे । सखाय इन्द्रभूतये ॥ २ ॥

४०१ आ गन्ता मा रिषण्यत प्रस्थावानो मापं स्थात समन्यवः । इहा चियमयिष्णवः ॥ ३ ॥

४०२ आ याह्यमित्र्वऽवपते गोपत उर्वरापते । सोमर सोमपते पिब ॥ ४ ॥

४०३ त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभं वृषीमहि । सरण्यो जनस्य गोमतः ॥ ५ ॥

४०४ गावश्चिद्धा समन्यवः सजात्येन मरुतः सयमयवः । रिहते ककुभो मिथः ॥ ६ ॥

४०५ त्वं म इन्द्रा भर ओजो नृम्णर शतक्रतो विचर्षणे । आ वीरं पृतनासहम् ॥ ७ ॥

४०६ अधा ह्यग्न गिर्वण उप त्वा काम ईमहे ससुम्महे । उवेव गन्त उदभिः ॥ ८ ॥

४०७ नीमस्तस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे । अभि त्वामिन्द्र नोनुमः ॥ ९ ॥

४०८ वयमु त्वामपूर्व्य स्थूर न कश्चिद्भरन्तोऽवस्यवः । वाजे चित्रर हवामहे ॥ १० ॥

इति द्वितीया दशतिः ॥ २ ॥ षष्ठः खण्डः ॥ ६ ॥ इति ककुभः ॥ [स्व २ । ख २ । ऋ० ४१ । छ ॥]

[७]

(१-१) १-८ गोतमो (सम्मदो वा) राहूगणः । ९ ऋषिः आत्रेयः (ऋ कुत्स आंगिरसो वा) । १ भवस्पुरा-त्रेयः ॥ इन्द्रः । ९ विश्वेदेवाः । १ जगती । पंक्तिः ।

४०९ स्वादोरित्था विषूवतो मधोः पिबन्ति गौर्यः ।

या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभसे वस्वीरनु स्वराज्यम् ॥ १ ॥

४१० इत्था हि सोम इन्मदो ब्रह्म चकार वर्धनम् ।

शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्वराज्यम् ॥ २ ॥

४११ इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।

तमिन्महत्स्वाजिषूतेमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥ ३ ॥

४१२ इन्द्र तुभ्यमिदद्रिवोनुत्त वज्रिन्पौंस्यम्।
यद्ध त्यं मायिनं मृग तप त्यन्मायया वधीरर्चन्नु स्वराज्यम् ॥ ४ ॥

४१३ प्रणसीहि धृष्णुहि न ते वज्रो नि यंसते।
इन्द्र स्कृण्वहि ते शवा तनो वृत्र जया अपोऽर्चन्ननु स्वराज्यम् ॥ ॥

४१४ यदुदीरत आजयो धृष्णवे धीयते धनम्।
युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्माइन्द्र वसो दधः ॥ ६ ॥

४१५ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥ ७ ॥

४१६ उपो षु शृणुही गिरो मघवन्मातथा इव।
कदा नः सूनृतावतः कर इदर्थयास इत्योजा न्विन्द्र ते हरी ॥ ८ ॥

४१७ चन्द्रमा अप्स्वाऽन्तरा सुपर्णो धावते दिवि।
न वो हिरण्यनेमयः पत्र विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥ ९ ॥

४१८ प्रति प्रियतमꣳरथं वृषणं वसुवाहनम्।
स्तोता वामश्विनावृषि स्तोमेभिर्भूषति मति माध्वी मम श्रुतꣳहवम् ॥ १० ॥

इति तृतीया दशतिः ॥३॥ सप्तमः खण्डः ॥७॥ [ऋ १३ । ब ऋा ७५ । शु ॥]

[४]

(१-८) १ ७ वसुश्रुत आत्रेयः। २ ४ विमद ऐन्द्रः (ऋ प्राजापत्यो वा वसुकृद्वासुक्रः)। ३ सत्यश्रवा आत्रेयः। ५, ६ गोतमो राहूगणः। ८ भरद्वाजो बार्हस्पत्यः। (ऋ कुथुमश्चबार्हिषः पौलुषिर्वा) ॥ अतिः १ जगती। ४ त्रिष्टुप्। ५, ६ द्विपदा। ७ पंक्तिः। ८ बृहती ॥

४१९ आ ते अग्न इधीमहि द्युमन्तं देवाजरम्।
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषꣳ स्तोतृभ्य आ भर ॥ १ ॥

४२० आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे।
शिरं पावकशोचिषं वि यो मदे यज्ञेषु रोदसी विश्वतस्पृधि ॥ २ ॥

४२१ महे नो अद्य बोधयोषो रायो दिवित्मती।
यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ ३ ॥

४२२ भद्रं नो अपि वातय मनो दक्षमुत क्रतुम्।
अधा ते सख्ये अन्धसा वि यो मदे रणा गावो न यवसे विवक्षसे ॥ ४ ॥

४२३ कृत्वा महाँ अनुष्वधं भीम आ वावृते शवः।
श्रिय ऋष्व उपाकयोः शिप्री हरिव दृंह्य तस्तयोषन्नमायसम् ॥ ५ ॥

४२४ स घा त वृषणं रथमधि तिष्ठाति गाविषम्।
यः पात्रं हारियोजनं पूर्णमिन्द्राभिषेकनसि योजा न्विन्द्र ते हरी ॥ ६ ॥

४२५ अक्षन्नमीमदन्त ह्यवप्रिया अधूषत।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योगेयोगे तुतुर्वयि ॥ ७ ॥

४२६ न तमंहो न दुरितं देवासो अह मर्त्यम्।
सजोषसो यमर्यमा मित्रो नयति वरुणो अति द्विषः ॥ ८ ॥

इति चतुर्थी दशतिः ॥ ४ ॥ सप्तमः खण्डः ॥ ८ ॥ [स्व ७ । ड० ३ । ऋ० १७ । जे ॥]
इति पंचतय ॥

[५]

(१) मरुत ऋसदस्यू। (ऋ १ १–५ १ अत्रेयो धिष्ण्या देवताः। २ ३ त्रसदस्युरिन्द्रश्च, ऋसदस्युः पौरुकुत्सः) ६ वसिष्ठो मैत्रावरुणिः; ८ वामदेवो गौतमः ॥ पवमानः सौमः, ७ मरुतः; ८ अग्निः ९ वाजिनः ॥
द्विपदा विराड; ८ पदपंक्तिः ९ पुरउष्णिक्; २ ६ विपदा अनुष्टुप्पिपीलिकामध्या ॥

४२७ परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥ १ ॥

४२८ पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः। द्विषस्तरध्या ऋणया न ईरसे ॥ २ ॥

४२९ पवस्व सोम महाँस्समुद्रः पिता देवानां विश्वाभि धाम ॥ ३ ॥

४३० पवस्व सोम मदे दभ्राभ्रो न निर्तो वाजी धनाय ॥ ४ ॥

४३१ इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय ॥ ५ ॥

४३२ मनु हि त्वा सुतं सोम मन्दन्तसि मदे समर्यराज्ये। वाजाँ अभि पवमान प्र गाहसे ॥ ६ ॥

४३३ क इ ष्यक्ता नरः सनीळा रुद्रस्य मर्या अधा स्वश्वाः ॥ ७ ॥

४३४ अग्ने तमद्याश्व न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम्। ऋध्यामा त ओहैः ॥ ८ ॥

४३५ मार्षिर्मर्या आ वाजे वाजिनो अग्ने देवस्य सवितुः सवम। स्वर्गाँ अर्वन्तो जयत ॥ ९ ॥

४३६ पवस्व सोम द्युम्नी सुधारो महाँ अर्षीणामनुपूर्व्यः ॥ १० ॥

इति पञ्चमी दशतिः ॥ ५ ॥ इति नवमः खण्डः ॥ ॥ [स्व ८ । ड २ । ऋ १५ । ड ॥]
इति पंचमप्रपाठकस्य प्रथमोऽर्धः ॥ १ ॥

[६]

(१-१) प्रसदस्युः ७ सैवर्त आंगिरसः ॥ इन्द्रः। ६ विश्वेदेवाः। ७ उषाः ॥

द्विपदा विराट् ॥

४३७ विश्वतोदावन्विश्वतो न आ भर यं त्वा शविष्ठमीमहे ॥ १ ॥

४३८ एष ब्रह्मा य ऋत्वियइन्द्रो नाम श्रुतो गृणे ॥ २ ॥

४३९ ब्रह्माण इन्द्रं महयन्तो अर्केरवर्धयन्नहये हन्तवा उ ॥ ३ ॥

४४० अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति धीदितः ॥ ४ ॥

४४१ श पद मघर रयीषिणो न काममवतो हिनोति न स्पृशद्रयिम् ॥ ५ ॥

४४२ सदा गावः शुचयो विश्वधायसः सदा देवा अरेपसः ॥ ६ ॥

४४३ आ याहि वनसा सह गावः सचन्त वर्तनिं यदूधभिः ॥ ७ ॥

४४४ उप ब्रह्मे मघुमति श्रियन्तः पुष्येम रयिं धीमहे त इन्द्र ॥ ८ ॥

४४५ अर्धमस्यर्के मघतः स्वर्का आ स्तोभति श्रुतो धुवा स इन्द्रः ॥ ९ ॥

४४६ प्र व इन्द्राय बृहदर्चत मरुतो विश्वसाय मान्यं गायत यं जुजोषते ॥ १० ॥

इति षष्ठी दशतिः ॥ ६ ॥ दशमः खण्डः ॥ १० ॥ [ऋ ७ । ३० ९ । मं० ४२ । ह्रा० ॥]

[७]

(१-१०) १ पृषध्रः काण्वः। २ १, २ बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्च क्रमेण गोपायना कौपायना वा। ५ सैवर्तो आंगिरसः। ६ भुवन आप्त्यः। साधनो वा भौवनः। ७ कवष ऐलूषः। ८ सप्तगुर्वाङ्गिरसः। ९ जमदग्निः। १ वसिष्ठो मैत्रावरुणिः ॥ अग्निः। ५ उषाः। ६, ७, ९ विश्वेदेवाः। ३ ४ १ इन्द्रः ॥ द्विपदा विराट्। १ एकपदा ॥

४४७ अचेत्यग्निरुक्थ्यो३ वयाऽ३ सुमद्रथः ॥ १ ॥

४४८ अग्ने स्व नो अमतम उत त्राता शिवो भुवो वरूथ्यः ॥ २ ॥

४४९ भगो न चित्रो अग्निर्मेहोना दधाति रत्नम् ॥ ३ ॥

४५० विश्वस्य प्र स्तोम पुरो वा सम्यावे वेह नूनम् ॥ ४ ॥

४५१ उषा अप स्वसुरुमः सं वर्तयति वर्तनिरं सुजातता ॥ ५ ॥

४५२ इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ॥ ६ ॥

४५३ वि श्रुतयो यथा पथा इन्द्र स्वधाभु रातयः ॥ ७ ॥

४५४ अया वामं देवहितरं सनेम मदेम शतहिमाः सुवीराः ॥ ८ ॥

४५५ ऊर्जो मित्रो वरुणः पिन्वतेडाः पीवरीर्गिरः शृणुहीं न इन्द्र ॥ ९ ॥

४५६ इन्द्रो विश्वस्य राजति ॥ १० ॥

इति सप्तमी दशतिः ॥ ७ ॥ एकादशः खण्डः ॥ ११ ॥ [स्व० ५ । द० ७ । घा० ७१ । अ ॥]

[८]

(१–१०) १, १० गृत्समदः शौनकः। २ गौरिवीतिः शाक्त्यः। ३, ५, ९, परुच्छेपो दैवोदासिः। ४ रेभः काश्यपः। ६ पवमानस्याङ्गिरसः; ७ अनानतः पारुच्छेपिः; ८ नहुलः ॥ १,३,४,७,१० इन्द्रः; २ सूर्यः; ५ विश्वेदेवाः; ६ मरुतः; ७ पवमानः सोमः; ८ सविता; ९ अग्निः ॥ १,१० भुरिक् (१० अतिशक्वरी वा); ३,५, ७–९ अनुष्टुप्; २, ४, ६, अतिजगती (अष्टिर्वा) ॥

४५७ त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशम् ।
स ईं ममाद महि कर्म कर्तवे महामुरुं सैनꣳसश्चद्देवो देवꣳसत्य इन्दुः सत्यमिन्द्रम् ॥ १ ॥

४५८ अयꣳ सहस्रमानवो दशाः कवीनां मतिर्ज्योतिर्विधर्मणि ।
ब्रध्नः समीचीरुषसः समैरयदरेपसः सचेतसः स्वसरे मन्युमन्तश्चिता गोः ॥ २ ॥

४५९ एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्ता राजेव सत्पतिः ।
हवामहे त्वा प्रयस्वन्तः सुतेष्वा पुत्रासो न पितरं वाजसातये मꣳहिष्ठं वाजसातये ॥ ३ ॥

४६० तमिन्द्रं जोहवीमि मघवानमुग्रꣳ सत्रा दधानमप्रतिष्कुतꣳ श्रवाꣳसि भूरि ।
मꣳहिष्ठो गीर्भिरा च यज्ञियो ववर्तद्राये नो विश्वा सुपथा कृणोतु वज्री ॥ ४ ॥

४६१ अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु स्यच्छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे ।
यच्छ्राणा विवस्वते नाभा सन्दाय नव्यसे । अध प्र नूनमुप यन्ति धीतयो देवाꣳअच्छा न धीतयः ५

४६२ प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवयामरुत् ।
प्र शर्धाय प्र यज्यवे सुखादये तवसे भन्मविष्ठये धुनिव्रताय शवसे ॥ ६ ॥

४६३ अया रुचा हरिण्या पुनानो विश्वा द्वेषाꣳसि तरति स्युग्वभिः सूरो न स्युग्वभिः ।
धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः । विश्वा यद्रूपा परियास्यृक्वभिः सप्तास्येभिर्ऋक्वभिः ॥ ७ ॥

४६४ अभि त्यं देवꣳसवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभिं प्रियं मतिम् ।
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ॥ ८ ॥

४६५ अग्निꣳहोतार मन्ये दास्वन्तं वसोः सूनुꣳ सहसो जातवेदसꣳ विप्रं न जातवेदसम्।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा। घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः ॥९॥

४६६ तय त्यमूर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम्।
यो देवस्य शवसा प्रारिणा असु रिणन्नपः। भुवो विश्वमभ्यदेवमोजसा विदेदूर्जꣳ शतक्रतुर्विदे द्रियम् १०

[स्व ३ उ ६ धा १ ।८॥]

इति अष्टमी दशतिः ॥८॥ द्वादशः खण्डः ॥१२॥ इत्यैन्द्रं पर्व काण्वं वा समाप्तम् ॥ इति चतुर्थोऽध्यायः ॥४॥

ऐन्द्रकाण्डे।

गायत्र्यः ११५–१३२ (११८)

तत्र १५१ पात्स्व इत्यनुष्टुप्।

बृहत्यः १३३—१३९ (८)

त्रिष्टुभः १४२—१४१ (२९)

तत्र १३८ प्र वो इति त्रिपाद्विराट्।

अनुष्टुभः १४२—१४९ (२८)

जगत्यः १७ —१८ (११)

तत्र १७९ उमे यदिन्द्रे ति महापंक्तिः।

त्रिष्टुभः १८१—१९८ (१८)

तत्र १९८ 'पिबे ति विराट्।

ककुभः १९९—२ ८ (१)

पंक्तयः २ ९—२२६ (१८)

तत्र २२६ नतमि त्युपरिष्टाद्बृहती।

द्विपदाः २२७—२५५ (२९)

[तत्र २२८।२३२।२३७।२३५ अनुष्टुबादयस्तत्रैवोक्ताः।]

जगत्यः २५६—२६६ (११)

तत्र २६६ 'इन्द्रो विश्वस्ये त्येकपदा।

२५२

ऐन्द्रकाण्डस्य मन्त्रसंख्या २५२
आग्नेयकाण्डस्य , ११४
सर्वयोगः ३६६

अथ पावमानं काण्डम्।

अथ पञ्चमोऽध्यायः।

[९]

(१–१) १ अमहीयुराङ्गिरसः। २ मधुच्छन्दा वैश्वामित्रः। ३ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा ४ गिव आत्रेय। ६ कश्यपो मारीचः। ७ जमदग्निर्भार्गवः। ८ इळ पुत्र आगस्त्यः। ९ १ असितः काश्यपो देवलो वा॥

पवमानः सोमः॥ गायत्री॥

४६७ उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे। उग्रꣳशर्म महि श्रवः॥ १॥

४६८ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः॥ २॥

४६९ वृषा पवस्व धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसा॥ ३॥

४७० यस्ते मदो वरेण्यस्तेना पवस्वान्धसा। देवावीरघशꣳसहा॥ ४॥

४७१ तिस्रो वाच उदीरते गावो मिमन्ति धेनवः। हरिरेति कनिक्रदत्॥ ॥

४७२ इन्द्रायेन्वा मरुत्वते पवस्व मधुमत्तमः। अर्कस्य योनिमासदम्॥ ६॥

४७३ असाव्यꣳशुर्मदायाप्सु दक्षो गिरिष्ठाः। ईयेनो न योनिमासदत्॥ ७॥

४७४ पवस्व दक्षसाधनो देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः॥ ८॥

४७५ परि स्वानो गिरिष्ठा पवित्रे सोमा अक्षरत्। मदेषु सर्वधा असि॥ ९॥

४७६ परि प्रिया दिवः कविर्वयाꣳसि नप्त्योर्हितः। स्वानैर्याति कविक्रतुः॥ १०॥

इति नवमी दशतिः॥ ९॥ प्रथमः खण्डः॥ १॥ [ऋ ९। ७ । ३ धा ४२। गा॥]

[१०]

(१–१०) १ (कविर्भार्गवो) ऽमावाश्य आत्रेयः। २ श्रित आत्रेयः। ३ ८ अमहीयुराङ्गिरस ४ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा, ५ ६ कश्यपो मारीचः, ७ मिथुनं काश्यपः। ९ असितः काश्यपो देवलो वा॥

पवमानः सोमः॥ गायत्री॥

४७७ प्र सोमासो मदच्युतः श्रवसे नो मघोनाम्। सुता विदथे अक्रमुः॥ १॥

४७८ प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः। वनानि महिषा इव॥ २॥

४७९ पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने। विश्वा अप द्विषो जहि॥ ३॥

४८० वृषा ह्यसि भानुना द्युमन्तꣳ त्वा हवामहे। पवमान स्वर्दृशम्॥ ४॥

४८१ इन्दुः पविष्ट चेतनः प्रियः कवीनां मतिः। सृजद्वश्वꣳरथीरिव॥ ॥

४८२ असृक्षत प्र वाजिनो गव्या सोमासो अश्वया। शुक्रासो वीरयाशवः॥ ६॥

४८३ पवस्व दय आयवेगिन्द्रं गच्छतु ते मदः । वायुमा रोह धर्मणा ॥ ७ ॥

४८४ पवमानो अजीजनद्दिव्यं सुमतिमृतम् । ज्योतिर्विश्वानरं बृहत् ॥ ८ ॥

४८५ परि स्वानास इन्दवो मदाय बर्हणा गिरा । मघो अर्षन्ति धारया ॥ ९ ॥

४८६ परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः । कारं बिभ्रत्पुरुस्पृहम् ॥ १० ॥

इति दशमी दशतिः ॥ द्वितीयः खण्डः ॥ [स्व० ११ । ड० ३ । ऋ० ७९ । हो० ॥]

इति पञ्चमप्रपाठकस्य द्वितीयोऽर्धः पञ्चमः प्रपाठकश्च समाप्तः ॥ ५ ॥

[१]

अथ षष्ठप्रपाठकस्य प्रथमोऽर्धः ॥ १ ॥

(१) १ ८ ९ जमदग्निर्भार्गवः। २ बृहन्मतिराङ्गिरसः। ३ जमदग्निर्भार्गवो वा। ४ प्रभूवसुरांगिरसः। ५ मेध्यातिथिः काण्वः। ६ ७ सिन्धुद्वीपः काश्यपः। १ उचथ्य आंगिरसः ॥ पवमानः सोमः ॥ गायत्री ॥

४८७ उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् । इन्दुं देवा अयासिषुः ॥ १ ॥

४८८ पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः । शुम्भन्ति विप्रं धीतिभिः ॥ २ ॥

४८९ शाविशस्कलक्ष४ सुतो विश्वा अर्यआभि श्रियः । इन्दुरिन्द्राय धीयते ॥ ३ ॥

४९० असर्जि रथ्यो यथा पवित्रे वम्योः सुतः । कार्ष्मन्वाजी त्यरुषीत् ॥ ४ ॥

४९१ अ यद्गावो न भूर्णयस्तेषा आयासेः अक्रमुः । मन्तः कृण्वानमप त्यचम् ॥ ५ ॥

४९२ अपप्रन्पधसे मृधः कृतुविल्सोम मत्सरः । नुदस्वादेवयुं जनम् ॥ ६ ॥

४९३ अया पवस्व धारया यया सूर्यमरोचयः । हिन्वानो मानुषीरपः ॥ ७ ॥

४९४ स पवस्व य आविथेन्द्रं वृत्राय हन्तवे । वधिर्वारसे महीरपः ॥ ८ ॥

४९५ अया धीती परि स्रव यस्त इन्दो मदेष्यः । अयाहन्नवतीर्नव ॥ ९ ॥

४९६ परि सुष्टुर सनव्रयिं भरद्वाज नो अन्धसा । स्वानो अर्ष पवित्र आ ॥ १० ॥

इति प्रथमा दशतिः ॥ १ ॥ तृतीयः खण्डः ॥ ३ ॥ [स्व० ९ । ड० १ । ऋ० ५१ । तृ० ॥]

[२]

(१ १४) १ मेध्यातिथिः काण्वः। २ ७ भगुर्वारुणिर्जमदग्निर्भार्गवो वा। ३ उचथ्य आङ्गिरसः। ४ अवत्सारः काश्यपः। ५ सिन्धुद्वीपः काश्यपः। ६ १ असितः काश्यपो देवलो वा। ८ ९ कश्यपो मारीचः। ११ कविर्भार्गवः। १२ जमदग्निर्भार्गवः। १३ अयास्य आंगिरसः। १४ जमदग्निर्भार्गवः ॥ पवमान सोमः ॥ गायत्री ॥

४९७ अभि द्युम्नानि वनिन इन्द्रं सचन्ते अक्षिता । पीत्वी सोमस्य वावृधे ॥ १ ॥

४९८ आ ते वत्स मनो यमत्परमाच्चित्सधस्थात् । अग्ने त्वां कामया गिरः ॥ २ ॥

४९९ अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नय । पुनीहीन्द्राय पातवे ॥ ३ ॥

५०० तरत्स मन्दी धावति धारा सुतस्यान्धसः । तरत्स मन्दी धावति ॥ ४ ॥

५०१ आ पवस्व सहस्रिणꣳ रयिꣳ सोम सुवीर्यम्। अस्मे श्रवाꣳसि धारय ॥ ५ ॥
५०२ अनु प्रत्नास आयवः पदं नवीयो अक्रमुः। रुचे जनन्त सूर्यम् ॥ ६ ॥
५०३ अधा सोम द्युमत्तमोभि द्रोणानि रोरुवत्। सीदन्योनौ वनेष्वा ॥ ७ ॥
५०४ वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः। वृषा धर्माणि दधिषे ॥ ८ ॥
५०५ इषे पवस्व धारया मृज्यमानो मनीषिभिः। इन्दो रुचाभि गा इहि ॥ ९ ॥
५०६ मन्द्रया सोम धारया वृषा पवस्व देवयुः। अव्या वारेभिरर्षसि ॥ १० ॥
५०७ अया सोम सुकृत्यया महाꣳसन्नभ्यर्धयाः। मन्दान इद्वृषायसे ॥ ११ ॥
५०८ अयं विचर्षणिर्हितः पवमानः स चेतति। हिन्वान आप्यं बृहत् ॥ १२ ॥
५०९ प्र न इन्दो महे तु न ऊर्मिं न बिभ्रदर्षसि। अभि देवाꣳ अयास्यः ॥ १३ ॥
५१० अपघ्नन्पवते मृधोप सोमो अराव्णः। गच्छन्निन्द्रस्य निष्कृतम् ॥ १४ ॥

इति द्वितीया दशतिः ॥ २ ॥ चतुर्थः खण्डः ॥ ४ ॥ [स्व० १५ । ऊ० २ । धा० ५७ । ऋ० ४]

इति गायत्रम् ॥

[३]

(१-११) सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः; २ कश्यपो मारीचः, ३ गोतमो राहूगणः; ४ अत्रिर्भौमः; ५ विश्वामित्रो गाथिनः; ६ जमदग्निर्भार्गवः; ७ वसिष्ठो मैत्रावरुणिः) पवमानः सोमः ॥ बृहती ॥

५११ पुनानः सोम धारयापो वसानो अर्षसि। आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः ॥१॥
५१२ परीतो षिञ्चता सुतꣳ सोमो य उत्तमꣳ हविः। दधन्वाꣳ यो नर्यो अप्स्वा३न्तरा सुषाव सोममद्रिभिः ॥२॥
५१३ आ सोम स्वानो अद्रिभिस्तिरो वाराण्यव्यया। जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दधिषे ॥३॥
५१४ प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा। अꣳशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥४॥
५१५ सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनाम्। अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥५॥
५१६ तवाहꣳ सोम रारण सख्य इन्दो दिवेदिवे। पुरूणि बभ्रो नि चरन्ति मामव परिधीꣳरति ता३ इहि ॥६॥
५१७ मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि। रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥ ७ ॥
५१८ अभि सोमास आयवः पवन्ते मदꣳ मदम्। समुद्रस्याधि विष्टपि मनीषिणो मत्सरासो मदच्युतः ॥८॥
५१९ पुनानः सोम जागृविरव्या वारैः परि प्रियः। त्वं विप्रो अभवोऽङ्गिरस्तम मध्वा यज्ञं मिमिक्ष णः ॥९॥
५२० इन्द्राय पवते मदः सोमो मरुत्वते सुतः। सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः ॥ १० ॥
५२१ पवस्व वाजसातमोभि विश्वानि वार्या। त्वꣳ समुद्रः प्रथमे विधर्मन देवेभ्यः सोम मत्सरः ॥११॥

*

२८ पवमाना असृक्षत पवित्रमति धारया । मरुत्वन्तो मत्सरा इन्द्रियो हवा मेधामभि प्रयांसि च ॥१२॥

इति तृतीयः खण्डः ॥ ३ ॥ पञ्चमः खण्डः ॥ ५ ॥ इति बृहत्याः ॥ सर्व १९ । ४ । ३ । धा ९१ । ४ ।

[४]

(१) १ ९ उशना काव्यः २ वृषगणो वासिष्ठः ३ ७ पराशरः शाक्त्यः ४ ६ वसिष्ठो मैत्रावरुणिः ५ ८ प्रस्कण्वः काण्वः ॥ पवमानं सोमं ॥ त्रिष्टुभ ॥

३ प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
अश्वं न त्वा वाजिनं मजयन्तोऽच्छा बर्ही रशनाभिनयन्ति ॥ १ ॥

४ प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावक पदा वराहो अभ्येति रेभन् ॥ २ ॥

५ सिन्धो वाज इवाजिन प्र वक्ष्यग्नेर्न धीत प्रभृणो मनीषाम् ।
ग्राव्णो यन्ति गोपतिं पृच्छमानाः सोम अस्ति मतयो वावशानाः ॥ ३ ॥

अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
सुतः पवित्र परि रेभन् मित्रेव सद्म पशुमत्ति होता ॥ ४ ॥

६ सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनितान्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ ५ ॥

७ अभि त्रिपृष्ठ वृषणं वयोधामग्नेरिणमवावशन्त वाणीः ।
धना वसानो वरुणो न सिन्धुर्वि रत्नधा दयते वार्याणि ॥ ६ ॥

८ अक्रान्त्समुद्र प्रथमे विधर्मञ्जनयन् प्रजा भुवनस्य गोपाः ।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वाना अद्रिभिः ॥ ७ ॥

९ कनिक्रन्ति हरिरा सृज्यमानः सीदन्मृगस्य जठरे पुनानः ।
नृभिर्यतः कृणुते निर्णिजं गामतो मति जनयत स्वधाभिः ॥ ८ ॥

१० एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णः परि पवित्रे अक्षाः ।
सहस्रधारः शतधा भिन्दानो दशक्षिपं पवते वाज्यर्षन् ॥ ९ ॥

११ पवस्व सोम मधुमान् ऋतावापो वसानो अधि सानो अव्ये ।
अव द्रोणानि घृतवन्ति रोह मविष्टवो मत्सर इन्द्रपानः ॥ १० ॥

इति चतुर्थी दशतिः ॥ ४ ॥ षष्ठः खण्डः ॥ ६ ॥ [सर्व १८ । ३ । ३ । धा ८० । ६ ॥]

[५]

(१–१२) १ प्रतर्दनो दैवोदासिः २ १ पराशर शाक्त्यः ३ इन्द्रप्रमतिर्वासिष्ठः; ४ वसिष्ठ मैत्रावरुणिः; ५ कर्णश्रुतभौविष्ठः ६ नोधा गौतमः; ७ कण्वो घौरः; ८ म युधाजिष्ठः; कुत्स आङ्गिरसः; ११ कश्यपो मारीचः; १२ अरुणपुत्रः काश्यः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

५३३ प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना।
भद्रान् कृण्वन्निन्द्रहर्वांस्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥ १ ॥

१३४ प्र त धारा मधुमतीरसृग्रन्त्सहस्रं यत्पूता अत्येष्यव्यम्।
पवमान पवसे धाम गोनां जनयन्त्सूर्यमपिन्वो अर्कैः ॥ २ ॥

५३५ प्र गायताभ्यर्चाम देवांस्सोमं हिनोत महते धनाय।
स्वादुः पवतामति वारमव्यमा सीदतु कलशं देव इन्दुः ॥ ३ ॥

५३६ प्र ह्रिण्वानो जनिता गोदस्यो रथो न याजं सनिष्यन्यानीत्।
इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधान ॥ ४ ॥

५३७ तक्षद्यदी मनसो वेनतो वाग् ज्येष्ठस्य धर्मन्नधि सीदन्तीः कवेः।
आदीमायन्वरमा वावशाना सुदक्षं पतिं कलशे गाव इन्दुम ॥ ५ ॥

५३८ साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥ ६ ॥

५३९ अधि यदस्मिन्वाजिनीव शुभः स्पर्धन्ते धियः सूरे न विशः।
अपो वृणानः पवते कवीयान्त्रजं न पशुवर्धनाय मन्म ॥ ७ ॥

१४० इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय।
हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन्वृजनस्य राजा ॥ ८ ॥

१४१ अधा पवा पवस्वैना वसूनि मार्डीक इन्द्रो वरसे न धन्व।
ब्रह्मण्वतस्य वातो न जूतिं परिप्रयाँसि सकर्वे नर्याणि ॥ ९ ॥

४२ महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान्।
अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥ १० ॥

५४३ असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमा मनीषा।
दश स्वसारो अधि सानो अव्ये मृजन्ति वह्निमसवनेष्वच्छ ॥ ११ ॥

५४४ अपाभिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।
नमस्यन्तीरुप च यन्ति सं चाच्छा पितरमृतायन्तमृग्मिम् ॥ १२ ॥

इति पञ्चमी दशतिः ॥ ५ ॥ सप्तमः खण्डः ॥ ७ ॥ [स्व० १९ । ऊ० ३ । मा० ४१ । वा ॥]

इति त्रिपृष्ठभः ॥ इति पञ्चमपाठकस्य प्रथमोऽर्धः ॥ १ ॥

[६]

(१–९) १ अग्नीषुः स्थावाश्विः, २ मधुचो मानवः, ३ ययातिर्नाहुषः, ४ सप्तः सांवरणः, ५, ८ अग्नयीषो भार्गवाः अङ्गिरसो भारद्वाजश्च, ६ ७ रेभसूनू काश्यपौ, ९ प्रजापतिर्वैश्वामित्रो वाच्यो वा ॥ पवमानः सोमः अनुष्टुप्, ७ बृहती ॥

अथ षष्ठपाठकस्य द्वितीयोऽर्धः ॥ १ ॥

५४५ पुरोजितीं वो अन्धसः सुताय मादयित्नवे । अप श्वानमराधसं हता मखं न भृगवः ॥ १ ॥

५४६ मयें पूषा रयिर्भगः सोमः पुनानो अर्षति । पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥ २ ॥

५४७ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः । पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ॥ ३ ॥

५४८ सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः । मित्राः स्वाना अरेपसः स्वाश्यः स्वर्विदः ॥ ४ ॥

५४९ अभी नो वाजसातमꣳरयिमर्ष शतस्पृहम् । इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥ ५ ॥

५५० अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम् । वत्सं न पूर्व आयुनि जातꣳरिहन्ति मातरः ॥ ६ ॥

५५१ आ हर्यताय धृष्णवे धनुष्टन्वन्ति पौंस्यम् । शुक्रा पि यन्त्यसुराय निष्कृतं विपामग्ने महीयुवः ७

५५२ परि त्यꣳहर्यतꣳहरिं बभ्रुं पुनन्ति वारेण । यो देवाञ्चिभ्यादरपरि मदेन सह गच्छति ॥ ८ ॥

५५३ प्र सुश्वानायान्धसो मर्तो न वष्ट तद्वचः । अप श्वानमराधसꣳहता मखं न भृगवः ॥ ९ ॥

इति षष्ठी दशतिः ॥ ६ ॥ अष्टमः खण्डः ॥ ८ ॥ [स्व० १ । ऊ० ५१ । मा० ६१ । म ॥]

इत्यनुष्टुभः (एका बृहती) ॥

[७]

(१–११) १–३ ५ कविर्भार्गवः ४, ६ सिकता निवावरी; ७ रेणुर्वैश्वामित्रः; ८ वेनो भार्गवः; ९ वसुश्रुतिर्वाह्नः; १ वत्सप्रिभोऽम्बरीषः; ११ गृत्समद । शौनकः; १२ पवित्र आङ्गिरसः ॥ पवमानः सोमः ॥ जगती ॥

५५४ अभि प्रियाणि पवते चनोहितो नामानि यज्ञे अधि येषु वर्धते ।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः ॥ १ ॥

५५५ अक्षोदवसो नो धन्वन्निधन्वन प्र स्वानासो बृहद्दिवेषु हरयः ।
वि चिदक्षाना इषयो अरातयोऽर्यो नः सन्तु सनिषन्तु नो धियः ॥ २ ॥

५५६ पवँ प्र सोम मधुमाꣳअभिष्टदविन्द्रस्य शर्भो वपुषो वपुष्टमः ।
अभ्यृतस्य सदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसा च धेनवः ॥ ३ ॥

५५७ प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतꣳसखा सख्युर्न प्र मिनाति सङ्गिरम् ।
मर्य इव युवतिभिः समर्षति सोमः कलशे शतयामना पथा ॥ ५ ॥

५५८ धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुषे नदीष्वा ॥ ५ ॥

५५९ वृषा मतीनां पवते विचक्षणः सोमो अहां प्रतरीतोषसां दिवः ।
प्राणा सिन्धूनां कलशां असिष्यददिन्द्रस्य हार्द्याविशन्मनीषिभिः ॥ ६ ॥

५६० त्रिरस्मै सप्त धेनवो दुदुह्रिरे सत्यामाशिरं परमे व्योमनि ।
चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत ॥ ७ ॥

५६१ इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।
मा ते रसस्य मत्सत द्रुयाविनो द्रविणस्वन्त इह सन्त्विन्दवः ॥ ८ ॥

५६२ असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अमिक्रदत् ।
पुनानो वारमत्येष्यव्ययं दधेनो न योनिं घृतवन्तमासदम् ॥ ९ ॥

५६३ प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः ।
बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥ १० ॥

५६४ अक्षते व्यक्षते समक्षते क्रतुरिहन्ति मध्वाभ्यक्षते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमप्सु गृभ्णते ॥ ११ ॥

५६५ पविश्र ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते श्रृतास इद्वहन्तः सं तदाशत ॥ १२ ॥

इति सप्तमी दशतिः ॥ ७ ॥ नवमः खण्डः ॥ ९ ॥ [ऋ० १५ । ऋ० ११ । सा० १३७ । पे ॥]
इति जगत्यः ॥

[८]

(१–१२) १, ७, ११ अग्निश्चाक्षुषः; २ चक्षुर्मानवः; ३, ४, ९, १० पर्वतनारदौ काण्वौ (३, १० शिखण्डिन्यावप्सरसौ क्राक्षपत्नौ वा); ५ त्रित आप्त्यः; ६ मनुराप्सवः; ८, १२ द्वित आप्त्यः; ॥ पवमानः सोमः ॥ अष्टर्चकम् ॥

५६६ इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः । श्रुष्टे जाता इन्दवः स्वर्विदः ॥ १ ॥

५६७ प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव । द्युमन्तꣳशुष्ममा भर स्वर्विदम् ॥ २ ॥

५६८ सखाय आ नि षीदत पुनानाय प्र गायत । शिशुं न यज्ञैः परि भूषत श्रिये ॥ ३ ॥

५६९ तं यः सखायो मदाय पुनानमभि गायत । शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ॥ ४ ॥

५७० प्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम् । विश्वा परि प्रिया भुवदध द्विता ॥ ५ ॥

५७१ पवस्व देवयीतय इन्दो धाराभिरोजसा । आ कलशं मधुमान्त्सोम नः सदः ॥ ६ ॥

५७२ सोमः पुनान ऊर्मिणाव्यं वारं वि धावति। अग्रे वाचः पवमानः कनिक्रदत् ॥ ७ ॥

५७३ प्र पुनानाय वेधसे सोमाय वच उच्यते। भूतिं न भरा मतिभिर्जुजोषते ॥ ८ ॥

५७४ गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव। शुचिं च वर्णमधि गोषु धारय ॥ ९ ॥

५७५ अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत। गोभिष्टे वर्णमभि वासयामसि ॥ १० ॥

५७६ पवते हर्यतो हरिरति ह्वरांस्यर्षा। अभ्यर्ष स्तोतृभ्यो वीरवद्यशः ॥ ११ ॥

५७७ परि कोशं मधुश्चुतꣳ सोमः पुनानो अर्षति। अभि वाणीरृषीणाꣳ सप्ता नूषत ॥ १२ ॥

इत्यष्टमी दशतिः ॥ ८ ॥ दशमः खण्डः ॥ १० ॥ [स्व० ८। उ० ३। धा० ४६। ठ ॥]

[९]

(१–८) १ गौरवीतिः शाक्त्यः; २ उध्वसद्मा आङ्गिरसः; ३, ८ ऋजिश्वा भारद्वाजः; ४ कृतयशा आंगिरसः; ५ ऋणंचयो राजर्षिः; ६ शक्तिर्वासिष्ठः; ७ ऊहगांगिरसः ॥ पवमानः सोमः ॥ ककुप्, ५ पवमध्या गायत्री ॥

५७८ पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः। महि द्युक्षतमो मदः ॥ १ ॥

५७९ अभि द्युम्न बृहद्यश इषस्पते दिदीहि देव देवयुम्। वि कोशं मध्यमं युव ॥ २ ॥

५८० आ सोता परि षिञ्चताश्वं न स्तोममप्तुरꣳरजस्तुरम्। वनप्रक्षमुदप्रुतम् ॥ ३ ॥

५८१ एतमु त्यं मदच्युतꣳ सहस्रधारं वृषभं दिवोदुहम्। विश्वा वसूनि बिभ्रतम् ॥ ४ ॥

५८२ स सुन्वे यो वसूनां यो रायामानेता य इडानाम्। सोमो यः सुक्षितीनाम् ॥ ५ ॥

५८३ त्यं त्वा३ꣳ देव्य पवमान जनिमानि द्युमत्तमः। अमृतत्वाय घोषयन् ॥ ६ ॥

५८४ एष स्य धारया सुतोऽव्या वारेभिः पवते मदिन्तमः। क्रीडन्नूर्मिरपामिव ॥ ७ ॥

५८५ य उस्रिया अपि या अन्तरश्मनि निर्गा अकृन्तदोजसा।
अभि व्रजं तत्निषे गव्यमाज्यं वर्मीव धृष्णवा रुज। ओ३म् वर्मीव धृष्णवा रुज ॥ ८ ॥

इति नवमी दशतिः ॥ ९ ॥ एकादशः खण्डः ॥ ११ ॥ [स्व० ७। उ० १। धा० ४३। चि ॥] इत्युषिणककुभः ॥

इति पञ्चपाठकस्य द्वितीयोऽर्धः पञ्चपाठकश्च समाप्तः ॥ ६ ॥ इति पञ्चमोऽध्यायः ॥ ५ ॥

इति छन्दोगब्राह्मणस्य ऋक् समाप्ता ॥ इति सौम्यं पावमानं काण्डं पर्व वा समाप्तम् ॥

॥ इति पूर्वार्चिकः (छन्द आर्चिकः) समाप्तः ॥ पावमानकाण्डस्य मन्त्रसंख्या ११९

तत्र गायत्र्यः ४६७—५१० (४४), बृहत्यः ५११—५२२ (१२), त्रिष्टुभः ५२३—
५४४ (२२), अनुष्टुभः५४५—५५३ (९), [तत्र ' आहुर्यत ' इति ५५१ बृहती],
जगत्यः ५५४—५६५ (१२), उष्णिककुभः ५६६—५८५ (२०), ११९

ऐन्द्रकाण्डस्य मन्त्रसंख्या	३५२
आग्नेयकाण्डस्य मन्त्रसंख्या	११४
सर्वयोगः	५८५

अथ आरण्यं काण्डम् ।

अथ षष्ठोऽध्यायः ।

[१]

(१–९) १ बंधुर्वार्हस्पत्यः (भरद्वाजः); २ वसिष्ठो मैत्रावरुणिः; ३,६ वामदेवो गौतमः; ४ शुनःशेप आजीगर्तिः कृत्रिमो देवरातो वैश्वामित्रो वा; ५ कुत्स आंगिरसः (गृत्समदः); ७, ८ लवामहीयुरांगिरसः; ९ आत्मा ॥ इन्द्रः; ४ वरुणः; ५, ७, ८ पवमानः सोमः; ६ विश्वे देवाः; ९ अन्नम् ॥ १ बृहती; २, ४, ५, ९ त्रिष्टुप्; ३, ७–८ गायत्री; ६ एकपाज्जगती ॥

२ ३ १२ ३ ३ २३ १ २ ३ १२ ३ १२ १ २४ ३ १२ ३ १४ २४
५८६ इन्द्र ज्येष्ठं न आ भर ओजिष्ठं पुपुरि श्रवः । यद्दिधृक्षेम बज्रहस्त रोदसी उभे सुशिप्र पप्राः ॥ १ ॥

२ ३ १ २ ३ १२ ३ १२ १४ ३ १ २ ३ १ २ ३ १२
५८७ इन्द्रो राजा जगतश्चर्षणीनामधिक्षमा विश्वरूपं यदस्य ।
१ २ ३ १ ३ १ २ ३ २४ ३ १ २ ३ ३
ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतं चिदर्वाक् ॥ २ ॥

२ ३ १ २ ३ १ २ ३ १ २ ३ २४ ३ २ ३ ४ २२ १ २ ३ १ १ ३ १
५८८ यस्येदमा रजोयुजस्तुजे जने वनस्पत्यः । इन्द्रस्य रन्त्यं बृहत् ॥ ३ ॥

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ४ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ४ ३ १ २ ३ १ २
५८९ उद्वृत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय । अथादित्य व्रते वयं तवानागसो अदितये स्याम ॥

१ २ ३ १ २ २ ३ १ २ ३ १ २ ३ १ २
५९० त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।
१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
तन्नो मित्रो वरुणो मामहन्ता मदितिः सिन्धुः पृथिवी उत द्यौः ॥ ५ ॥

३ १ २४ ३ १ २ ३ १ २
५९१ इमं वृषणं कृणुतेक्मिन्नाम् ॥ ६ ॥

१ ३ १ २ ३ १ २ ३ १ २ ३ १ २४
५९२ स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः । वरिवोवित्परिस्रव ॥ ७ ॥

३ १ २४ ३ १ २ ३ १ २ १ १
५९३ एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् । सिषासन्तो वनामहे ॥ ८ ॥

३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
५९४ अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाम ।
१ ३ १ २ ३ २४ ३ १ २ ३ १२ ३ १ २
यो मा ददाति स इदेवमावदहमन्नमन्नमदन्तमाभि ॥ ९ ॥

इति प्रथमा दशतिः ॥ प्रथमः खण्डः ॥ १ ॥

[२]

(१–७) १ ध्रुवक्षय आङ्गिरसः; २ पवित्र आङ्गिरसः; ३, ४ मधुच्छन्दा वैश्वामित्रः; ५ प्रभो वासिष्ठः; ६ गृत्समदः कौलक्षः; ७ सूर्यपत्नीपुरुमेधावांगिरसौ ॥ इन्द्रः; २ पवमानः सोमः; ५ विश्वे देवाः; ६ वायुः ॥ गायत्री, २ जगती, ५ त्रिष्टुप्, ७ अनुष्टुप् ॥

१ ३ १ २ ३ १२ १ २ ३ १ २ ३ १२
५९५ त्वमेतद्धारयः कृष्णासु रोहिणीषु च । पयस्वतीषु रुशत्पयः ॥ १ ॥

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
५९६ अरुरुचद्वृषसः पृश्निरग्निय उक्षा मिमेति भुवनेषु वाजयुः ।
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमादधुः ॥ २ ॥

५९७ इन्द्र इत्था सचा सम्मिश्ल आ वर्षोयुजा । इन्द्रो वज्री हिरण्ययः ॥ ३ ॥

५९८ इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च । उग्र उग्राभिरूतिभिः ॥ ४ ॥

५९९ प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हवियंत् ।
धातुर्द्युतानात्सवितुश्च विष्णो रथन्तरमा जभारा वसिष्ठः ॥ ५ ॥

६०० निगृत्वान्यायघा गह्वयं शुक्रो अयामि ते । गन्तासि सुन्वतो गृहम् ॥ ६ ॥

६०१ यज्ञायथा अपूर्व्य मघवन्पृत्रहत्याय । तत्पृथिवीमप्रथयस्तद्दृंहन्द्या उतो दिवम् ॥ ७ ॥

इति द्वितीया दशतिः ॥ द्वितीयः खण्डः ॥ २ ॥

[३]

(१–११) १ ५, ७ १ वामदेवो गौतम २,३ गोतमो राहूगणः; ४ मधुच्छन्दा वैश्वामित्रः; ६ गृत्समदः शौनकः ८ भरद्वाजो बार्हस्पत्य; ९ अत्रिर्भौमः; ११ हिरण्यस्तूप आंगिरसः; १२ १३ विश्वामित्रो गाथिनः (१२ ऋक्) ॥ १ प्रजापतिः २ ३ सोम; ४, ५ ८ १३ अग्निः; ६ अपांनपात्; ७ रात्रिः; ९ विश्वेदेवा; १ जिंगोक्थः; ११ इन्द्रः; १२ आत्मा अग्निर्वा ॥ त्रिष्टुप्; १ ७ अनुष्टुप्; २ गायत्री; ४ ९ जगती; १० सङ्कटपक्तिः ॥

६०२ मयि धर्त्रो अथो यशोऽथो यज्ञस्य यत्पयः । परमेष्ठी प्रजापतिर्विधे चामिव दृंहतु ॥ १ ॥

६०३ स ते पयाꣳसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।

आप्यायमानो अमृताय सोम दिवि श्रवाꣳस्युत्तमानि धिष्व ॥ २ ॥

६०४ त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्व गाः ।
त्वमातनोरोदसी अन्तरिक्षं त्व ज्योतिषा वि तमो ववर्थ ॥ ३ ॥

६०५ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारꣳरत्नधातमम् ॥ ४ ॥

६०६ ते मन्वत प्रथमं नाम गोनां त्रिः सप्त परमं नाम जानन् ।
ता जानतीरभ्यनूषत क्षा आविर्भुवच्चरणीगृंधासो गावः ॥ ५ ॥

६०७ समन्या यन्त्युपयन्त्यन्याः समानमूर्व नद्यस्पृणन्ति ।
तमू शुचिꣳ शुचयो दीदिवाꣳसमपाꣳनपातमुप यन्त्याप ॥ ६ ॥

६०८ आ प्रागाद्भद्रा युवतिरकेर्त्सीत्सीमीत्सति । अभूद्भद्रा निवेशनी विश्वस्य जगतो रात्री ॥ ७ ॥

६०९ प्रक्षस्य वृष्णो अरुषस्य नू सहः प्र नो वयो विदथा जातवेदसे ।
वैश्वानराय मतिर्नव्यसे शुचिः सोम इव पवते चारुरग्नये ॥ ८ ॥

६१० यिꣳधे देवा मम शृण्वन्तु यज्ञमुभे रोदसी अपां नपाच्च मन्म ।
मा यो वयाꣳसि परिवृक्षाणि घोरꣳ सुक्षेत्रियो मन्तमा मदेम ॥ ९ ॥

६११ यशो मा द्यावापृथिवी यशो मेन्द्रबृहस्पती। यशो भगस्य विन्दतु यशो मा प्रतिमुच्यताम्।
यशसाऽहमस्यः सन्त्सदोऽन्न प्रपविता स्याम्। ॥ १० ॥

६१२ इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ॥ ११ ॥

६१३ अग्निनस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन्।
त्रिधातुरर्को रजसो विमानोऽजस्रं ज्योतिर्हविरस्मि सर्वम् ॥ १२ ॥

६१४ पाञ्चजन्या मरुतो यस्य होतेषिरो अध्वरश्चेतति क्रतुः।
पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपभाद्यज्ञियः ॥ १३ ॥

इति तृतीया दशतिः ॥ तृतीयः खण्डः ॥ ३ ॥

[४]

(१-१२) वामदेवो गौतमः। ३-७ गायत्रयः ॥ १-२ अग्निः। ३ पुरुषः। द्यावापृथिवी। ९-११ इन्द्रः। १२ गायः ॥ अनुष्टुप्। १-२ पंक्तिः। ८, ११ १२ त्रिष्टुप् ॥

६१५ आजस्रया समिधान दीदिवो जिह्वा चरत्यन्तरासनि।
स त्वं नो अग्ने पयसा पशुविद्रयिं वर्चो दधोऽदाः ॥ १ ॥

६१६ वसन्त इन्नु रंन्त्यो ग्रीष्म इन्नु रंन्त्यः। वर्षाण्यनु शरदो हेमन्तः शिशिर इन्नु रंन्त्यः ॥ २ ॥

६१७ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं सर्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ ३ ॥

६१८ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः। तथा विष्वङ् व्यक्रामद्वशनानशने अभि ॥ ४ ॥

६१९ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्। पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ५ ॥

६२० तावानस्य महिमा ततो ज्यायाꣳश्च पूरुषः। उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ ६ ॥

६२१ ततो विराडजायत विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ७ ॥

६२२ मन्ये वां द्यावापृथिवी सुभोजसौ ये अप्रथेथामभितमभि योजनम्।
द्यावापृथिवी भवतꣳ रयोने ते नो मुञ्चतमꣳहसः ॥ ८ ॥

६२३ हरी त इन्द्र शमश्रुण्युतो ते हरितौ हरी। तं त्वा स्तुवन्ति कवयः पुरुधासो वनर्गवः ॥ ९ ॥

६२४ यच्चर्चो हिरण्यस्य यजा वर्चो गवामुत। सत्यस्य ब्रह्मणो वर्चस्तेन मा सꣳसृजामसि ॥ १० ॥

६२५ सहस्रन्न इन्द्र दद्धयोज हरी सूनृतावतः परिष्कृतान्।
कर्तुं न भृण्वꣳस्थविरं च वाजं युत्रेषु शत्रूꣳसहना कृधी नः ॥ ११ ॥

६२६ सहस्पभाः सहयस्ता उदेत विश्वा रूपाणि विभ्रतौद्वयूधी ।
उषः पृथुपस्थं यो अस्तु लोक इमा आपः सुप्रपाणा इह स्त ॥ १२ ॥

इति चतुर्थी दशतिः ॥ चतुर्थः खण्डः ॥ ४ ॥

[५]

(१–१४) १ अत वैखानसाः; २ विश्वामित्र औदलः; ३ कुत्स आङ्गिरसः; ४ ६ सावरोजी; ७–१४ प्रस्कण्व काण्वः ॥ १ सूर्यः; २ अग्निः पवमानः; ४–६ आत्मा या ॥ गायत्री २ जगती; ३ त्रिष्टुप् ॥

६२७ अग्न आयूंरषि पवस आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥ १ ॥

६२८ विश्वाद् बृहस्पतिष्पतु सोम्य मध्वायुर्दधद्यज्ञपतावहिंसनम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ॥ २ ॥

६२९ चित्र देवानामुदगादनीक चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्ष सूर्य आत्मा जगतस्तस्थुषश्च ॥ ३ ॥

६३० आय गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ ४ ॥

६३१ अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो दिवम् ॥ ५ ॥

६३२ विरशाञ्चाम वि राजति वाक्पतङ्गाय धीयते । प्रति यत्स्रोरह द्युभिः ॥ ६ ॥

६३३ अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः । सूराय विश्वचक्षसे ॥ ७ ॥

६३४ अदृश्रन्नस्य केतवो वि रश्मयो जनाꣳअनु । भ्राजन्तो अग्नयो यथा ॥ ८ ॥

६३५ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रोचनम् ॥ ९ ॥

६३६ प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान् । प्रत्यङ् विश्वं स्वर्दृशे ॥ १० ॥

६३७ येना पावक चक्षसा भुरण्यन्तं जनाꣳअनु । त्वं वरुण पश्यसि ॥ ११ ॥

६३८ उदगादयमादित्यो विश्वेन सहसा सह । द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम् ॥ १२ ॥

६३९ अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः । ताभिर्याति स्वयुक्तिभिः ॥ १३ ॥

६४० सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं विचक्षण ॥ १४ ॥

इति पञ्चमी दशतिः ॥ पञ्चमः खण्डः ॥ ५ ॥

इति षष्ठोऽध्यायः ॥ ६ ॥ इति सामवेद-संहितायामारण्यं काण्डं पर्व वा समाप्तम् ॥

अथ महानाम्न्यार्चिकः ।

(१–१) प्रजापतिः ॥ इन्द्रसैलाक्ष्यात्मा ॥ त्रिक = [१ प्रथमं द्विपदा+ (२) सप्तस्वरः शाक्वराः पादाः+ (३) सप्त उपसर्गाः+ (३) उभयं (शाक्वरोपसर्गाः) + (१) सप्त शाक्वराक्षराः पादाः + (६) उपसर्गाः ।]

६४१ विद्मा मघवन् विद्मा गातुमनुशꣳसिषो दिशः । शिक्षा शचीनां पत पूर्वीणां पुरूवसो ॥ १ ॥

६४२ आगिष्टमभिष्टिभिः स्वाऽऽर्क्षꣳशुः । प्रचेतन प्रचेतयेन्द्र द्युम्नाय नः धिये ॥ २ ॥

६४३ एधा हि शक्रो रायो वाजाय वज्रिवः ।
शविष्ठ वज्रिन्मृळसे मरꣳहिष्ठ वज्रिन्नृभुक्षसः । आ याहि पिय मत्स्व ॥ ३ ॥

६४४ विद्मा रायः सुवीर्यस्य पतिवेशꣳशतानु । मरꣳहिष्ठ वज्रिन्नृजीषी यः शविष्ठः शरणानाम् ४

६४५ यो मरꣳहिष्ठो मघोनामꣳ शुभ शोचिः । क्षितिर्यो अभि नो नयद्वो विदे तमु स्तुहि ॥ ५ ॥

६४६ ईशे हि शक्रस्तूतये हवामहे जेतारमपराजितम् । स नः स्वर्षदति द्विषः क्रतुश्छन्द ऋतꣳ बृहत् ॥६॥

६४७ इन्द्र धनस्य सातये हवामहे जेतारमपराजितम् । स नः स्वर्षदति द्विषः स नः स्वर्षदति द्विषः ॥७॥

६४८ पूर्वीष्य यशे अद्रिवोऽशुमंवाय । सुम्न आ धेहि नो वसो पूर्तिः शविष्ठ शस्यते ।
वशी हि शक्रो नूनं तक्षव्यꣳसन्यसे ॥ ८ ॥

६४९ प्रभो जनस्य वृत्रहन् त्समर्येषु प्रवावहै । शूरो यो गोषु गच्छति सखा सुशेवो अद्वयुः ॥ ९ ॥

अथ पञ्च पुरीषपदानि ॥

६५० एवाह्येऽऽऽऽऽऽ व । एवा ह्यसे । एवाहीन्द्र । एवा हि पूषन् । एवा हि देवाः ॐ एवाहि देवाः ॥१०॥

इति पञ्च पुरीषपदानि ॥

इति महानाम्न्यार्चिकः समाप्तः ॥

पूर्वार्चिकस्य मन्त्रसङ्ख्या

१ आग्नेयस्य काण्डस्य	(१—११४)	११४
२ ऐन्द्रस्य काण्डस्य	(११५—३९९)	३५२
३ पावमानस्य काण्डस्य	(४२०—५८५)	१११
४ आरण्यकस्य काण्डस्य	(५८६—६४)	५५
५ महानाम्न्यार्चिकस्य	(६४१—६५)	१
	सर्वयोगः	६५०

सामवेदसंहिता।

(उत्तरसंहिता) उत्तरार्चिकः।

अथ प्रथमोऽध्यायः।

अथ प्रथमप्रपाठके प्रथमाऽर्धः ॥ १ ॥

[१]

(१–२३) १ असितः काश्यपो देवलो वा। कश्यपः मारीचः ३ गार्त्स वैश्वामित्रः; ४ २१ भरद्वाजो बार्हस्पत्यः ५ ७ विश्वामित्रो गाथिनः; ६ जमदग्निर्भार्गवः; ८ इविर्भिहिः काण्वः; ९ सप्तर्षय (१ जमदग्निर्भार्गवो बार्हस्पत्यः, २ कश्यपो मारीचः, ३ गोतमो राहूगणः, ४ अत्रिर्भौमः, ५ विश्वामित्रो गाथिनः, ६ जमदग्निर्भार्गवः, ७ वसिष्ठो मैत्रावरुणिः) १ उशना काव्यः; ११ वसिष्ठो मैत्रावरुणिः; १२ वामदेवो गौतमः; १३ नोधा गौतमः; १४ कलिः प्रागाथः; १५ मधुच्छन्दा वैश्वामित्रः। १६ गौरवीतिः शाक्त्यः १७ अग्निर्भारद्वाजः; १८ अग्नीषु ध्रुवक्षत्रियः १९ कविर्भार्गवः; २ पांसुर्वार्हस्पत्यः (गृणपाणिः) २२ साभरिः काण्वः; २३ मूर्धा आंगिरसः ॥ १–३, ८–१०, १५–१९ पवमानः सोमः; ४ ७ २१ अग्निः; ५ सिताबरमौ; ७ इन्द्राग्नी; ९; ११–१४,२२–२३ इन्द्रः ॥ ६–८, १२ (१–१), १५ १८ (१–३) २१ गायत्री; ९ ११ १३ १४ २ प्रगाथाः = (विषमा बृहती, समा सतो बृहती) १ त्रिष्टुप्; १२ (३) प्रावनिचृत्, १६ २२ काकुभः प्रागाथः = (विषमा ककुप् समा सतो बृहती) १७ अष्टिक् १८ (१) अनुष्टुप्; १९ जगती; २३ (१) ककुप (२) उष्णिक्, (३) पुर उष्णिक् ॥

६११ उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाँ इयक्षते ॥ १ ॥

६१२ अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः। देवं देवाय देवयु ॥ २ ॥

६१३ स नः पवस्व शं गवे शं जनाय शमर्वते। शं राजन्नोषधीभ्यः ॥ ३ ॥ ॥१ (स्त्री)॥

६१४ वृषेन्दुरत्या रुचा परिष्टोभन्त्या कृपा। सोमाः शुक्रा गवाशिरः ॥ १ ॥

६१५ हिन्वानो हेतृभिर्हित आ वाजं वाज्यक्रमीत्। सीदन्तो वनुषो यथा ॥ २ ॥

६१६ अधुक्षत्सोम एवस्तये सजन्मानो दिवा कवे। पवस्व सूर्यो दृशे ॥ ३ ॥ ॥२ (त्रि)॥

६१७ पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत। अर्वन्तो न श्रवस्यवः ॥ १ ॥

६१८ अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये। अवावशन्त धीतयः ॥ २ ॥

६१९ अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः। अग्मन्नृतस्य योनिमा ॥ ३ ॥ ॥३ (स्त्री)॥

॥ इति प्रथमः खण्डः ॥ १ ॥

६२० भद्रा आ धाहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि ॥ १ ॥

६२१ त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य ॥ २ ॥

६६५ स नः पृथु श्रवाय्यमच्छा देव विवाससि । बृहद्वदेम सुवीर्यम् ॥ ३ ॥ ॥ ४ ॥

६६३ आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजाꣳसि सुक्रतू ॥ १ ॥

६६४ उरुशꣳसा नमोवृधा मह्ना दक्षस्य राजथः । द्राघिष्ठाभिः शुचिव्रता ॥ २ ॥

६६५ गृणाना जमदग्निना योनावृतस्य सीदतम् । पातꣳ सोममृतावृधा ॥ ३ ॥ ॥५ (वि)॥

६६६ आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् । एदं बर्हिः सदो मम ॥ १ ॥

६६७ आ त्वा ब्रह्मयुजो हरी वहतामिन्द्र केशिना । उप ब्रह्माणि नः शृणु ॥ २ ॥

६६८ ब्रह्माणस्त्वा युजा वयꣳ सोमपामिन्द्र सोमिनः । सुतावन्तो हवामहे ॥ ३ ॥ ॥६(फौ)॥

६६९ इन्द्राग्नी आ गतꣳ सुत गीर्भिर्नमो वरेण्यम् । अस्य पात धियेषिता ॥ १ ॥

६७० इन्द्राग्नी अपसस्परि स्वसृभिर्जामिभिर्यतः । अया पातमिमꣳ सुतम् ॥ २ ॥

६७१ इन्द्रमग्निं कविच्छवा उपस्तुते जूत्या वृणे । ता सोमस्येह तृम्पताम् ॥ ३ ॥ ॥७(ता)॥

॥ इति द्वितीयः खण्डः ॥ २ ॥

६७२ उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे । उग्रꣳ शर्म महि श्रवः ॥ १ ॥

६७३ स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः । वरिवोविद्परि स्रव ॥ २ ॥

६७४ एना विश्वान्यर्य आ द्युमानि मानुषाणाम् । सिषासन्तो वनामहे ॥ ३ ॥ ॥८(ठी)॥

६७५ पुनानः सोम धारयापो वसानो अर्षसि । आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः॥१॥

६७६ दुहान ऊधर्दिव्यं मधु प्रिय प्रत्नꣳ सधस्थमासदत् ।
आपृच्छ्यं धरुणं वाज्यर्षसि नृभिर्धौतो विचक्षणः ॥ २ ॥ ॥९(लु)॥

६७७ प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ॥ १ ॥

६७८ स्वायुधः पवते देव इन्दुरशस्तिहा वृजना रक्षमाणः ।
पिता देवानां जनिता सुदक्षो विष्णुर्नो दिवो धरुणः पृथिव्याः ॥ २ ॥

६७९ ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन ।
स चिद्विवेद निहितं यदासामपीच्यꣳ३ गुह्यं नाम गोनाम् ॥ ३ ॥ ॥१०(लु)॥

॥ इति तृतीयः खण्डः ॥ ३ ॥

६८० अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥१॥

६८१ न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ २ ॥११(यी)॥

६८२ कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ १ ॥

६८३ कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु ॥ २ ॥

६८४ अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतये ॥ ३ ॥१२(न)॥

६८५ त्वं वलस्य गोमतोऽपावरद्रिवो बिलम् । त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥ १ ॥

६८६ शुक्रꣳ ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ॥ २ ॥१३(ही)॥

६८७ तरोभिर्वो विदद्गातुमिन्द्र सबाध ऊतये । बृहद्गायन्तः सुतसोमे अध्वरे भरे न कारिणम् ॥१॥

६८८ न यं दुध्रा वरन्ते न स्थिरा मुरो मदेषु शिप्रमन्धसः ।
य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम् ॥ २ ॥ १४(जु)॥

॥ इति चतुर्थः खण्डः ॥४॥

६८९ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥ १ ॥

६९० रक्षोहा विश्वचर्षणिरभि योनिमयोहते । द्रोणे सधस्थमासदत् ॥ २ ॥

६९१ वरिवोधातमो भुवो मꣳहिष्ठो वृत्रहन्तमः । पिप्रो राधो मघोनाम् ॥ ३ ॥ ॥१५॥ (पौ)

६९२ पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः । महि द्युक्षतमो मदः ॥ १ ॥

६९३ यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीत्वा स्वर्विदः ।
स सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः ॥ २ ॥ ॥१६ (प)॥

६९४ इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः । श्रुष्टे आतास इन्दवः स्वर्विदः ॥ १ ॥

६९५ अयं भराय सानसिरिन्द्राय पवते सुतः । सोमो अभ्यर्ष चेतति यथा विदे ॥ २ ॥

६९६ अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णाति सानसिम् । वज्रं च वृषणं भरत्समज्जुजित् ॥३॥ ॥१७(कि)॥

६९७ पुरेतिश्चिद्वो अन्धसः सताय मादयिष्णवे । अप ध्वानस्य दर्हिषि सखायो दीर्घजिह्वयम् ॥ १ ॥

६९८ यो धारया पावकया परिप्रस्यन्दते सुतः । इन्दुरश्वो न कृत्व्यः ॥ २ ॥

६९९ तं दुरोषमभी नरः सामं विश्वाच्या धिया । यज्ञैश्च सन्त्वद्रयः ॥ ३ ॥ ॥१८ (थि)॥

७०० अधि श्रियाणि पत्यते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
॥ सूयस्य चक्षुरुहणधि रोचिष्यन्नग्नरुहद्भिश्चक्षणः ॥ १ ॥

७०१ ऋतस्य जिह्वा पवते मध्वि प्रिय वक्ता पतिर्धियो अस्या अदाभ्यः ।
दधाति पुत्रः पित्रोरपीच्यं१नाम तृतीयमधि रोचने दिवः ॥ २ ॥

७०२ अव द्यतानः कलशाँ२अचिक्रदन्नभियेमाणः कोश आ हिरण्यये ।
अभी ऋतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजसि ॥ ३ ॥ ॥१९ (वि)॥

इति पञ्चमः खण्डः ॥ ५ ॥

७०३ यद्वाग्वदन्त्यविचेतनानि राष्ट्री देवानां निषसादमन्द्रा ।
प्र मित्रे वरुणे भगे मधोनो वीहि शंस हविषा देवयन्तम् ॥ १ ॥

७०४ ऊर्जो नपात१मव हिनायमस्मयुर्दाशेम हव्यदातये ।
भुवद्वाजेष्वविता सुवक्षा उत त्राता तनूनाम् ॥ २ ॥ ॥२०(यु)॥

७०५ पक्षू पु प्रयाणि तेऽग्न इत्थेतरा गिरः । एभिर्वर्धास इन्दुभिः ॥ १ ॥

७०६ यत्र यत्र च ते मनो दक्षं दधस उत्तरम् । तत्र योनिं कृणवसे ॥ २ ॥

७०७ न हि ते पूर्तमक्षिपद्भुवन्नेमानां पते । अथा दुवो वनवसे ॥ ३ ॥ ॥२१(त्री)॥

७०८ वयमु त्वामपूर्व्य स्थूर न कञ्चिदभ्रस्तोऽवस्यवः । वाजे चित्रं हवामहे ॥ १ ॥

७०९ उप त्वा कर्मन्नूतये स नो युवोग्रश्चकाम यो धृषत् ।
त्वामिध्यवितारां वव्रमहे सख्राय इन्द्र सानसिम् ॥ ४ ॥ ॥२२(च)॥

७१० अधा ह्यिन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे । उदेव यन्त उदभिः ॥ १ ॥

७११ यार्णि त्वा बर्हिषि क्षिपन्ति शूर प्रह्माणि । वायूपभारस्त्र इन्दविन्द्रे विवेविदे ॥ २ ॥

७१२ युञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे वचोयुजा । इन्द्रवाहा स्वर्विदा ॥३॥ ॥२३(वि)॥

इति षष्ठः खण्डः ॥ ६ ॥

इति प्रथमप्रपाठके प्रथमोऽर्धः ॥ १ ॥ इति प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्याय ।

[२]

अथ प्रथमप्रपाठक द्वितीयार्ध ॥ १ ॥

(१–२२) १ श्रुतकक्षः सुकक्षो वा आङ्गिरसः। २ ८, १३–१५ वत्सप्रो मैत्रावरुणिः। ३ मधातिथिः। ४ मेधातिथिर्ऋषिः। ५ इरिम्बिठिः काण्वः। ६ कुसीदी काण्वः। ७ विश्वोकः काण्वः। ९ विश्वामित्रो गाथिन। १० वैश्वामित्र। ११ सुप्रभौप आजीगर्तिः। १२ नारदः काण्वः। १४ अवत्सारः काश्यपः। १७ (१) आजीगर्तिः शुनःशेप ऋत्रिमो वैश्वामित्र १७ (२ ३) मेध्यातिथिः काण्वः। १८ (१ ३) काश्यपो दवलो वा। १९ (२) अग्निर्वसुरोङ्गिरसः १९ त्रित आप्त्यः। २ सप्तगवः। (१ अत्र वार्हदश्व्याः, २ कश्यपो मारीचः ३ गोतमो राहुगणः ४ अत्रिर्भौम ५ विश्वामित्रो गाथिन ६ ऋजिश्वा भारद्वाजः ७ वसिष्ठो मैत्रावरुणिः)। २१ काण्वाश्च आत्रेयाः। २२ (१ २) अग्निराक्षुप। २३ (१ प्रजापतिर्वैश्वामित्रो वाच्यो वा ॥ १—१२ इन्द्रः। १३ अग्निः १४ वयाः। १५ अग्निर्वनी; १६–२३ पवमानः सोमः ॥ १ (२–२)—११; १६ १९ २१; गायत्री १२ २२ (१–३) प्रतिष्ठाक्। १३ १५ २ प्रगाथः= (विषमा बृहती समा सतोबृहती)। १ (१) ३३ (३) अनुष्टुप्।

७१३ पात्मा यो अभ्वस इन्द्रगमि प्र गायत । विश्वासाहꣳशतक्रतुं म꣣हिष्ठं चर्षणीनाम् ॥

७१४ पुरुहूत पुरुष्टुत गाथान्या३꣡ꣳ सनश्रुतम् । इन्द्र इति प्रवीतन ॥ २ ॥

७१५ इन्द्र इज्जो महोनां दाता वाजानां नृतुः । महा꣣ꣳअभिष्वा यमत ॥ ३ ॥

७१६ प्र व इन्द्राय मादनꣳ हर्यश्वाय गायत । सखायः सोमपाव्ने ॥ १

७१७ शर꣣ꣳसेवुक꣣ꣳ सुदानव उत ह्रक्षं यथा नरः । चक्रमा सत्यराधसं ॥ २

७१८ त्यं न इन्द्र वाजयुꣳस्व गव्युꣳ शतक्रतो । त्यꣳहिरण्ययुꣳसो ॥ ३

७१९ वयमु त्वा तदिदर्थो इन्द्र स्यायन्तः सखायः । कण्वा उक्थेभिर्जरन्ते ॥ १

७२० न घेमन्यद्वा पपन वज्रिन्नपसो नविष्ठाः । तवेदु स्तोमैरिन्द्रकेत ॥ २

७२१ इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति । यन्ति प्रमादमतन्द्राः ॥ ३

७२२ इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः । अर्कमर्चन्तु कारवः ॥ १

७२३ यस्मिन्विश्वा अधि श्रियो रणन्ति सप्त सꣳसदः । इन्द्रꣳ सुते हवामहे ॥ २

७२४ त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्यत । तमिन्महयन्तु नो गिरः ॥ ३

॥ इति प्रथमः खण्डः ॥ १ ॥

७२५ अथ त इन्द्र सोमो निपूतो अधि बर्हिषि । एहीमस्य द्रवा पिब ॥ १

७२६ शाचिगो शाचिपूजनायꣳरणाय ते सुतः । आखण्डल प्र हूयसे ॥ २

MFP
331.1 Accn. No. 2966

७२७ यस्ते शृङ्गवृषो नपात्प्रणपात्कुण्डपाय्यः । न्यस्मिन्दध्र आ मनः ॥ ३ ॥ ॥५ (वि)॥

७२८ आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय । महाहस्ती दक्षिणेन ॥ १ ॥

७२९ विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् । तुविमात्रमवोभिः ॥ २ ॥

७३० न हि त्वा शूर देवा न मर्तासो दित्सन्तम् । भीमं न गां वारयन्ते ॥ ३ ॥ ॥६(के)॥

७३१ अभि त्वा वृषभा सुते सुतः सृजामि पीतये । तृम्पा व्यश्नुही मदम् ॥ १ ॥

७३२ मा त्वा मूरा अविष्यवो मोपहस्वान आ दभन् । मा कीं ब्रह्माद्विषे वनः ॥ २ ॥

७३३ इह त्वा गोपरीणसं महे मन्दन्तु राधसे । सरो गौरो यथा पिब ॥ ३ ॥ ॥७(या)॥

७३४ इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम् । अनाभयिरिमा ते ॥ १ ॥

७३५ नृभिर्धौतः सुतो अश्नैरव्या वारैः परिपूतः । अश्वो न निक्तो नदीषु ॥ २ ॥

७३६ तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः । इन्द्र त्वास्मित्सधमादे ॥ ३ ॥ ॥८(र्धा)॥

इति द्वितीयः खण्डः ॥ २ ॥

७३७ इदं ह्यन्वोजसा सुतं राधानां पते । पिबा त्वा३स्य गिर्वणः ॥ १ ॥

७३८ यस्ते अनु स्वधामसत्सुते नि यच्छ तन्वम् । स त्वा ममत्तु सोम्य ॥ २ ॥

७३९ प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः । प्र बाहू शूर राधसा ॥ ३ ॥ ॥९ (पी)॥

७४० आ त्वेता नि षीदतेन्द्रमभि प्र गायत । सखाय स्तोमवाहसः ॥ १ ॥

७४१ पुरूतमं पुरूणामीशानं वार्याणाम् । इन्द्रं सोमे सचा सुते ॥ २ ॥

७४२ स घा नो योग आ भुवत्स राये स पुरन्ध्या । गमद्वाजेभिरा स नः ॥ ३ ॥ ॥१०(टी)॥

७४३ योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये ॥ १ ॥

७४४ अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम् । यं ते पूर्वं पिता हुवे ॥ २ ॥

७४५ आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः । वाजेभिरुप नो हवम् ॥ ३ ॥ ॥११(ला)॥

७४६ इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम् । विदे वृधस्य दक्षस्य महाँहि षः ॥ १ ॥

७४७ स प्रथमे व्योमनि देवानाँ सदने वृधः । सुपारः सुश्रवस्तमः समप्सुजित् ॥ २ ॥

७४८ तमु हुवे वाजसातय इन्द्रं भराय शुष्मिणम् । भवा नः सुप्रे अन्तमः सखा वृधे ॥३॥ ॥१२(धा)॥

॥ इति तृतीयः खण्डः ॥ ३ ॥

७४९ एना वो अग्निं नमसोर्जो नपातमा हुवे । प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥१॥

७१० स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः।
सुब्रह्मा यज्ञः सुशमी वसूनां देवꣳ राधो जनानाम् ॥ २ ॥ ॥१३ (तृ)॥

७११ प्रत्यु अदर्शयायिन्यू३च्छन्ती दुहिता दिवः। अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरी ॥ १ ॥

७१२ उदुस्रियाः सृजते सर्यः सचा उद्यन्नक्षत्रमर्चिषत्।
तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि ॥ २ ॥ ॥१४(चा)॥

७१३ इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना। अयं वामह्वेऽवसे शचीवसू विशंविशꣳ हि गच्छथः ॥ १ ॥

७१४ युवं चित्रं ददथुर्भोजनं नरा चोदेथां सूनृतावते।
अवस्यवꣳ सनसा नि यच्छतं पिपृतꣳ सोम्यं मधु ॥ २ ॥ ॥१५(चा)॥

॥ इति चतुर्थः खण्डः ॥४॥

७१५ अभ्यर्ष सुष्टुतिं गव्यमाजिं राधो दयुक्षं अङ्गिरः। इन्द्र सूनृतावदुक्थं जनाय सत्यमित्वाषते ॥ १ ॥

७१६ अभ्यर्ष महानां देवानां वीतिमन्धसा। अभि वाजं सप्तिरिव श्रवस्यति विश्वा सनानि जिगाति ॥ २ ॥

७१७ अभ्यर्ष विश्वानि निष्टतिं पुनानो भुवनोपरि। सोमो देवो न सूर्यः ॥ ३ ॥ ॥१६(ति)॥

७१८ एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः। हरिः पवित्रे अर्षति ॥ १ ॥

७१९ एष प्रत्नेन मन्मना देवो देवेभ्यस्परि। कविर्विप्रेण वावृधे ॥ २ ॥

७२० दुहान प्रत्नमित्पयः पवित्र परि षिच्यसे। क्रन्दन्देवाꣳ अजीजनः ॥ ३ ॥ ॥१७(चा)॥

७२१ उप शिक्षापतस्थुषो भियसमा धेहि शत्रवे। पवमान विदा रयिम् ॥ १ ॥

७२२ उपो षु जातमप्तुरम् ॥ २ ॥

७२३ उपास्मै गायता नरः ॥ ३ ॥ ॥१८(सौ)॥

॥ इति पञ्चमः खण्डः ॥५॥

७२४ प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः। वनानि महिषा इव ॥ १ ॥

७२५ अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया। वाजं गोमन्तमक्षरन् ॥ २ ॥

७२६ सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः। सोमा अर्षन्तु विष्णवे ॥ ३ ॥ ॥१९(सि)॥

७२७ प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा।
अꣳशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥ १ ॥

७६८ आ हर्यतो अर्जुनो अत्के अव्यत प्रियः सूनुर्न मर्ज्यः ।
तमीरहिण्वन्त्यपसा यथा रथं नदीष्वा गभस्त्योः ॥ २ ॥२० (ङ)॥

७६९ प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् । सुता विन्दे अक्रमुः ॥ १ ॥

७७० आदीरं हरसो यथा गण विश्वस्यावीवशन्मतिम् । अत्यो न गोभिरज्यते ॥ २ ॥

७७१ आदीरं त्रिसस्य योषणो हरिरं हिण्वन्त्यद्रिभिः । इन्दुमिन्द्राय पीतये ॥ ३ ॥२१(ळी)॥

७७२ भया पवस्व देवयु रेभन्नधिरं पर्येषि विश्वतः । मधोर्धारा असृक्षत ॥ १ ॥

७७३ पवते हर्यतो हरिः ॥ २ ॥

७७४ प्र सुन्वानायान्धसो ॥ ३ ॥२२(ळि)॥

इति षष्ठः खण्डः ॥ ६ ॥

॥ इति प्रथमप्रपाठके द्वितीयोऽर्धः प्रथमप्रपाठकश्च समाप्तः ॥ १ ॥
॥ इति द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः ।

[१]

अथ द्वितीयप्रपाठके प्रथमोऽर्धः ॥ १ ॥

(१ १९) १ वसवाग्निर्भार्गवः; २-५ १९ अग्नीध्युराङ्गिरसः; ६ कश्यपो मारीचः; ७, १ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा; ६-७ मधातिथिः काण्वः; ८ मधुच्छन्दा वैश्वामित्रः; ९ वसिष्ठो मैत्रावरुणिः; ११ वत्सप्रीर्भालन्दनः; १२ शतुर्वार्हदेव्यः; १३ वाल्मीकिर्यज्ञः, प्रस्कण्वः काण्वः; १४ मेधो मातिथिरङ्गिरसः; १६ नहुषो मानवः; १७ (१ २) त्रिशोकः शिवावरी; १७ (३) दृष्टिर्यौधेयो जयो; १८ भुवनक्षीः सुकक्षो वा आङ्गिरसः; १९ जेता माधुच्छन्दसः ॥ १-५ १ -११, १५-१७ पवमानः सोमः; ६ अग्निः; ७ मित्रावरुणौ; ८, १२-१४ १८-१९ इन्द्रः; ९ इन्द्राग्नी ॥ १-१० १५ १८ गायत्री; ११ त्रिष्टुप्; १२-१४ प्रगाथः ८ (विषमा बृहती, समा सतोबृहती) १६ १९ अनुष्टुप्; १७ जगती ॥

७७५ पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः । अभि विश्वानि काव्या ॥ १ ॥

७७६ त्वं समुद्रिया अपोऽग्रियो वाच ईरयन् । पवस्व विश्वचर्षणे ॥ २ ॥

७७७ तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे । तुभ्य धावन्ति धेनवः ॥ ३ ॥ १ (यी)॥

७७८ पवस्वेन्दो वृषा सुतः क्रधी नो यशसो जने । विश्वा अप द्विषो जहि ॥ १ ॥

७७९ यस्य ते सख्ये वयं रासत्वाम पूरुण्यतः । तवेन्दो पुरु वसु ॥ २ ॥

७८० या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे । रक्षा समस्य नो निदः ॥ ३ ॥ ॥ २ (इ) ॥

७८१ वृषा सोम द्युमाँ२असि वृषा देव वृषव्रतः। वृषा धर्माणि दधिषे ॥ १ ॥

७८२ वृष्णस्ते वृष्ण्यं२शवो वृषा वनं वृषा सुतः। स त्वं वृषन्द्युक्षसि ॥ २ ॥

७८३ अधो न चक्रदो वृषा सं गा इन्दो समर्षतः। वि नो राये दुरो वृधि ॥ ३ ॥ ॥३ (तृ)॥

७८४ वृषा क्षमि भानु ते द्युमन्तं त्वा हवामहे। पवमान स्वर्दृशम् ॥ १ ॥

७८५ यदद्भिः परिषिच्यसे मर्मृज्यमान आयुभिः। द्रोणे सधस्थमश्नुषे ॥ २ ॥

७८६ धा पवस्व सुवीर्यं मन्दमानः स्वायुध। इहो ष्विन्दवा गहि ॥ ३ ॥ ॥४ (यौ)॥

७८७ पवमानस्य ते वयं पवित्रमभ्युन्दतः। सखित्वमा वृणीमहे ॥ १ ॥

७८८ य ते पवित्रमूर्मयोऽभिक्षरन्ति धारया। तैर्नः सोम मृळय ॥ २ ॥

७८९ स नः पुनान आ भर रयिं वीरवतीमिषम्। ईशानः सोम विश्वतः ॥ ३ ॥ ॥५(ला)॥

इति प्रथमः खण्डः ॥ १ ॥

७९० अग्निं वृत वृणीमहे होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम् ॥ १ ॥

७९१ अग्निमग्निं२हवीमभिः सदा हवन्त विश्पतिम्। हव्यवाहं पुरुप्रियम् ॥ २ ॥

७९२ अग्ने वक्षा२ इहा वह जज्ञानो यक्तवर्हिषे। असि होता न ईड्यः ॥ ३ ॥ ॥६ (यौ)॥

७९३ मित्र वयं हवामहे वरुणं सोमपीतये। धा जाता पूतदक्षसा ॥ १ ॥

७९४ ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती। ता मित्रावरुणा हुवे ॥ २ ॥

७९५ वरुण प्राविता भुवन्मित्रो विश्वाभिरूतिभिः। करतां नः सुराधसः ॥ ३ ॥ ॥ ७(धा) ॥

७९६ इन्द्रमित्राग्निनो बृहदिवमर्कैरभि प्र णोनुमः। इन्द्रं वाणीरनूषत ॥ १ ॥

७९७ इन्द्र इद्धर्यो सचा सम्मिश्ल आ वचोयुजा। इन्द्रो वज्री हिरण्ययः ॥ २ ॥

७९८ इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च। उग्र उग्राभिरूतिभिः ॥ ३ ॥

७९९ इन्द्रा दीवाय चक्षस आ सूर्यं रोहयो दिवि। वि गोभिरद्रिमैरयत् ॥ ४ ॥ ॥८ (ला)॥

८०० इन्द्रे अन्ना नमो बृहत्सुवृक्तिमेरयामहे। धिया धेना अयस्यव ॥ १ ॥

८०१ ता हि शश्वन्त ईळत इत्था विप्रास ऊतये। सवाधो वाजसातये ॥ २ ॥

८०२ ता वां गीर्भिर्विपन्युवः प्रयस्वन्तो हवामहे। मेधसाता सनिष्यवः ॥ ३ ॥ ॥ ९ (तृ)॥

॥ इति द्वितीयः खण्डः ॥ २ ॥

८०३ वृषा पवस्व धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसा ॥ १ ॥

८७४ त्वा धर्णारमाण्यो३ः पवमान स्वर्दृशम् । हिन्वे वाजेषु वाजिनम् ॥ ८ ॥

८७५ मया चित्ता विपानया हरिः पवस्व धारया । युजं वाजेषु चोदय ॥ ९ ॥१० (८)॥

८७६ वृषा शोणो अभिकनिक्रदद्गा नदयंसेषि पृथिवीमुत द्याम् ।
इन्द्रस्येव वग्नुरा शृण्व आजौ प्रसोदयन्वर्षसि वाचमेमाम् ॥ १ ॥

८७७ रसाय्य पयसा पिन्वमान ईरयसेषि मधुमन्तमंशुम् ।
पवमान सन्तनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ॥ २ ॥

८७८ एषा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नुम् ।
परि वर्णं भरमाणो रुशन्त गव्युर्नो अर्षं परि सोम सिक्तः ॥ ३ ॥११(६)॥

॥ इति तृतीयः खण्डः ॥ ६ ॥

८७९ त्वामिद्धि हवामह सातौ वाजस्य कारवः । त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥१॥

८८० सं त्व नक्षन्त्र यज्ञहस्त भृण्युया मह स्तवानो अद्रिवः ।
गामश्वं रथ्यमिन्द्र स किर सत्रा वाजं न जिग्युषे ॥ २ ॥ १२ (फ) ॥

[ऋ० १० । उ० ९ । स्व]

८८१ अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ १ ॥

८८२ शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥ २ ॥ १३ (हि) ॥

[ऋ० १० । उ० ना । स्व ३]

८८३ त्यामिदा ह्यो नरोऽपीप्यन्वज्रिन् भूर्णयः ।
स इन्द्र स्तोमयाक्षस इह श्रुध्युप स्वसरमा गहि ॥ १ ॥

८८४ मन्त्रा सुशिप्रिन्हरिवस्तमीमहे त्वया भूयन्मि वेधसः ।
तव श्रवांस्युपमान्युक्थ्य सुतेष्विन्द्र गिर्वणः ॥ १ ॥ १४ (ल) ॥

॥ इति चतुर्थः खण्डः ॥ ४ ॥ [ऋ० १० । उ० ना । स्व १]

८८५ यस्ते मदो वरेण्यस्तेना पवस्वान्धसा । देवावीरघशंसहा ॥ १ ॥

८८६ अभिर्यूथमिवाशिषदभि वाजं न विश्वहा । गोषातिरप्सा असि ॥ २ ॥

८१७ सम्मिक्षो अरुषो भुवः सूपस्थाभिन धेनुभि । सीद च्छवनो न योनिमा ॥३॥ ॥ १५ (चौ)
[धा १२ । अ १ । ख नास्ति]

८१८ अय पवा रयिभगः सोमः पुनाना अर्षति । पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥१॥

८१९ समु प्रिया अनूषत गावो मदाय घृष्वयः । सोमासः कृण्वते पथः पवमानास इन्दवः॥२॥

८२० य आजिघ्रस्तमा भर पवमान श्रवाय्यम । यः पञ्च चर्षणीरभि रयिं येन वनामहे ॥ ३ ॥ ॥१६(फु)॥
[धा १९ । अ १ । ख १]

८२१ सूपा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिव ।
प्राणा सिन्धूनां कलशाँ असिक्षदिन्द्रस्य हार्दाविशन्मनीषिभिः ॥ १ ॥

८२२ मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ असिष्यदत् ।
त्रितस्य नाम जनयन्मधु क्षरन्निन्द्रस्य धायु सख्याय वर्धयन ॥ २ ॥

८२३ अय पुनान उषसो अरोचयदय सिन्धुभ्या अभवदु लोककृत् ।
अय त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ॥ ३ ॥ ॥१७(गी)॥
॥ इति पञ्चम खण्डः ॥५॥ [धा ३१ । अ २ । ख ४]

८२४ एषा हासि वीरयुरेषा शूर उत स्थिरः । एषा ते राध्या मनः ॥ १ ॥

८२५ एषा रातिस्तुविमघा विश्वेभिर्धायि धातृभिः । अधा चिदिन्द्र नः सखा ॥ २ ॥

८२६ मो षु ब्रह्मेव तन्द्रयुर्भवो वाजानां पते । मत्स्वा सुतस्य गोमतः ॥ ३ ॥ ॥१८(ति)॥
[धा १४ । अ १ । ख ३]

८२७ इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥ १ ॥

८२८ सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते । त्वामभि प्र णोनुमो जेतारमपराजितम् ॥ २ ॥

८२९ पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः ।
यदा वाजस्य गोमत स्तोतृभ्यो मंहते मघम् ॥ ३ ॥ ॥१९(ली)॥
[धा १८ । अ नास्ति । ख ४]

इति षष्ठः खण्डः ॥ ६ ॥ ४ इति द्वितीयप्रपाठके प्रथमोऽर्धः ॥ २ ॥
॥ इति तृतीयाऽध्याय ॥ ३ ॥

अथ चतुर्थोऽध्याय ।

[२]

अथ द्वितीयप्रपाठक द्वितीयोऽध्य ॥ ॥

(१–१९) १ अमदग्निर्भार्गवः, २ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा ३ कविर्भार्गवः; ४ वत्सप्रीर्भालन्दनः; ५, मेधातिथिः काण्वः; ६ ७ मधुच्छन्दा वैश्वामित्र ८ भरद्वाजो बार्हस्पत्यः, ९ सप्तर्षयः (१ भरद्वाजो बार्हस्पत्य ; कश्यपो मारीच ; २ गोतमो राहुगण ४ अत्रिभौम ; ५ विश्वामित्रो गाथिन ६ जमदग्निर्भार्गवः; ७ वसिष्ठो मैत्रावरुणिः) १ परावसुः पाञ्चजन्यः; ११ पुरुहन्मा आङ्गिरसः; १२ मेध्यातिथिः काण्वः १३ वसिष्ठो मैत्रावरुणिः ; १४ दिव्य आप्त्यः; १५ यवातिर्नाहुषः ; १६ पवित्र आङ्गिरसः ; १७ सोमाहुतिः काण्वः, १ गायत्रस्यच्छ नो काण्वायनाः १९ तिरश्चीरांगिरसौ ॥ १–४ ९ १ १२–१४ पवमानः सोमः १७ अग्निः ६ मित्रावरुणौ ७ मरुतः ८ (१ ३) इन्द्राग्नी, ८ इन्द्राबृहस्पती, ११ १६ १८–१९ इन्द्रः ९ १– १५ गायत्री, २ (३) द्विपदा विराट् ; १ त्रिष्टुप्, ९ (१–२) ११ १३ प्रगाथः ८ (विषमा बृहती समा सतोबृहती) १२ बृहती, १५ १९ अनुष्टुप्, १६ भुरिक् १७ प्रगाथः ८ (विषमा ककुप्, समा सतोबृहती), १८ त्रिष्टुप् ॥

८३० एत असृग्रमिन्दवस्तिरः पवित्रमाशवः । विघ्नान्यसि सौभगा ॥ १ ॥

८३१ विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः । रमना कृण्वन्तो अर्वते ॥ २ ॥

८३२ कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम् । इन्दवस्मभ्यं सं यतम् ॥ ३ ॥ ॥ १ (या)॥

[ऋ ७ । ३ नास्ति । स्व २]

८३३ राजा मेधाभिरीयते पवमानो मनावधि । अन्तरिक्षेण यातवे ॥ १ ॥

८३४ आ नः सोम सहो जुवो रूपं न वर्चसे भर । सुष्वाणो देववीतये ॥ २ ॥

८३५ आ न इन्दो शतग्विनं गवां पोषं स्वश्व्यम् । वहा भगत्तिमूतये ॥ ३ ॥ ॥२ (ला)॥

[ऋ १४ । ३ नास्ति । स्व २]

८३६ तं त्वा नृम्णानि बिभ्रतꣳ सधस्थेषु महो दिवः । चारुꣳ सुकृत्यया महे ॥ १ ॥

८३७ सम्यक्तधृष्णुमुक्थ्यं महामहिव्रत मदम् । शतं पुरो रुरुक्षणिम् ॥ २ ॥

८३८ अतस्त्वा रयिरभ्ययन्नाजानꣳ सुक्रतो दिवः । सुपर्णो अव्यथी भरत् ॥ ३ ॥

८३९ अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे । अभिष्टिकृदिषस्पतिः ॥ ४ ॥

८४० विश्वसा इद्यस्वहश साधारणꣳ रजस्तुरम् । गोपामृतस्य विर्भरत् ॥ ५ ॥ ॥३ (हु)॥

[ऋ २१ । ७ नास्ति । स्व ६]

८४१ इमं पवस्व धारया मृज्यमानो मनीषिभिः । इन्दो रुचाभि गा इहि ॥ १ ॥

८४२ पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः । हरे सृजान आशिरम् ॥ २ ॥

८४३ पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् । द्युताना वाजिभिर्हितं ॥ ३ ॥ ॥८ (या)॥

इति प्रथम खण्ड ॥ १ ॥ [या १७ । उ नास्ति । स्व २]

८४४ अग्निर्जातो असिध्यते कविर्गृहपतिर्युवा । हव्यवाडजरश्चास्यः ॥ १ ॥

८४५ यस्त्वामग्ने हविष्पतिर्दूत देव सपर्यति । तस्य स्म प्राविता भव ॥ २ ॥

८४६ यो अग्निं देववीतये हविर्भिरा विवासति । तस्मै पावक मृळय ॥ ३ ॥ ॥ ९(रि) ॥

[धा १३ । उ नास्ति । स्व ३]

८४७ मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् । धियं घृताचीं साधन्ता ॥ १ ॥

८४८ ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । ऋतु बृहन्तमाशाथे ॥ २ ॥

८४९ कवी नो मित्रावरुणा तुविजाता उरुक्षया । दक्षं दधाते अपसम् ॥ ३ ॥ ॥ ६(ध) ॥

[धा १ । उ नास्ति । स्व १]

८५० इन्द्रेण सꣳहि दृक्षसे सजग्मानो अबिभ्युषा । मन्दू समानवर्चसा ॥ १ ॥

८५१ आवह स्वधामनु पुनर्गर्भत्वमेरिरे । धयाना नाम यज्ञियम् ॥ २ ॥

८५२ पीपिवाꣳसं सरस्वतो घृतस्य देव सोमिनः । पुरंधिं जिन्वमिन्वतु ॥ ३ ॥ ॥ ७ (ति)॥

[धा १४ । उ १ । स्व ३]

८५३ ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतम् । इन्द्राग्नी न मर्धतः ॥ १ ॥

८५४ उग्रा विघनिना मृध इन्द्राग्नी हवामहे । ता नो मृळात ईदृशे ॥ ॥

८५५ हुवो वृत्राण्यार्या हुवो दासानि सत्पती । हुवो विश्वा अप द्विषः ॥ ३ ॥ ॥ ८ (पी)॥

॥ इति द्वितीयः खण्ड ॥ २ ॥ [धा १ । उ १ । स्व ४]

८५६ अभि सोमास आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥ १ ॥

८५७ तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।
अर्षा मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥ २ ॥

८५८ नृभिर्यमाणो हर्यतो विचक्षणो राजा देवः समुद्रियः ॥ ३ ॥ ॥ ९(द्यु) ॥

[धा १५ । उ नास्ति । स्व ५]

८५९ तिस्रो वाचः प्रवदति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणा मनीषाम् ।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥ १ ॥

८६० सोम गायो धेनवो वाथशाना सोम विप्रा मतिभिः पृच्छमानाः ।
सोमः सुत श्रूयते पवमान सोमे अर्कास्त्रिष्टुभः सं नवन्ते ॥ २ ॥

८६१ एषा न सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।
इन्द्रमा विश बृहता मदेन वर्धया वाचं जनया पुरंधिम् ॥ ३ ॥ ॥१०(पी)॥

॥ इति तृतीयः खण्डः ॥ ३ ॥ [ऋ ३ । ऊ १ । स्व ४]

८६२ यद्वाघद्भ इन्द्र ते शतं शत भूमीरुत स्युः । न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥ १ ॥

८६३ आ पवस्व मदिन्तम पवित्र धारया सुतः । इन्दो सहस्रभर्णसं तोकं पुष्टं धनं धाः ॥ २ ॥

अस्मान्त्सु तत्र चोदय पवित्र वाजिनीवति । यत्र सूरो न हूयते ॥ ३ ॥ ॥११(ली)॥

[ऋ १९ । ऊ मास्ति । स्व ४]

८६४ पय इत्या सुतावतः आपो न क्षरतायतीः । पवित्रस्य प्रस्रवणेषु बृहद्दिवेषु सीदत ॥ १ ॥

८६५ स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिन । कदा सुत तृषाण ओक आ गमदिन्द्र स्वर्दृशे ॥ २ ॥

८६६ कण्वेभिर्धृष्णवा धृषद्वाजं वाजिन्त्सनिष्यसि । पिशङ्गरूप मघवन्बिभीहि मक्षू गोमन्तमीमहे ॥ ३ ॥ ॥१२(ङा)॥

[ऋ २७ । ऊ २ । स्व ५]

८६७ तरणिरित्सिषासति वाजं पुरन्ध्या युजा । आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ॥ १ ॥

८६८ न दुष्टुतिर्द्रविणोदेषु शस्यते न ऋधग्घोतरसितायति ।
सुशक्तिरग्निमखस्य तुज्यै मायामे वेद्यं यतयार्य विधिं ॥ १३ ॥ ॥१५(यि)॥

॥ इति चतुर्थः खण्डः ॥ ४ ॥ [ऋ १७ । ऊ ७० मास्ति । स्व १]

८६९ तिस्रो वाच उदीरते गावो मिमन्ति धेनवः । हरिरेति कनिक्रदत् ॥ १ ॥

८७० अभि ब्रह्मीरनूषत यह्वीरृतस्य मातरः । मर्जयन्तीर्दिवः शिशुम् ॥ २ ॥

८७१ राय समुद्रार्णवतुरो ऽस्मभ्यं सोम विश्वतः । आ पवस्व सहस्रिणः ॥ ३ ॥ ॥१४(ग)॥

[ऋ १८ । ऊ ११ । स्व २]

८७२ सुतास्रो मधुमत्तमाः सोमा इन्द्राय मन्दिनः । पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः ॥ १ ॥

४७३ इन्दुरिन्द्राय पवत इति देवासो अब्रुवन्। वायस्पतिर्मखस्यते विश्वस्येशान ओजसः ॥ २ ॥

४७४ सप्तधारः पवते समद्वा वाजसातये। सोमस्पती रयीणां रसस्येन्द्रस्य धीधनैः ॥ ३ ॥ ॥१५(लि)॥

[धा १९ । ऊ नास्ति स्व २]

४७५ पवित्रं ते वितत ब्रह्मणस्पते प्रभुर्गात्राणि पर्यसि विश्वतः।
अतप्ततनूर्न तदामो अश्नुते श्रृतास इद्वन्तः स बादशाः ॥ १ ॥

४७६ तपोष्पवित्रं वितत दिवस्पदेऽर्चन्तो अस्य तन्तवो व्यस्थिरन्।
अवन्त्यस्य पवितारमाशवो दिवः पृष्ठमधि रोहन्ति तेजसा ॥ २ ॥

४७७ रुरुचन्नुषसः पुरुश्चन्द्रिय उक्षा मिमेति भुवनेषु वाजयुः।
मायाविनो ममिरे अस्य मायया नक्तचरन्ता पयसा पयावृधः ॥ ३ ॥ ॥१६(दु)॥

॥ इति पञ्चमः खण्डः ॥ ५ ॥ [धा १८ । ऊ १ । स्व २]

४७८ प्र मन्दिष्टाय गायत ऋतावृधे पवमानाय वेधसे। उपस्तुतासो अग्नये ॥ १ ॥

४७९ आ यन्त्सते मघवा वीरवद्यशः संगृभ्या दुग्धाहुतः।
कुविन्नो अस्य सुमतिर्भविष्यत्यच्छा वाजेभिरागमत् ॥ २ ॥ ॥१७(या)॥

[धा १७ । ऊ नास्ति । स्व]

४८० न ते मद्रा गृणामसि चूपण पुरुभ्य आसुतिम्। उ लोककृत्नुमद्रिवो हरिश्रियम् ॥ १ ॥

४८१ येन ज्यावीरप्यायसे मनवे च विवेदिथ। मन्मानो अन्य आसुरिः पि राजसि ॥ २ ॥

४८२ तमद्या चित्त उक्थिनोऽनु ष्टुवन्ति पूर्वथा। वृषपत्नीरपो जया दिवेदिव ॥ ३ ॥ ॥१८(इ)॥

[धा २१ । ऊ नास्ति । स्व १]

४८३ अधी हि ष्मा तिरश्चता इन्द्रं यज्ञेषु चोदय। सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥ १ ॥

४८४ यस्त इन्द्र नयीयसीं गिरं मन्द्रामजीजनत्। चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीम् ॥ २ ॥

४८५ तमु ष्टवाम य गिरेन्द्रमर्कभिर्नाकिं बाबृधुः। पुरुण्यस्य गा इयस्य सिषासन्तो वनामहे ॥३॥ ॥१९(फा)॥

॥ इति षष्ठः खण्डः ॥ ६ ॥ [धा १ । ऊ २ । स्व २]

इति द्वितीयप्रपाठके द्वितीयोऽर्धः तृतीयप्रपाठकश्च समाप्तः ॥ २ ॥

॥ इति चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः

[१]

अथ तृतीयप्रपाठके प्रथमोऽर्धः ॥ १ ॥

(१-२२) १ अङ्गिरा भाषा ; २ जमदग्निर्भार्गवो वा ; ३ मेध्यातिथिः काण्व ; ४ १२ बृहन्मतिराङ्गिरस ५ भरद्वाज ऋणिर्जमदग्निर्भार्गवो वा ; ६ सुदंभर आत्रेयः ; ७ सुदासमदः पौरुक ; ८ २१ गोतमो राहूगणः ; १३ वसिष्ठो मैत्रावरुणिः ; १ इक्ष्वाकुवंश जागतस्य ; ११ सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः २ कश्यपो मारीचः ३ गोतमो राहूगण ४ अत्रिर्भौम , ५ विश्वामित्रो गाथिन ६ जमदग्निर्भार्गवः ७ वसिष्ठो मैत्रावरुणिः) १४ रेभ काश्यप १५ पुरुहन्मा आङ्गिरसः ; १६ असितः काश्यपो देवलो वा ; १७ (१) शाक्त्यवसिष्ठः १७ ( ) उशनाङ्गिरसः ; १८ अग्निश्चाक्षुषः ; १९ प्रजापतिर्वैश्वामित्रः ; २ प्रयोगो भार्गवः ; २१ पावकोऽग्निर्यासु स्पत्यो वा गृहपतियविष्ठो बसुसः पुत्रावभृथतरो वा ; २२ ॥ १-५, १ -१२ १६ १ पवमान सोमः ; १, २ अग्निः ; ७ मित्रावरुणौ ; ८ १३-१ २१ इन्द्रः ६ द्रवाणो २२ ॥ १ ६ जगती ; १-५ ७-१ , १२ ; १६ २ गायत्री ; ११ ; १५ प्रगाथः = (विषमा बृहती समा सतोबृहती) ; १३ विराट् ; १४ (१) अति जगती १४ (२-२) उपरिष्टाद् बृहती ; १७ काकुभः प्रगाथः = (विषमा ककुप् समा सतोबृहती , १ त्रिष्टिगर्भा १९ त्रिष्टुप् , २१ अनुष्टुप् ॥

२ ३ १ ६ ७१ ३ ४ १ २ ५ १ २ ३ १ २
८८६ प्र त आश्विनीः पवमान धेनवो दिव्या असृग्रन्पयसा धरीमणि ।
१ ३२ १ ६ ३ १ २ ३ १ २ ३ १ २
प्रान्तरिक्षात्स्थाधिरीत्ते असृक्षत ये त्वा सृजन्त्यृषियाण वेधसः ॥ १ ॥
३ २ ४ १२ ३ १ २ ३ २ ३१ १२ ३ १ २
८८७ उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।
१ २ ३ ४ १ २ ३ २ ३ १ ३ २ ३ १२ ३ १ २
यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योनौ कलशेषु सीदति ॥ २ ॥
३ १ २ ३ १ २ ३ १ २ ३ १ १२ ३ १ २
८८८ विश्वा धामानि विश्वचक्ष ऋभ्वस प्रभोषे सतः परि यन्ति केतवः ।
३ १ २ ३ १ २ ३ २ ३१ २ ४ १ २
व्यानशी पवसे सोम धर्मणा पतिर्विश्वस्य भुवनस्य राजसि ॥ ३ ॥ ॥१(वी)॥

[धा ३५ । ऋ० ७० ज्ञातस । स्व ७]

११ ३ १ ३१ २१ ३१ १ ३२ ३ २
८८९ पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम् । ज्योतिर्विश्वस्मै भुवनाय कृण्वन् ॥ १ ॥
११ ३१ ३ १ ३ १ ३१ २१ ३ १ २
८९० पवमान रसस्तव मदो राजन्नदुल्लुनः । वि वारमव्यमर्षति ॥ २ ॥
१२ ३ १ ३ २ ३१ २ ३१ १ ३ १ २
८९१ पवमानस्य ते रसा दक्षो वि राजति द्युमान् । ज्योतिर्विश्वस्मै भुवनाय स्पार्हो ॥ ३ ॥ ॥२(पा)॥

[धा २ । ऋ १ १४ २]

३ ३ १ २ ५ २ ३ १ ३ १२ १ २ ३ २ ३ १ २
८९२ प्र यद्गावो न भूर्णयस्तवेषा अयासो अग्मन्नु । मन्तः कृण्वानपः त्वचम् ॥ १ ॥
३ १ ३ २ ३ १२ ४ २ ३ १ ३ १ ३
८९३ सुषितस्य मनामहे सेतुं दुरास्यम् । साह्याम दस्युमव्रतम् ॥ २ ॥
३ २ ३ १ २ ३ १ १२ ३ १ २ ३ १ २ ३ २
८९४ ऋणचे शूरोरिव स्थनः पवमानस्य शुष्मिणः । क्षरन्ति विद्युतो दिवि ॥ ३ ॥

८९५ आ पवस्व महीमिष गोमदिन्दो हिरण्यवत् । अश्वयत्सोम वीरवत् ॥ ४ ॥

८९६ पवस्व विश्वचर्षण आ मही रोदसी पृण । उषाः सूर्यो न रश्मिभिः ॥ ५ ॥

८९७ परि णः शर्मयन्त्या धारया सोम विश्वतः । सरा रसेव विष्टपम् ॥ ६ ॥ ॥३(भी)॥

[ऋ० ३५ । उ० ४ । स्व० ४]

॥ इति प्रथमः खण्डः ॥१॥

८९८ शाक्वरं बृहद्गायते परि प्रियेण धाम्ना । यत्रा देवा इति ब्रुवन् ॥ १ ॥

८९९ परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः । वृष्टिं दिवः परि स्रव ॥ २ ॥

९०० अधरं स यो दिवस्परि रघुयामा पवित्र आ । सिन्धोरूर्मा व्यक्षरम् ॥ ३ ॥

९०१ सुत इति पवित्र आ त्विषिं दधान ओजसा । विचक्षाणो विरोचयन् ॥ ४ ॥

९०२ आदियासन्नारवतो अथो अर्वावतः सुतः । इन्द्राय सिच्यते मधु ॥ ५ ॥

९०३ समीचीना अनूषत हरिं हिन्वन्त्यद्रिभिः । इन्दुमिन्द्राय पीतये ॥ ६ ॥ ॥४(जी)॥

[ऋ० ३ । उ० ३ । स्व० ४]

९०४ हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम् । महामिन्दुं महीयुवः ॥ १ ॥

९०५ पवमान रुचारुचा देव देवेभ्यः सुतः । विश्वा वसून्या विश ॥ २ ॥

९०६ आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः । इषे पवस्व सक्रतम् ॥ ३ ॥ ॥५(ह)॥

॥ इति द्वितीयः खण्डः ॥ २ ॥ [ऋ० १११ । उ० नास्ति । स्व० १]

९०७ जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ॥ १ ॥

९०८ त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने ।
स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः ॥ २ ॥

९०९ यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते ।
इन्द्रेण देवैः सरथं स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ॥ ३ ॥ ॥ ६ (वे)॥

[ऋ० ३ । उ० नास्ति । स्व० ७]

९१० अयं वां मित्रावरुणा सुतः सोम ऋतायुधा । ममेदिह श्रुतं हवम् ॥ १ ॥

९११ राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे । सहस्रस्थूण आसाते ॥ २ ॥

९१२ ता सम्राजा घृतासुती आदित्या दानुनस्पती । सचेते अनवद्वरम् ॥ ३ ॥ ॥ ७(पि)॥

[ऋ० १५ । उ० १ । स्व० ३]

९१३ इन्द्रा वधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः। जघान नवतीर्नव ॥ १ ॥

९१४ इरुच्छस्यस्य यच्छिरः पर्वतेष्वपश्रितम्। तद्विदच्छर्यणावति ॥ २ ॥

९१५ अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम्। इत्था चन्द्रमसो गृहे ॥ ३ ॥ ८ (ठी) ॥

[अ १२ । उ १ । ऋ ४]

९१६ इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः। अभ्राद्वृष्टिरिवाजनि ॥ १ ॥

९१७ शृणुत जरितुर्हवमिन्द्राग्नी घतनं गिरः। ईशाना पिप्यतं धियः ॥ २ ॥

९१८ मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये। मा नो रीरधतं निदे ॥ ३ ॥ ९(चा)॥

॥ इति तृतीयः खण्डः ॥ ३ ॥ [अ १२ । उ १ । ऋ २]

९१९ पवस्व दक्षसाधनो देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः ॥ १ ॥

९२० स देवः शोभने वृधा कवियोनावधि प्रिय। पवमानो अदाभ्यः ॥ २ ॥

१२१ पवमान धिया हितो ३ऽभि योनिं कनिक्रदत्। धर्मणा वायुमारुहः ॥ ३ ॥ १०(ऋ)॥

[अ ११ । उ २ । ऋ १]

९२२ तवाहꣳसोम रारण सख्य इन्दो दिवेदिवे। पुरूणि बभ्रो नि चरन्ति मामव परिधीꣳरति ताꣳहरे १

९२३ तवाहं नक्तमुत सोम ते दिवा दुहाना अद्रय ऊधनि।
घृणा तपन्तमति सूर्यं परः शकुना इव पप्तिम ॥ २ ॥ ११(ति) ॥

[अ १४ । उ १ । ऋ ३]

९२४ पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः। शुम्भन्ति विप्र धीतिभिः ॥ १ ॥

९२५ आ योनिमरुणो रुहदक्रदिन्द्रो वृषा सुतम्। धुवे सदसि सीदतु ॥ २ ॥

९२६ नृ नो रयिं महाꣳइन्दोऽस्मभ्यꣳ सोम विश्वत। आ पवस्व सहस्रिणम् ॥ ३ ॥ १२(चा)॥

॥ इति चतुर्थः खण्डः ॥ ४ ॥ [अ १२ । उ १ । ऋ]

९२७ पिबा सोममिन्द्र मदन्तु त्वा य ते सुषाव हर्यश्वाद्रिः। सोतुर्बाहुभ्याꣳ सुयतो नार्वा ॥ १ ॥

५ ८ यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हꣳसि। स त्वामिन्द्र प्रभूवसो ममत्तु ॥ २ ॥

९२९ धोधा सु म महयन्यास्यमेमा या ते वसिष्ठो अर्चति प्रशस्तिम्।
इमा ब्रह्म सधमादे जुषस्व ॥ ३ ॥ १३॥(चा)॥

[अ १२ । उ १ । ऋ २]

९३० विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे।
कृत्वे वरे स्थेमन्यामुरीमुतो प्रमोजिष्ठं तरुत्रं सरस्विनम् ॥ १ ॥

९३१ नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरे। सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥२॥

९३२ समु प्रियासो अस्वरन्निन्द्रं सोमस्य पीतये।
स्वः पतिर्यदी वृधे धृतव्रतो ह्योजसा समूतिभिः ॥ ३ ॥ ॥१४(ची)॥
[धा २२। ऋ १। स्व ४]

९३३ यो राजा चर्षणीनां याता रथेभिरध्रिगुः। विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥ १ ॥

९३४ इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि।
हस्तेन वज्रः प्रति धायि दर्शतो महां देवो न सूर्यः ॥ २ ॥ ॥१५(चि)॥
॥ इति पञ्चमः खण्डः ॥ [धा १७। ऋ १। स्व ३]

९३५ परि प्रिया दिवः कविर्वयाꣳसि नप्त्योर्हितः। स्वाꣳर्याति कविक्रतुः ॥ १ ॥

९३६ स सूनुर्मातरा शुचिर्जातो जाते अरोचयत्। महान्महीं ऋतावृधा ॥ २ ॥

९३७ प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहः। वीत्यर्षा पनिष्यवे ॥ ३ ॥ ॥१६(रि)॥
[धा ३। ऋ नास्ति। स्व ३]

९३८ स्वꣳशा ऋष्वस्य पवमान जनिमानि द्युमत्तमः। अमृतत्वाय घोषयन् ॥ १ ॥

९३९ येना नवग्वा दध्यङ्पोणुते येन विप्रास आपिरे।
देवानाꣳ सख्ये अमृतस्य चारुणो येन श्रवाꣳस्याशत ॥ २ ॥ ॥१७(पौ)॥
[धा ११। ऋ १। स्व नास्ति]

९४० सोमः पुनान ऊर्मिणाव्यं वारं वि धावति। अग्रे वाचः पवमानः कनिक्रदत् ॥ १ ॥

९४१ धीभिर्हिन्वन्ति वाजिन वने क्रीळन्तमत्यविम्। अभि त्रिपृष्ठं मतयः समस्वरन् ॥ २ ॥

९४२ असर्जि कलशाꣳ अभि मीळ्हात्तमायꣳ अवीवशन्। पुनानो वाचं जनयन्नसिष्यदत् ॥ ३ ॥ ॥१८(फा)॥
[धा १। ऋ २ स्व ८]

९४३ सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः।
जनितान्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ १ ॥

९४४ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम्।
श्येनो गृध्राणाꣳ स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥ २ ॥

९४५ प्राचीमिषमुदाजꣳ ऊर्मिं न सिन्धुर्गिरस्तोमाꣳ पवमानो मनीषाः।
अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥ ३ ॥ ॥१९(फु)॥
[धा ३। ऋ २ स्व ६]

९४६ अग्ने यो वृधन्तमध्वराणां पुरुतमम् । अच्छा नप्त्रे सहस्वते ॥ १ ॥

९४७ अयं यथा न आभुवत्वष्टा रूपेव तक्ष्या । अस्य क्रत्वा यशस्वतः ॥ २ ॥

९४८ अयं पिन्वा भगि श्रियोऽग्निर्वेधेषु पप्यते । आ वाजैरुप नो गमत् ॥ ३ ॥ ॥२०(ङा)॥

[धा ८ । उ० ३ । स्व २]

९४९ इममिन्द्र सुत पिब ज्येष्ठममर्त्यं मदम् । शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥ १ ॥

९५० न किष्ट्वद्रथीतरो हरी यदिन्द्र यच्छसे । न किष्ट्वानु मज्मना न कि स्वश्व आनशे ॥२॥

९५१ इन्द्राय मूलमर्चतोपबर्हाणि च बर्हिषा । सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः ॥ ३ ॥ ॥ २१ (र)॥

[धा ८ । उ नास्ति । स्व १]

९५२ इन्द्र जुषस्व प्र वहा याहि शूर हरिह । पिबा सुतस्य मतिर्न मधोश्चकानश्चारुर्मदाय ॥ १ ॥

९५३ इन्द्र जठरं नव्य न पृणस्व मधोर्दिवो न । अस्य सुतस्य स्वा३र्नोप त्वा मदाः सुवाचो अस्थुः ॥२॥

९५४ इन्द्रस्तुराषाण्मित्रो न जघान वृत्रं यतिर्न । विभेद बलं भृगुर्न ससाहे शत्रून्मदे सोमस्य ॥३॥ ॥२२(ऊ)॥

॥ इति सप्तमः खण्डः ॥ ७ ॥ [धा ११ । उ ५ । स्व १]

॥ इति तृतीयपाठके प्रथमोऽर्धः ॥ ३ ॥

॥ इति पञ्चमोऽध्यायः ॥ ५॥

अथ षष्ठोऽध्यायः ।

[१]

अथ तृतीयप्रपाठके द्वितीयोऽर्धः ॥ ३ ॥

(१–११) १ (अङ्गिरा भारद्वाजः) ऋषयः ऋषयः; २ कश्यपो मारीच ; ३ ४, १३ अत्रिर्व काश्यपो वैवस्वतो वा, ५ जमदग्निर्भार्गवः ६ १६ जमदग्निर्भार्गवः ७ अरुणो वैतहव्य ; ८ उरुचक्रिरात्रेय कुरुसुतिः काण्वः; ९ भरद्वाजो बार्हस्पत्यः, ११ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा; १२ सप्तर्षयः (१ भरद्वाजो बार्हस्पत्य २ कश्यपो मारीचः ३ गोतमो राहूगणः ४ अत्रिर्भौमः ५ विश्वामित्रो गाथिनः ६ जमदग्निर्भार्गवः ७ वसिष्ठो मैत्रावरुणिः); १४ १५,२३ गोतमो राहूगणः; १७ (१) ऊर्ध्वसद्मा आङ्गिरस १७ (२) कृतयशा आङ्गिरस, १८ त्रित आप्त्य ; १९ वैश्वामित्र काश्यपौ; २० मधुच्छन्दा वैश्वामित्रः २१ वसुश्रुत आत्रेय ; २२ मेधातिथि काण्वः ॥ १–६ ११–१३; १६–२ पवमान सोमः; ७ २१ अग्निः; ८ मित्रावरुणौ, ९, १४ १५ २२ २३ इन्द्रः १ इन्द्राग्नी ॥ १७ जगती, २–६ ८ ११ १३ १५ गायत्री, १२ बृहती; १४ १५ २१ पंक्तिः १७ काकुभः प्रगाथः= (विषमा ककुप् समा सतो बृहती); १८ २२ त्रिष्टुप्, १९ २३ अनुष्टुप् २ त्रिष्टुप् ॥

९५५ गोपित्यवस्य वसुविद्गिरण्यविद्रेतोधा इन्दो भुवनेष्वर्पितः ।

त्वर सुमीमे अहि सोम विश्ववित्स्या नर उप गिरेम आसते ॥ १ ॥

९ (सा यो)

९५६ त्वं नृचक्षा असि सोम विश्वतः पवमान पुरुभ ता वि भावसि ।
स न पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे ॥ २ ॥

९५७ ईशानो दमा भुवनानि ईयसे पुजान इन्दो हरितः सुपर्ण्यः ।
तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम निष्टृन्तु कृष्टयः ॥ ३ ॥ १(खी)॥
[मा ४१ । उ २ । स्व० ४]

९५८ पवमानस्य विश्वचित्र ते सर्गा असृक्षत । सूर्यस्येव न रश्मयः ॥ १ ॥

९५९ केतुं कृण्वन्दिवस्परि विश्वा रूपाभ्यर्षसि । समुद्रः सोम पिन्वसे । ॥ २ ॥

९६० जज्ञानो वाचमिष्यसि पवमान विधर्मणि । क्रन्दन्योनो न सर्यः ॥ ३ ॥ ॥ २(पा) ॥
[मा १५ । उ १ । स्व० १]

९६१ प्र सोमासो अधन्विषुः पवमानास इन्दवः । श्रीणानाः अप्सु मृञ्जते ॥ १ ॥

९६२ अभि गावो अधन्विषुरापो न प्रवता यतीः । पुनाना इन्द्रमाशत ॥ २ ॥

९६३ प्र पवमान धन्वसि सोमेन्द्राय मादनः । नृभिर्यतो वि नीयसे ॥ ३ ॥

९६४ इन्दो यदद्रिभिः सुतः पवित्रे परिषीयसे । अरमिन्द्रस्य धाम्ने ॥ ४ ॥

९६५ त्वं सोम नृमादनः पवस्व चर्षणीधृतिः । लक्ष्मीर्या अनुमाद्य ॥ ५ ॥

९६६ पवस्व बृहन्तमं उक्थ्येभिरनुमाद्यः । शुक्रः पावको अद्भुतः ॥ ६ ॥

९६७ शुचिः पावक उच्यते सोमः सुत स मधुमान् । दधाशीरुषसं सहा ॥ ७ ॥ ॥ ३(दै) ॥
॥ इति प्रथमः खण्डः ॥१॥ [मा ४१ । उ मात्रि । स्व०]

९६८ प्र कविर्देवधीतयेऽव्या वारेभिरव्यत । साह्वान्विश्वा अभि स्पृधः ॥ १ ॥

९६९ स हि ष्मा जरितृभ्य आ दाज गोमन्तमिन्वति । पवमानः सहस्रिणम् ॥ २ ॥

९७० परि विश्वानि चेतसा मृज्यसे पवसे मती । स न सोम श्रवो विदः ॥ ३ ॥

९७१ अभ्यर्ष गृणत्यशो मघवन्ग्रावो प्लुत्यं रयिम् । इयर्त्सोतृभ्य आ भर ॥ ४ ॥

९७२ त्वं राजेव सुव्रतो गिरः सोमाविवेशिथ । पुनानो यत्र भद्रुत ॥ ५ ॥

९७३ स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः । सोमश्चमूषु सीदति ॥ ६ ॥

९७४ क्रीळुर्मखो न मरुतः पवित्रं सोम गच्छसि । दधत्स्तोत्रे सुवीर्यम् ॥ ७ ॥ ॥ ४(को)॥
[मा २१ । उ १ । स्व ९]

९७५ पवस्व नो अन्धसा पुष्टपुष्टं परि स्रव । विश्वा च सोम सौभगा ॥ १ ॥

९७६ इन्दो यथा तव स्तवो यथा ते जातमन्धसः । नि बर्हिषि प्रिये सद ॥ २ ॥

९७७ उत नो गोविदश्ववित्पवस्व सोमान्धसा । मक्षूतमेभिरहभिः ॥ ३ ॥

९७८ यो जिनाति न जीयते हन्ति शत्रुमभीत्य । स पवस्व सहस्रजित् ॥ ४ ॥ ५(हि)॥

[ऋ० ११ । ड नास्ति । स्व० ३]

९७९ यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये । ताभिः पवित्रमासदः ॥ १ ॥

९८० सो अर्षेन्द्राय पीतये तिरो वाराण्यव्यया । सीदन्योनिमा ॥ २ ॥

९८१ त्वꣳसोम परि स्रव स्वादिष्ठो अङ्गिरोभ्यः । वरिवोविदद्भ्यः पथः ॥ ३ ॥ ६(हि) ॥

इति द्वितीयोऽनुवाकः ॥ २ ॥ [ऋ० ११ । ड नास्ति । स्व० ३]

९८२ तव श्रियो वर्ष्यस्येव विद्युतोऽग्नेश्चिकित्र उपसामिवेतयः ।

यदोषधीरभिसृष्टो वनानि च परि स्वय क्षमासनि ॥ १ ॥

९८३ वातोपजूत इषितो वशाꣳअनु त्वय वह्ना मेधिषष्टितृप्सते ।

आ ते यतन्ते रथ्योऽयथा पृथक् शर्धाꣳस्यजरस्य धक्षतः ॥ २ ॥

९८४ मेधाकार विदथस्य प्रसाधनमग्ने होतारं परिभूतरं मतिम् ।

त्यामस्य हविषः समानमित्सहो हुवे नाभ्यं त्वत् ॥ ३ ॥ ७(वु) ॥

[ऋ० ३५ । ड ३ । स्व० ५]

९८५ पुरुरणा चिद्ध्यस्यसो नूनं वां वरुण । मित्र वꣳसि वा꣡ꣳसुमतिम् ॥ १ ॥

९८६ ता वा꣡ꣳ सम्यगुद्वृहणेषमश्याम धाम च । वय वां मित्रा स्याम ॥ २ ॥

९८७ पातं नो मित्रा पायुभिरुत त्रायेथा꣡ꣳसुत्रात्रा सह्याम पृत्सु तनूभिः ॥ ३ ॥ ८(य) ॥

[ऋ० १२ । ड नास्ति । स्व० १]

९८८ उच्चिष्ठभोजसा सह पीत्वा शिप्रे अवेपयः । सोममिन्द्र चमू सुतम् ॥ १ ॥

९८९ अनु त्वा रोदसी उभे स्पर्धमानमवर्धताम् । इन्द्र यद्दस्युहाभवः ॥ २ ॥

९९० वावृधानस्य वीर्यं महत्त्वमिन्द्रियाणां वृत्रघ्नो वृत्रहण्यम् । इन्द्रात्परिज्मन्ना गहि ॥ ३ ॥ ९ (हि)॥

[ऋ० ११ । ड नास्ति । स्व० ५]

९९१ इन्द्राग्नी युवामिमꣳसु स्तोमा अभूषत । पिबतꣳसोमꣳसुतम् ॥ १ ॥

९९२ या वा꣡ꣳसन्ति पुरुस्पृहो नियुतो दाशुषे नरा । इन्द्राग्नी ताभिरा गतम् ॥ २ ॥

९९३ ताभिरा गच्छत नरापेवꣳसयनꣳसुतम् । इन्द्राग्नी सोमपीतये ॥ ३ ॥ ॥१०(द्वा)॥

॥ इति तृतीयः खण्डः ॥ ३ ॥ [धा ११ । ऊ नाभिन । स्व २]

९९४ अधा सोम सुमनसमोऽभि द्रोणानि रोरुवत् । सीदन्योनौ वनेष्वा ॥ १ ॥

९९५ अप्सा इन्द्राय वायव वरुणाय मरुद्भ्य । सोमा अगन्तु विष्णव ॥ २ ॥

९९६ इष ताकाय गो वधदस्मभ्यꣳ सोम विश्वत । आ पवस्व सहस्रिणम् ॥ ३ ॥ ॥११(ला)॥

[धा १४ । ऊ नाभि । स्व २]

९९७ सोम उ ष्वाण सोतृभिरधि ष्णुभिरवीनाम् । अश्वयेव हरिता यासि धारया मन्द्रया यासि धारया ॥१॥

९९८ अनूपे गोमान् गोभिरक्षा सोमो दुग्धाभिरक्षाः ।
समुद्र न सवरणाग्यम मन्दी मदाय तोशते ॥ २ ॥ ॥१२(फ)॥

[धा १५ । ऊ २ । स्व १]

९९९ यस्ताम चित्रमुक्थ्य दिव्य पार्थिव वस्व । तत्र पुनान आ भर ॥ १ ॥

१००० वृषा पुनान आयूꣳषि स्तनयन्नधि बर्हिषि । हरिः सन्योनिमासदः ॥ २ ॥

१००१ युवꣳ हि स्थ स्व पती इन्द्रश्च सोम गोपती । ईशाना पिप्यतं धियः ॥ ३ ॥ ॥१३(घु)॥

इति चतुर्थः खण्ड ॥ ४ ॥ [धा १६ । ऊ १ । स्व ५]

१००२ इन्द्रो मदाय वावृधे शवस वृत्रहा नृभिः ।
तमिन्महत्स्वाजिषूतिमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥ १ ॥

१००३ असि हि वीर सेन्योऽसि भूरि पराददिः ।
असि दभ्रस्य चिद्वधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥ २ ॥

१००४ यदुदीरत आजयो ॥ ३ ॥ ॥१४(खु)॥

[धा २६ । ऊ २ । स्व ५]

१००५ स्वादोरित्था विषूवतो । ॥ १ ॥

१००६ ता अस्य पृशनायुवः सोमꣳ श्रीणन्ति पृश्नय । प्रिया इन्द्रस्य धेनवो वज्रꣳ हिन्वन्ति सायक वस्वीरनु स्वराज्यम् ॥ २ ॥

१००७ ता अस्य नमसा सह सपर्यन्ति प्रचेतसः ।
मतास्यस्य सधिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम् ॥ ३ ॥ ॥१५(ब)॥

॥ इति पञ्चमः खण्डः ॥ ५ ॥ [धा १५ । ऊ नाभि । स्व १]

१००८ अभ्यर्ष सुष्टुतीयाप्स वक्षो निरिणाः । दयेनो न योनिमासदम् ॥ १ ॥

१००९ शुम्नमन्धो देवातमप्सु धौतं नृभिः सुतम् । स्वदन्ति गावः पयोभिः ॥ २ ॥

१०१० आदीमश्वं न हेतारमशूशुभन्मनायं । मधौ स्मरं सधमादे ॥ ३ ॥ ॥१९(शु)॥

[ग्रा १२ । उ ११ स्व १]

१०११ अभि शुम्ना बृहद्यश इषस्पते दिदीहि देव दव्यम् । वि कोशं मध्यमं युव ॥ १ ॥

१०१२ भा वस्यस्य सुष्टुत्यं चमूषु सुतो धिया हविर्हन विश्पतिः ।
धूर्षि विश्वः पवस्व वीतिमपो जिघ्नन् रक्षस्विष्ये धिय ॥ ॥॥१७(ना)॥

[ग्रा १ । उ ३ । स्व २]

१०१३ प्राणा शिशुर्महीनां हिन्वन्नृतस्य बोधिति । विश्वा परि प्रिया भुवद्ध छिना ॥ १ ॥

१०१४ उप ज्ञितस्य पाथो दधन्वे यज्ञस्य यज्ञा पदम् । यज्ञस्य समं गामभिरुथ प्रियम् ॥ २ ॥

१०१५ त्रीणि ज्ञितस्य धारया पृष्ठेष्वेरयदृषिम् । मिमीते अस्य योजना वि सुव्रतः ॥ ३ ॥ ॥१८(री)॥

[ग्रा ८ । उ नास्ति । स्व ४]

१०१६ पवस्व वाजसातये पवित्रे धारया सुतः । इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तमः ॥ १ ॥

१०१७ त्वा रिहन्ति धीतयो हरिं पवित्रे अद्रुहः । वत्सं जातं न मातरः पवमान विधर्मणि ॥२॥

१०१८ त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे । प्रति द्रापिममुञ्च या पवमान महित्वना ॥ ३ ॥१९॥(मा)॥

[ग्रा २४ । उ १ । स्व २]

१०१९ इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोम सहे न्वस्मदाय ।
हिनोति रक्षो वि वरं पवित्रेऽरिष्यन्नूनं वृजनस्य राजा ॥ १ ॥

१०२० अर्ष धारया मध्वा पृचानस्तिरो रोमं पवते अदिदुग्धः ।
इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥ २ ॥

१०२१ अभि व्रतानि पवते पुनानो देवो देवानत्येन रसेन पृञ्चन् ।
इन्दुर्धर्माण्यृतुथा वसानो दशा क्षिपो अव्यत सानो अव्ये ॥ ३ ॥ ॥२०(पी)॥

॥ इति षष्ठं खण्डं ॥ ६ ॥ [ग्रा २ । उ १ स्व ४]

१०२२ आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतभ्य आ भर ॥ १ ॥

१०२३ आ त अग्न ऋचा हविर्हृदा तष्टं भरामसि ।
ते ते भद्रस्य सुमतिं वृणीमहेऽरिं दस्योरचुक्रुधः ॥ २ ॥

१०२४ ओमे सुअग्न्द्र विश्पते दवी श्रीणीष आसनि ।
उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषꣳ स्तोतृभ्य आ भर ॥ ३ ॥ ॥२१(रा)॥
[भा २१ । उ नास्ति । स्व १]

१०२५ इन्द्राय साम गायत विप्राय बृहते बृहत्। मह्रकृते विपश्चिते पनस्यये ॥ १ ॥

१०२६ त्वमिन्द्राभिभूरसि त्वꣳ सूर्यमरोचयः। विश्वकर्मा विश्वदेवो महाꣳ असि ॥ २ ॥

१०२७ विभ्राज ज्योतिषा स्वꣳरग्च्छो रोचन दिवः। देवास्त इन्द्र सख्याय येमिरे ॥ ३ ॥ ॥२२(ष)॥
[भा १५ । उ नास्ति । स्व १]

१०२८ असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि। आ त्वा पृणक्त्विन्द्रियꣳ रज सूर्यो न रश्मिभि ॥ १ ॥

१०२९ आ तिष्ठ वृत्रहन्रथ युक्ता ते ब्रह्मणा हरी। अर्वाचीनꣳ सु ते मनो ग्रावा कृणोतु वग्नुना ॥ २ ॥

१०३० इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम्। ऋषीणाꣳ सुष्टुतीरुप यज्ञꣳ च मानुषाणाम् ॥ ३ ॥ ॥२३(पा)॥
॥ इति सप्तमः खण्डः ॥ ७ ॥ [भा १ । उ १ । स्व २]

इति तृतीयप्रपाठके द्वितीयोऽर्धः ॥ ३ ॥

तृतीयः प्रपाठकश्च समाप्तः ॥ ३ ॥

॥ इति षष्ठोऽध्यायः ॥ ६ ॥

अथ सप्तमोऽध्याय ।

[१]

अथ चतुर्थप्रपाठके प्रथमोऽर्धः ॥ ४ ॥

(१ २४) १ (अकृष्टमाषाश्चय) ऋषयः। २ ११ कश्यपो मारीच। ३ मेधातिथिः काण्वः ४ हिरण्यस्तूप आङ्गिरसः। ५ अवत्सार काश्यपः। ६ जमदग्निर्भार्गवः। ७ २१ कुत्स आङ्गिरसः। ८ वसिष्ठो मैत्रावरुणिः ९ त्रिशोकः काण्वः। १ ययातिर्नाहुष आत्रेयः १२ सप्तर्षयः। (१ भरद्वाजो बार्हस्पत्यः २ कश्यपो मारीच, ३ गोतमो राहूगणः ४ अत्रिर्भौमः ५ विश्वामित्रो गाथिनः ६ जमदग्निर्भार्गव ७ वसिष्ठो मैत्रावरुणिः) १३ सप्तर्षिपुरोगिरसः। १४ शुनःशेप आजीगर्तिः। १५ मधुच्छन्दा वैश्वामित्र। १६ (१ ३ २–पूर्वार्धैः) माध्यातृ औक्षनाश्वः १६ (२ उत्तरार्धैः) गोधा ऋषिका १७ असित काश्यपो देवलो वा, १८ (१) ऋणञ्चयो राजर्षिः १८ (२) कृष्णिर्आङ्गिरसः। १९ पर्वतनारदौ काण्वौ। २ मधुः सांवरण १२ बन्धु सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्च क्रमेण गोपायना लौपायना वा। २३ सुबन्धुः शाण्डिल्यः शमठो वा भौवतः ॥

१–६ ११ १३ १७ २१ पवमान सोमः। ७ २२ अग्निः ८ आदित्याः ९ १७–१९ इन्द्र १ इन्द्राग्नी। १३ विश्वे देवाः १४ ॥ १,७ जगती। २–६ ८ ११ १३–१५, १७ गायत्री, १२ प्रगाथः (विषमा बृहती समा सतोबृहती), १६ महापंक्तिः। १८ (१) पदपंक्त्या गायत्री १८ (२) सतो बृहती, १९ अष्टिः। २ अनुष्टुप्, २१ त्रिष्टुप २२ द्विपदा विराट्, २३ द्विपदा त्रिष्टुप्, १४ ॥

१०३१ ज्योतिर्यज्ञस्य पयते मधु प्रियं पिता देवानां जनिता विभूवसुः।
दधाति रत्नꣳ स्वधयोरपीच्य मदिन्तमो मत्सर इन्द्रियो रसः ॥ १ ॥

१०३२ अभिक्रन्दन्कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः ।
हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषा ॥ २ ॥

१०३३ अग्ने सिन्धूंरा पवमाना अर्षस्यग्ने वाजो अभियो गोषु गच्छसि ।
अग्ने वाजस्य भजसे महन्नर स्वायुध सोतृभिः सोम सूयस ॥ ३ ॥ ॥ १(लु)॥
[धा २१ । ऊ० गायित । स्व ५]

१०३४ अस्मृक्षत प्र वाजिनो गव्या सोमासो अश्व्या । शुम्मासो धीरयाशवः ॥ १ ॥

१०३५ शुम्भमाना ऋतायुभिर्मृज्यमाना गभस्त्योः । पवन्ते वारे अव्यये ॥ २ ॥

१०३६ ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा । पवन्तामान्तरिक्ष्या ॥ ३ ॥ ॥ २(वी) ॥
[धा २ । ऊ गायित । स्व ४]

१०३७ पवस्व देवमीरित पवित्रे सोम रंहसा । इन्द्रमिन्दो वृषा विश ॥ १ ॥

१०३८ आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः । आ योनिं धर्णसिः सदः ॥ २ ॥

१०३९ मधुश्चुत्तमृ मधु धारा सुतस्य वेधसः । अपो वसिष्ट सुक्रतुः ॥ ३ ॥

१०४० महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः । यद्गोभिर्वासयिष्यसे ॥ ४ ॥

१०४१ समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः । सोमः पवित्रे अस्मयुः ॥ ५ ॥

१०४२ अधिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः । सरंस्यूर्णया दिशते ॥ ६ ॥

१०४३ गिरस्त इन्द ओजसा मर्जयन्ति अपस्युवः । यामिर्मदाय शुम्भसे ॥ ७ ॥

१०४४ तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे । तव प्रशस्तये महे ॥ ८ ॥

१०४५ गोषा इन्दो नृषा असि्यश्वसा वाजसा उत । आत्मा यज्ञस्य पूर्व्यः ॥ ९ ॥

१०४६ अस्मभ्यमिन्दविन्द्रियं मधोः पवस्व धारया । पर्जन्यो वृष्टिमाँइव ॥ १० ॥ ॥ ३ (कै) ॥

॥ इति प्रथमः खण्डः ॥ १ ॥ [धा ५१ । ऊ १ । स्व ८]

१०४७ सना च सोम जेषि च पवमान महि श्रवः । अथा नो वस्यसस्कृधि ॥ १ ॥

१०४८ सना ज्योतिः सना स्वर्विश्वा च सोम सौभगा । अथा नो वस्यसस्कृधि ॥ २ ॥

१०४९ सना दक्षमुत क्रतुमप सोम मृधो जहि । अथा नो वस्यसस्कृधि ॥ ३ ॥

१०५० पवीतारः पुनीतन सोममिन्द्राय पातवे । अथा नो वस्यसस्कृधि ॥ ४ ॥

१०५१ स्वरंर्षन्न आ भज तव क्रत्वा तवोतिभिः । अथा नो वस्यसस्कृधि ॥ ५ ॥

१०५२ तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम् । अथा नो वस्यसस्कृधि ॥ ६ ॥

१०५३ अभ्यर्ष स्वायुध सोम द्विबर्हस᳡ रयिम् । अथा नो वस्यसस्कृधि ॥ ७ ॥

१०५४ आ य३र्षानपच्युतो यादजिस्समᳬसासहिः । अथा नो वस्यसस्कृधि ॥ ८ ॥

१०५५ त्वां यवैरवीवृधन्पवमान विधर्मणि । अथा नो वस्यसस्कृधि ॥ ९ ॥

१०५६ रयिं नश्चित्रमाश्विनमिन्दो विश्वायुमा भर । अथा नो वस्यसस्कृधि ॥ १० ॥ ॥४(चा)॥

[धा २१ । उ १ । स्व २]

१०५७ तरत्स मन्दी धावति धारा सुतस्यान्धसः । तरत्स मन्दी धावति ॥ १ ॥

१०५८ उस्रा वेद वसूनां मर्तस्य देव्यवसः । तरत्स मन्दी धावति ॥ २ ॥

१०५९ घ्नन्वृत्रं पुरुष्टुतो रुजः सहस्राणि दधन्हे । तरत्स मन्दी धावति ॥ ३ ॥

१०६० आ यो जिगाᳬ शतं ना सहस्राणि च दधन्हे । तरत्स मन्दी धावति ॥ ४ ॥ ॥ ५(हा) ॥

[धा० ९ । उ नास्ति । स्व २]

१०६१ एते सोमा असृक्षत गृणाना शवसे मदे । मदि तमस्य धारया ॥ १ ॥

१०६२ अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि । सनद्वाजं परि स्रव ॥ २ ॥

१०६३ उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभ । गृणानो जमदग्निना ॥ ३ ॥ ॥ ६ (वि) ॥

[धा १५ । उ नास्ति । स्व १]

१० ४ इमꣳ स्तममर्हत जातवेदसे रथमिव सं महेमा मनीषया ।

भद्रा हि नः प्रमतिरस्य सꣳसद्यग्ने सख्ये मा रिषामा वयं तव ॥ १ ॥

१०६५ भरामेध्मं कृणवामा हवीꣳषि ते चितयन्तः पर्वणापर्वणा वयम् ।

जीवातवे प्रतरां साधया धियोऽग्ने सख्य मा रिषामा वयं तव ॥ २ ॥

१०६६ शकेम त्वा समिधꣳ साधया धियस्त्वे देवा हविरदन्त्याहुतम् ।

त्वमादित्याꣳ आ वह तान्ह्युश्मसि ग्नेमस्यग्ने सख्ये मा रिषामा वयं तव ॥ ३ ॥ ॥७(सौ)॥

॥ इति द्वितीयः खण्डः ॥ २ ॥ [धा ३७ । उ २ । स्व १०]

१०६७ प्रति वाꣳसूर उदिते मित्र गृणीषे वरुणम् । अर्यमण ꣳ रिशादसम् ॥ १ ॥

१०६८ राया हिरण्यया मतिरियमवृकाय शवसे । इयं विप्रा मेधसातये ॥ २ ॥

१०६९ ते स्याम देव वरुण ते मित्र सूरिभि सह । इषꣳ स्थश्च धीमहि ॥ ३ ॥ ॥ ८(हा) ॥

[धा ११ । उ नास्ति । स्व २]

१०७० मिमिध्वं विश्वा अप द्विषः परि बाधो जही मृधः । वसु स्पार्हं तदा भर ॥ ६ ॥

१०७१ यस्य ते विश्वमानुषग्भूर्णेस्तस्य वंदति । वसु स्पार्हं तदा भर ॥ २ ॥

१०७२ यद्गोजाविन्द्र यत्स्थिरं यत्पर्शानं पराभृतम् । वसु स्पार्हं तदा भर ॥ ३ ॥ ९ (धू) ॥

[धा १२ । उ १ । स्व ६]

१०७३ यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु । इन्द्राग्नी तस्य बोधतम् ॥ १ ॥

१०७४ तीव्रासो रथयावानो यूथ्रहणापराजिता । इन्द्राग्नी तस्य बोधतम् ॥ २ ॥

१०७५ इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः । इन्द्राग्नी तस्य बोधतम् ॥ ३ ॥ १० (टा) ॥

॥ इति तृतीयः खण्डः ॥ १ ॥ [धा १४ । उ १ । स्व २]

१०७६ इन्द्रत्येन्दो मरुत्वते पवस्व मधुमत्तमः । अर्कस्य योनिमासदम् ॥ १ ॥

१०७७ तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति धर्णसिम् । स त्वा मृजस्यायवे ॥ २ ॥

१०७८ रसं ते मित्रो अर्यमा पिबन्तु वरुणः कवे । पवमानस्य मरुतः ॥ ३ ॥ ११ (ल) ॥

[धा १४ । उ मार्क्षि । स्व १]

१०७९ मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि । रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥ १ ॥

१०८० पुनानो वारे पवमानो अव्यये वृषा मदिष्कृदद्रुहे ।
देवासः सोम पवमान निष्कृतं गातुमर्षन्तो अर्षसि ॥ २ ॥ १२ (ति) ॥

(धा २४ । उ १ । स्व ३)

१०८१ अस्तभ्नात्स्यं दक्ष क्षितो मृजन्ति सिन्धुमातरम् । समादित्येभिरख्यत ॥ १ ॥

१०८२ समिन्द्रेणोत वायुना सुत एति पवित्र आ । सं सूर्यस्य रश्मिभिः ॥ २ ॥

१०८३ स नो भगाय वायवे पूष्णे पवस्व मधुमान् । चारुर्मित्रे वरुणे च ॥ ३ ॥ १३ (दि) ॥

॥ इति चतुर्थः खण्डः ॥ ४ ॥ [धा ८ । उ १ । स्व ३]

१०८४ रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥ १ ॥

१०८५ आ घ त्वावान्त्मना युक्तः स्तोतृभ्यो धृष्णवीयानः । ऋणोरक्षं न चक्र्योः ॥ २ ॥

१०८६ आ यद् दुवः शतक्रवो कामं जरितॄणाम् । ऋणोरक्षं न शचीभिः ॥ ३ ॥ १४ (टी) ॥

[धा १८ । उ १ । स्व ४]

१०८७ सुरूपकृत्नुमूतये सुदुघामिव गोदुहे । जुहूमसि द्यविद्यवि ॥ १ ॥

१०८८ उप नः सवना गहि सोमस्य सोमपाः पिब । गोदा इद्रेवतो मदः ॥ २ ॥

१०८९ अथा ते अन्तमानां विद्याम सुमतीनाम् । मा नो अति ख्य आ गहि ॥ ३ ॥ १५ (कौ) ॥

[धा ११ । उ १ । स्व मार्क्षि ।]

१०९० उभे यदिन्द्र रोदसी आपप्राथोषा इव । महान्तं त्वा महीनाꣳ सम्राजं चर्षणीनाम् ।
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ १ ॥

१०९१ दीर्घꣳ ह्यङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः । पूर्वेण मघवन्पदा वयामजो यथा यमः ।
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ २ ॥

१०९२ अव स्म दुर्हणायतो मर्त्तस्य तनुहि स्थिरम् । अधस्पदं तमी कृधि यो अस्माꣳ अभिदासति ।
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ ॥ ३ ॥ ॥१६(थौ)॥

इति पञ्चमः खण्डः ॥ ५ ॥ [धा० ४२ । उ० नास्ति । स्व० १०]

१०९३ परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् । मदेषु सर्वधा असि ॥ १ ॥

१०९४ त्वं विप्रस्त्व कविर्मधु प्र जातमन्धसः । मदेषु सर्वधा असि ॥ २ ॥

१०९५ त्वे विश्वे सजोषसो देवासः पीतिमाशत । मदेषु सर्वधा असि ॥ ३ ॥ ॥१७(खा)॥

[धा० ११ । उ० २ । स्व० २]

१०९६ स सुन्वे यो वसूनां यो रायामानेता य इडानाम् । सोमो यः सुक्षितीनाम् ॥ १ ॥

१०९७ यस्य त इन्द्रः पिबाद्यस्य मरुतो यस्य वार्यमणा भगः ।
आ येन मित्रावरुणा करामह एन्द्रमवसे महे ॥ २ ॥ ॥१८(ली)॥

[धा० ९ । उ० नास्ति । स्व० ४]

१०९८ तं वः सखायो मदाय पुनानमभि गायत । शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ॥ १ ॥

१०९९ सं वत्स इव मातृभिरिन्दुर्हिन्वानो अज्यते । देवावीर्मदो मतिभिः परिष्कृतः ॥ २ ॥

११०० अयं दक्षाय साधनोऽयꣳ शर्धाय वीतये । अयं देवेभ्यो मधुमत्तरः सुतः ॥ ३ ॥ ॥१९(घि)॥

[धा० १७ । उ० नास्ति । स्व० ३]

११०१ सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः । मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ॥ १ ॥

११०२ ते पूतासो विपश्चितः सोमासो दध्याशिरः । सूरासो न दशतासो जिगत्नवो ध्रुवा घृते ॥ २ ॥

११०३ सुध्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि । इषमस्मभ्यमभितः समस्वरन्वसुविदः ॥३॥२०॥(वा)॥

[धा० १० । उ० नास्ति । स्व० २]

११०४ अया पवा पवस्वैना वसूनि मारुत्व इन्दो सरसि प्र धन्व ।
व्रध्नश्चित्तस्य वातो न जूति पुरुमेधाश्चित्तकवे नरं धात् ॥ १ ॥

११०५ उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे ।
षष्टिꣳ सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद्रणाय ॥ २ ॥

११०६ महीमे अस्य वृष नाम शूषे मा॑ऽश्वत्वे वा पृशने वा वधत्रे
अस्वापयन्निगुतः स्नेहयच्चापामित्रा॑ऽ अपाचितो अचेतः ॥ ३ ॥॥२१(कि)॥
॥ इति षष्ठः खण्डः ॥६॥ [धा० १६ । उ० १ । स्व० २]

११०७ अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥ १ ॥

११०८ वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमो रयिं दाः ॥ २ ॥

११०९ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥ ३ ॥॥२२(वा)॥
[धा० १५ । उ० नास्ति । स्व० २]

१११० इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ॥ १ ॥

११११ यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह सीषधातु ॥ २ ॥

१११२ आदित्यैरिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा करत् ॥ ३ ॥॥२३(छा)॥
[धा० १२ । उ० २ । स्व० २]

१११३–१५ प्र वोऽर्चोप ॥ १–३ ॥ ॥२४(य)॥
[धा० २ । उ० नास्ति । स्व० १]

इति सप्तमः खण्डः ॥ ७ ॥ इति चतुर्थप्रपाठकस्य प्रथमोऽर्धः ॥ ७ ॥ इति सप्तमोऽध्यायः ॥ ७ ॥

अथाष्टमोऽध्यायः ।

[१]

अथ चतुर्थप्रपाठकस्य द्वितीयोऽर्धः ॥ ४ ॥

(१–१४) १ (१–३) वृषगणो वासिष्ठः; १ (४–१२), २ (१–९) असितः काश्यपो देवलो वा; २ (१०–१२), ११ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा; ३, ६ भरद्वाजो बार्हस्पत्यः; ४ यजत आत्रेयः, ५ मधुरुछन्दा वैश्वामित्रः; ७ सिकता निवावरी; ८ पुरुहन्मा आंगिरसः; ९ पर्वतनारदौ काण्वौ शिखण्डिन्यावप्सरसौ काश्यपौ वा; १० अग्नये धिष्ण्यो ऐश्वराः १२ वत्सः काण्वः; १३ नृमेध आंगिरसः; १४ अत्रिर्भौमः ॥ १–२, ७, ९–११ पवमानः सोमः; ३, १२ अग्निः; ४ मित्रावरुणौ; ५, ८, १३–१४ इन्द्रः; ६ इन्द्राग्नी ॥ (१–३,), ३ त्रिष्टुप्; १ (४–१२), २, ४–६, ११–१२ गायत्री; ७ जगती; ८ प्रगाथः ८ (विषमा बृहती, समा सतो बृहती); ९ उष्णिक्; १० द्विपदा विराट्; १२ (१–२) ककुप् १३ (३) पुर उष्णिक्; १४ अनुष्टुप् ॥

१११६ प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥ १ ॥

१११७ प्र हरिसासस्तृपला वग्नुमच्छामादस्तं वृषगणा अयासुः ।
अक्रोविणं पवमानꣳ सखायो दुर्मर्षं वाणं प्र वदन्ति साकम् ॥ २ ॥

११११८ स योजत उरुगायस्य जूतिं वृथा क्रीडन्तं मिमते न गावः ।
परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर्ददृशे नक्तमृज्रः ॥ ३ ॥

११११९ प्र स्वानासो रथा इवावन्तो न श्रवस्यवः । सोमासो राये अक्रमुः ॥ ४ ॥

११२० हिन्वानासो रथा इव दधन्विरे गभस्त्योः । भरासः कारिणामिव ॥ ५ ॥

११२१ राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते । यज्ञो न सप्त धातृभिः ॥ ६ ॥

११२२ परि स्वानास इन्दवो मदाय बर्हणा गिरा । मधो अर्षन्ति धारया ॥ ७ ॥

११२३ आपानासो विवस्वतो जिन्वन्त उषसो भगम् । सूरा अण्वं वि तन्वते ॥ ८ ॥

११२४ अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः । वृष्णो हरस आयवः ॥ ९ ॥

११२५ समीचीनास आशत होतारः सप्तजानयः । पदमेकस्य पिप्रतः ॥ १० ॥

११२६ नाभा नाभिं न आ ददे चक्षुषा सूर्यं दृशे । कवेरपत्यमा दुहे ॥ ११ ॥

११२७ अभि प्रियं दिवस्पदमध्वर्युभिर्गुहा हितम् । सूरः पश्यति चक्षसा ॥ १२ ॥ ॥१॥ (इं) ॥

॥ इति प्रथमः खण्डः ॥ १ ॥ [ऋ० ५७। उ० ४। स्व० ८]

११२८ अधुक्षन्निन्दवः पथा धर्मन्नृतस्य सुश्रियः । विदाना अस्य योजना ॥ १ ॥

११२९ प्र धारा मधो अग्रियो महीरपो वि गाहते । हविर्हविःषु वन्द्यः ॥ २ ॥

११३० प्र युजा वाचो अग्रियो वृषो अचिक्रदद्वने । सद्माभि सत्यो अध्वरः ॥ ३ ॥

११३१ परि यत्काव्या कविर्नृम्णा पुनानो अर्षति । स्वर्वाजी सिषासति ॥ ४ ॥

११३२ पवमानो अभि स्पृधो विशो राजेव सीदति । यदीमृण्वन्ति वेधसः ॥ ५ ॥

११३३ अध्या वारे परि प्रिया हरिर्वनेषु सीदति । रेभो वनुष्यते मती ॥ ६ ॥

११३४ स वायुमिन्द्रमश्विना साकं मदेन गच्छति । रणा यो अस्य धर्मणा ॥ ७ ॥

११३५ आ मित्रे वरुणे भगे मधोः पवन्त ऊर्मयः । विदाना अस्य शक्मभिः ॥ ८ ॥

११३६ अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये । श्रवो वसूनि सञ्जितम् ॥ ९ ॥

११३७ आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे । पान्तमा पुरुस्पृहम् ॥ १० ॥

११३८ आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणम् । पान्तमा पुरुस्पृहम् ॥ ११ ॥

११३९ आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा । पान्तमा पुरुस्पृहम् ॥ १२ ॥ ॥२(ण)॥

॥ ॥ इति द्वितीयः खण्डः ॥ २ ॥ [ऋ० ३८। उ० ५। स्व० ११]

११४० मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविꣳ सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः ॥ १ ॥

११४१ त्वां विश्वे अमृत जायमानꣳ शिशुं न देवा अभि सं नवन्ते ।
तव क्रतुभिरमृतत्वमायन् वैश्वानर यत्पित्रोरदीदेः ॥ २ ॥

११४२ नाभिं यज्ञानाꣳ सदनꣳ रयीणां महामाहावमभि सं नवन्त ।
वैश्वानरꣳ रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः ॥ ३ ॥ ॥३॥ (कु)॥

[धा० २६ । उ० १ । स्व० ५]

११४३ प्र वो मित्राय गायत वरुणाय विपा गिरा । महिक्षत्रावृतं बृहत् ॥ १ ॥

११४४ सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च । देवा देवेषु प्रशस्ता ॥ २ ॥

११४५ ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य । महि वां क्षत्रं देवेषु ॥ ३ ॥ ॥४(र)॥

[धा० १३ । उ० नास्ति । स्व० १]

११४६ इन्द्रा याहि चित्रभानो सुता इमे त्वायवः । अण्वीभिस्तना पूतासः ॥ १ ॥

११४७ इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः । उप ब्रह्माणि वाघतः ॥ २ ॥

११४८ इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥ ३ ॥ ॥५(हो)॥

[धा० १६ । उ० नास्ति । स्व० ८]

११४९ तमीङ्ख्व यो अर्चिषा वना विश्वा परिष्वजत् । कृष्णा कृणोति जिह्वया ॥ १ ॥

११५० य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः । द्युम्नाय सुतरा अपः ॥ २ ॥

११५१ ता नो वाजवतीरिष आशून् पिपृतमर्वतः । एन्द्रमग्निं च वोढवे ॥ ३ ॥ ॥६(य)॥

॥ इति तृतीयः खण्डः ॥ ३ ॥ [धा० ७ । उ० नास्ति । स्व० १]

११५२ प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतꣳ सखा सख्युर्न प्र मिनाति सङ्गिरम् ।
मर्य इव युवतिभिः समर्षति सोमः कलशे शतयामना पथा ॥ १ ॥

११५३ प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवरणेष्वक्रमुः ।
हरिं क्रीडन्तमभ्यनूषत स्तुभोऽभि धेनवः पयसेदशिश्रयुः ॥ २ ॥

११५४ आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमान ऊर्मिणा ।
या नो दोहते त्रिरह्नन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम ॥ ३ ॥ ॥७(ठि)॥

[धा० २८ । उ० २ । स्व० ३]

११५५ न किष्टं कर्मणा नशदश्रकार सदावृधम्। इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥ १ ॥

११५६ अषाढमुग्रं पूतनासु सासहिं यस्मिन्महीरुरुज्रयः।
सं धेनवो जायमाने अनोनवुर्द्यावः क्षामीरनोनवुः ॥ २ ॥ ॥८(ह्वी)॥

॥ इति चतुर्थः खण्डः ॥४॥ [धा० १६ । उ० नास्ति । स्व० ४]

११५७ सख्याय आ नि षीदत पुनानाय प्रगायत। शिशुं नः यज्ञैः परि भूषत श्रिये ॥ १ ॥

११५८ समी वत्सं न मातृभिः सृजता गयसाधनम्। देवाव्यमदभिं द्विशवसम् ॥ २ ॥

११५९ पुनाता दक्षसाधनं यथा शर्धाय वीतये। यथा मित्राय वरुणाय शन्तमम् ॥ ३ ॥ ॥९(पि)॥

[धा० १५ । उ० १ । स्व० ३]

११६० प्र वाज्यक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यम् ॥ १ ॥

११६१ स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः ॥ २ ॥

११६२ प्र सोम याहीन्द्रस्य कुक्षा नृभिर्यमानो अद्रिभिः सुतः ॥ ३ ॥ ॥१०(पु)॥

[धा० १५ । उ० १ । स्व० ५]

११६३ ये सोमासः परावति ये अर्वावति सुन्विरे। ये वादः शर्यणावति ॥ १ ॥

११६४ य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम्। ये वा जनेषु पञ्चसु ॥ २ ॥

११६५ ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम्। स्वाना देवास इन्दवः ॥ ३ ॥ ११॥(चि)॥

॥ इति पञ्चमः खण्डः ॥ ५ ॥ [धा० ७ । उ० १ । स्व० ३]

११६६ आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्। अग्ने त्वां कामये गिरा ॥ १ ॥

११६७ पुरुत्रा हि सदङ्ङसि दिशो विश्वा अनु प्रभुः। समत्सु त्वा हवामहे ॥ २ ॥

११६८ समत्स्वग्निमवसे वाजयन्तो हवामहे। वाजेषु चित्रराधसम् ॥ ३ ॥ ॥११(ठा)॥

[धा० १३ । उ० २ । स्व० २]

११६९ त्वं न इन्द्रा भर ओजो नृम्णꣳ शतक्रतो विचर्षणे। आ वीरं पृतनासहम् ॥ १ ॥

११७० त्वꣳ हि नः पिता वसो त्वं माता शतक्रतो बभूविथ। अधा ते सुम्नमीमहे ॥ २ ॥

११७१ त्वाꣳ शुष्मिन्पुरुहूत वाजयन्तमुप ब्रुवे सहस्कृत। स नो रास्व सुवीर्यम् ॥ ३ ॥ ॥१२॥(ल)॥

[धा० १४ । उ० ना० । स्व० १]

११७२ यदिन्द्र चित्र मिह नास्ति त्वादातमद्रिवः। राधस्तनो विदद्वसु उभयाहस्त्या भर ॥१॥

११७३ यस्मान्यते वरेण्यमिन्द्र शुष्मं तदा भर। विद्याम तस्य ते वयमकूपारस्य दावनः ॥ २ ॥

११७४ यत्त दिक्षु प्रराध्यं मनो अस्ति श्रुतं बृहत् । तेन दृढा चिदद्रिव आ वाजं दर्षि सातये ॥३॥ ॥१४(पी)॥

॥ इति षष्ठः खण्डः ॥ ६ ॥ [धा० २५ । उ० १ । स्व० ४]

॥ इति चतुर्थप्रपाठके द्वितीयोऽर्धः ॥ २ ॥ चतुर्थप्रपाठकश्च समाप्तः ॥ ४ ॥

॥ इति अष्टमोऽध्यायः ॥ ८ ॥

अथ नवमोऽध्यायः ।

अथ पञ्चमप्रपाठके प्रथमोऽध्यायः ॥५॥

[१]

(१–२०) १ प्रतर्दनो दैवोदासिः २, ३, ४ असितः काश्यपो देवलो वा; ५, ११ उचथ्य आंगिरसः; ६, ७ अग्नी युराङ्गिरसः; ८, १५ निध्रुविः काश्यपः; ९ वसिष्ठो मैत्रावरुणिः; १० सुकक्ष आंगिरसः; १२ कविर्भार्गवः; १३ देवातिथिः काण्वः; १४ भर्गः प्रागाथः; १६ अम्बरीषो वार्षागिरः ऋजिश्वा भारद्वाजश्च; १७ अग्नये क्षिप्रेण ऐक्षराः; १८ उशना काव्यः; १९ नृमेध आंगिरसः; २० जेता माधुच्छन्दसः ॥ १–८, ११–१३, १५–१७ पवमानः सोमः; ९, १८ अग्निः; १०, १३, १४, १९–२० इन्द्रः ॥ १-९ त्रिष्टुप्; २–८, १०–११, १५, १८ गायत्री; जगती १३, १४ प्रगाथः= (विषमा बृहती, समा सतोबृहती); १६,२० अनुष्टुप्; १७ द्विपदा विराट्; १९ उष्णिक् ॥

११७५ शिशुं जज्ञानꣳ हर्यतं मृजन्ति शुम्भन्ति विप्रं मरुतो गणेन ।
कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभन् ॥ १ ॥

११७६ ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रणीथः पदवीः कवीनाम् ।
तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप् ॥ २ ॥

११७७ चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुद्रप्स आयुधानि बिभ्रत् ।
अपामूर्मिꣳ सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥ ३ ॥ ॥१(लु)॥

[धा० २४ । उ० ना० । स्व० ५]

११७८ एते सोमा अभि प्रियमिन्द्रस्य कामक्षरन् । वर्धन्तो अस्य वीर्यम् ॥ १ ॥

११७९ पुनानासश्चमूषदो गच्छन्तो वायुमश्विना । ते नो धत्त सुवीर्यम् ॥ २ ॥

११८० इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय । देवानां योनिमासदम् ॥ ३ ॥

११८१ मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः । अनु विप्रा अमादिषुः ॥ ४ ॥

११८२ देवेभ्यस्त्वा मदाय कꣳ सृजानमति मेष्यः । सं गोभिर्वासयामसि ॥ ५ ॥

११८३ पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः । परि गव्यान्यव्यत ॥ ६ ॥

११८४ मधोन आ पवस्व नो जहि विश्वा अप द्विषः । इन्दो सम्वायमा विश ॥ ७ ॥

११८५ नृचक्षसं त्वा वयमिन्द्रपीतꣳ स्वर्विदम् । भक्षीमहि प्रजामिषम् ॥ ८ ॥

११८६ वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि । सहो नः सोम पृत्सु धाः ॥ ९ ॥ ॥ २(नि) ॥
॥ इति प्रथमः खण्डः ॥ १ ॥ [धा० ३९ । उ० १ । स्व० १३]

११८७ सोमः पुनानो अर्षति सहस्रधारो अत्यविः । वायोरिन्द्रस्य निष्कृतम् ॥ १ ॥

११८८ पवमानमवस्यवो विप्रमभि प्र गायत । सुष्वाणं देववीतये ॥ २ ॥

११८९ पवन्ते वाजसातये सोमाः सहस्रपाजसः । गृणाना देववीतये ॥ ३ ॥

११९० उत नो वाजसातये पवस्व बृहतीरिषः । द्युमदिन्दो सुवीर्यम् ॥ ४ ॥

११९१ अत्या हियाना न हेतृभिरसृग्रं वाजसातये । वि वारमव्यमाशवः ॥ ५ ॥

११९२ ते नः सहस्रिणꣳ रयिं पवन्तामा सुवीर्यम् । स्वाना देवास इन्दवः ॥ ६ ॥

११९३ वाश्रा अर्षन्तीन्दवोऽभि वत्सं न मातरः । दधन्विरे गभस्त्योः ॥ ७ ॥

११९४ जुष्ट इन्द्राय मत्सरः पवमानः कनिक्रदत् । विश्वा अप द्विषो जहि ॥ ८ ॥

११९५ अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः । योनावृतस्य सीदत ॥ ९ ॥ ॥३(दु) ॥
॥ इति द्वितीयः खण्डः ॥ २ ॥ [धा० ३९ । उ० ३ । स्व० ६]

११९६ सोमा असृग्रमिन्दवः सुता ऋतस्य धारया । इन्द्राय मधुमत्तमाः ॥ १ ॥

११९७ अभि विप्रा अनूषत गावो वत्सं न धेनवः । इन्द्रꣳ सोमस्य पीतये ॥ २ ॥

११९८ मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित् । सोमो गौरी अधि श्रितः ॥ ३ ॥

११९९ दिवो नाभा विचक्षणोऽव्या वारे महीयते । सोमो यः सुक्रतुः कविः ॥ ४ ॥

१२०० यः सोमः कलशेष्वा अन्तः पवित्र आहितः । तमिन्दुः परि षस्वजे ॥ ५ ॥

१२०१ प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि । जिन्वन्कोशं मधुश्चुतम् ॥ ६ ॥

१२०२ नित्यस्तोत्रो वनस्पतिर्धेनामन्तः सबर्दुघाम् । हिन्वानो मानुषा युजा ॥ ७ ॥

१२०३ आ पवमान धारया रयिꣳ सहस्रवर्चसम् । अस्मे इन्दो स्वाभुवम् ॥ ८ ॥

१२०४ अभि प्रिया दिवः कविर्विप्रः स धारया सुतः । सोमो हिन्वे परावति ॥ ९ ॥॥ ४(भे)॥
॥ इति तृतीयः खण्डः ॥३॥ [धा० ४० । उ० ४ । स्व० ७]

१२०५ उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः । वाणस्य चोदया पविम् ॥ १ ॥

१२०६ प्रसवे त उदीरते तिस्रो वाचो मखस्युवः । यदव्य एषि सानवि ॥ २ ॥

१२०७ अव्या वारैः परि प्रियꣳ हरिꣳ हिन्वन्त्यद्रिभिः । पवमानं मधुश्चुतम् ॥ ३ ॥

१२०८ आ पवस्व मदिन्तम पवित्रं धारया कवे। अर्कस्य योनिमासदम् ॥ ४ ॥

१२०९ स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः। इन्द्रस्य जठरं विश ॥ ५ ॥ ॥५(का)॥

॥ इति चतुर्थः खण्डः ॥ ४ ॥ [धा० ३१ । उ० १ । स्व० २]

१२१० अया वीती परि स्रव यस्त इन्दो मदेष्वा। अवाहन्नवतीर्नव ॥ १ ॥

१२११ पुरः सद्य इत्थाधिये दिवोदासाय शंबरम्। अध त्यं तुर्वशं यदुम् ॥ २ ॥

१२१२ परि नो अश्वमश्वविद्गोमदिन्दो हिरण्यवत्। क्षरा सहस्रिणीरिषः ॥ ३ ॥ ६(हि)॥

[धा० ११ । उ० नास्ति । स्व० ५]

१२१३ अपघ्नन्पवते मृधोऽप सोमो अराव्णः। गच्छन्निन्द्रस्य निष्कृतम् ॥ १ ॥

१२१४ महो नो राय आ भर पवमान जही मृधः। रास्वेन्दो वीरवद्यशः ॥ २ ॥

१२१५ न त्वा शतं च न हूतो राधो दिन्सन्तमा मिनन्। यत्पुनानो मखस्यसे ॥ ३ ॥ ॥७(खा)॥

[धा० ११ । उ० २ । स्व० २]

१२१६ अया पवस्व धारया यया सूर्यमरोचयः। हिन्वानो मानुषीरपः ॥ १ ॥

१२१७ अयुक्त सूर एतशं पवमानो मनावधि। अन्तरिक्षेण यातवे ॥ २ ॥

१२१८ उत त्या हरितो रथे सूरो अयुक्त यातवे। इन्दुरिन्द्र इति ब्रुवन् ॥ ३ ॥ ॥८(का)॥

॥ इति पञ्चमः खण्डः ॥५॥ [धा० ११ । उ० १ । स्व० २]

१२१९ अग्निं वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वम्।
यो मर्त्येषु निध्रुविरृतावा तपुर्मूर्धा घृतान्नः पावकः ॥ १ ॥

१२२० प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात्।
आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥ २ ॥

१२२१ उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः।
अच्छा द्यामरुषो धूम एषि सं दूतो अग्न ईयसे हि देवान् ॥ ३ ॥ ॥९(दी)॥

[धा० १८ । उ० १ । स्व० ४]

१२२२ तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे। स वृषा वृषभो भुवत् ॥ १ ॥

१२२३ इन्द्रः स दामने कृत ओजिष्ठः स त्वले हितः। द्युम्नी श्लोकी स सोम्यः ॥ २ ॥

१२२४ गिरा वज्रो न सम्भृतः सवलो अनपच्युतः। ववक्ष उग्रो अस्तृतः ॥ ३ ॥ ॥१०(छे)॥

॥ इति षष्ठः खण्डः ॥ ६ ॥ [धा० १७ । उ० २ । स्व० ७]

१२२५ अध्वर्यो अद्रिभिः सुतꣳ सोमं पवित्र आ नय। पुनाहीन्द्राय पातवे ॥ १ ॥

१२२६ तव त्य इन्दो अन्धसो देवा मधोर्व्यश्नत। पवमानस्य मरुतः ॥ २ ॥

१२२७ दिवः पीयूषमुत्तमꣳ सोममिन्द्राय वज्रिणे। सुनोता मधुमत्तमम् ॥ ३ ॥॥११(स्वा)॥

[धा० ११ । उ० २ । स्व० ९]

१२२८ धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजाꣳसि कृणुषे नदीष्वा ॥ १ ॥

१२२९ शूरो न धत्त आयुधा गभस्त्योः स्वञ्जः सिषासन्नधिरो गविष्टिषु।
इन्द्रस्य शुष्ममीरयन्नपस्युभिरिन्दुर्हिन्वानो अज्यते मनीषिभिः ॥ २ ॥

१२३० इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्वा विश।
प्र नः पिन्व विद्युदभ्रेव रोदसी धिया नो वाजाꣳ उप माहि शश्वतः ॥ ३ ॥॥१२(चा)॥

[धा० २७ । उ० १ । स्व० २]

१२३१ यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः। सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥ १ ॥

१२३२ यद्वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा।
कण्वासस्त्वा स्तोमेभिर्ब्रह्मवाहस इन्द्रा यच्छन्त्या गहि ॥ २ ॥ १३(कि)॥

[धा० ११ । उ० १ । स्व० ३]

१२३३ उभयꣳ शृणवच्च न इन्द्रो अर्वागिदं वचः। सत्राच्या मघवान्त्सोमपीतये धिया शविष्ठ आ गमत् ॥ १ ॥

१२३४ तꣳ हि स्वराजं वृषभं तमोजसा धिषणे निष्टतक्षतुः।
उतोपमानां प्रथमो नि षीदसि सोमकामꣳ हि ते मनः ॥ २ ॥ १४(घी)॥

॥ इति सप्तमः खण्डः ॥ ७ ॥ [धा० १७ । उ० १ । स्व० ४]

१२३५ पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः। वायुमा रोह धर्मणा ॥ १ ॥

१२३६ पवमान नि तोशसे रयिꣳ सोम श्रवाय्यम्। इन्दो समुद्रमा विश ॥ २ ॥

१२३७ अपघ्नन्पवसे मृधः ॥ ३ ॥ ॥१५(लि)॥

[धा० १४ । उ० नास्ति । स्व० ३]

१२३८ अभी नो वाजसातमम् ॥ १ ॥

१२३९ वयं ते अस्य राधसो वसोर्वसो पुरुस्पृहः । नि नेदिष्ठतमा इषः स्याम सुम्ने ते अद्रिवो ॥२॥

१२४० परि स्य स्वानो अक्षरदिन्दुरव्ये मदच्युतः ।

१२१ धारा व ऊर्ध्वा अध्वरे भ्राजा न याति गव्ययुः ॥ ३ ॥१६(ली)॥

[धा० १४ । ऊ० नास्ति । स्व० ४]

१२४१ पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥ १ ॥

१२४२ शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजाभ्यः ॥ २ ॥

१२४३ दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व ॥ ३ ॥१७(हि)॥

॥ इत्यष्टमः खण्डः ॥ ८ ॥ [धा० ११ । ऊ० नास्ति । स्व० ३]

१२४४ प्रेष्ठं वो अतिथिꣳ स्तुषे मित्रमिव प्रियम् । अग्ने रथं न वेद्यम् ॥ १ ॥

१२४५ कविमिव प्रशꣳस्यं यं देवास इति द्विता । नि मर्त्येष्वादधुः ॥ २ ॥

१२४६ त्वं यविष्ठ दाशुषो नॄꣳ पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ॥ ३ ॥१८(यी)॥

[धा० १२ । ऊ० नास्ति । स्व० ४]

१२४७ एन्द्र नो गधि प्रिय सत्राजिदगोह्य । गिरिर्न विश्वतः पृथुः पतिर्दिवः ॥ १ ॥

१२४८ अभि हि सत्य सोमपा उभे बभूथ रोदसी । इन्द्रासि सुन्वतो वृधः पतिर्दिवः ॥ २ ॥

१२४९ त्वꣳ हि शश्वतीनामिन्द्र धर्ता पुरामसि । हन्ता दस्योर्मनोवृधः पतिर्दिवः ॥ ३ ॥१९(फे)॥

[धा० २० । ऊ० २ । स्व० ७]

१२५० पुरां भिन्दुर्युवा कविरमितौजा अजायत । इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥१॥

१२५१ त्वं बलस्य गोमतोऽपावरद्रिवो बिलम् । त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥ २ ॥

१२५२ इन्द्रमीशानमोजसाभि स्तोमैरनूषत । सहस्र यस्य रातय उत वा सन्ति भूयसीः ॥ ३ ॥२०(ही)॥

॥ इति नवमः खण्डः ॥ ९ ॥ [धा० ११ । ऊ० नास्ति । स्व० ४]

इति पञ्चमप्रपाठके प्रथमोऽर्धः ॥ ५-१ ॥

नवमोऽध्यायः समाप्तः ॥ ९ ॥

अथ दशमोऽध्यायः ।

[१]

अथ पञ्चमप्रपाठकस्य द्वितीयोऽर्धः ॥ ५ ॥

(१-२३) १ पराशरः शाक्त्यः; २ शुनःशेप आजीगर्तिः स देवरातः कौशिको वैश्वामित्रः; ३ असितः काश्यपो देवलो वा; ४,७, ब्रह्मन आंगिरसः; ५ (१-४), ५ (प्रथम पादः) प्रियमेध आंगिरसः; ५ (शेषाक्षयः पादाः) ६ (प्रथमं पादः) १४ नृमेध आंगिरसः; ६ (शेषाक्षयः पादाः) द्युम्नबाह्वो दार्ढच्युतः; ८ पवित्र आंगिरसो वा वसिष्ठो वा उभौ वा; ९ वसिष्ठो मैत्रावरुणिः; १० वत्सः काण्वः; ११ शतं वैखानसः; १२ सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः, २ काश्यपो मारीचः, ३ गोतमो राहूगणः, ४ अत्रिर्भौमः; ५ विश्वामित्रो गाथिनः, ६ जमदग्निर्भार्गवः; ७ वसिष्ठो मैत्रावरुणिः); १३ वसुर्भारद्वाजः; १५ भर्गः प्रागाथः; १६ भरद्वाजो बार्हस्पत्यः; १७ मनुराप्सवः; १८ अम्बरीषो वार्षागिरः ऋजिश्वा भारद्वाजश्च; १९ अग्नयो धिष्ण्या ऐश्वराः, २० अमहीयुरांगिरसः, २१ त्रिशोकः काण्वः; २२ गोतमो राहूगणः; २३ मधुच्छन्दा वैश्वामित्रः ॥ १-७, ११-१३, १६-२० पवमानः सोमः, ८ पवमानाध्येता, ९, १४-१५, २१ (२-३), २२-२३ इन्द्रः; ९ अग्निः, २१ (१) अग्नीन्द्रौ ॥ १,९ त्रिष्टुप्; २-७, १०-११, १६, २०-२१ गायत्री; ८, १८, २३ अनुष्टुप्, १२ (१-२), १४, १५ प्रगाथः = (बृहती, सतोबृहती): १३ (३), १९ द्विपदा विराट्; १३ जगती, १७, २२ उष्णिक् ॥

१२५३ अक्रान्त्समुद्रः प्रथमो विधर्मन् जनयन्प्रजा भुवनस्य गोपाः ।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः ॥ १ ॥

१२५४ मस्मि वायुमिष्टये राधसे नो मस्मि मित्रावरुणा पूयमानः ।
मस्मि शर्धो मारुतं मस्मि देवान्मस्मि द्यावापृथिवी देव सोम ॥ २ ॥

१२५५ मह्यन्त्सोमो महिषश्चकारापां यद्भोऽवृणीत देवान ।
मदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥ ३ ॥ १(टै) ॥
[धा० २८ । उ० १ । स्व० ८]

१२५६ एष देवो अमर्त्यः पर्णवीरिव दीयते । अभि द्रोणान्यासदम् ॥ १ ॥

१२५७ एष विप्रैरभिष्टुतोऽपो देवो वि गाहते । दधद्रत्नानि दाशुषे ॥ २ ॥

१२५८ एष विश्वानि वार्या शूरो यन्निव सत्वभिः । पवमानः सिषासति ॥ ३ ॥

१२५९ एष देवो रथर्यति पवमानो दिशस्यति । आविष्कृणोति वग्वनुम् ॥ ४ ॥

१२६० एष देवो विपन्युभिः पवमान ऋतायुभिः । हरिर्वाजाय मृज्यते ॥ ५ ॥

१२६१ एष देवो विपा कृतोऽति ह्वरांसि धावति । पवमानो अदाभ्यः ॥ ६ ॥

१२६२ एष दिवं वि धावति तिरो रजांसि धारया । पवमानः कनिक्रदत् ॥ ७ ॥

१२६३ एष दिवं व्यासरत्तिरो रजा॑स्यस्रुतः । पवमानः स्वध्वरः ॥ ८ ॥
१२६४ एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः । हरिः पवित्रे अर्षति ॥ ९ ॥
१२६५ एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः । धारया पवते सुतः ॥१०॥ ॥ २(दू) ॥

॥ इति प्रथमः खण्डः ॥१॥ [धा० ३४ । उ० ३ । स्व० ६]

१२६६ एष धिया यात्यण्व्या शूरो रथेभिराशुभिः । गच्छन्निन्द्रस्य निष्कृतम् ॥ १ ॥
१२६७ एष पुरू धियायते बृहते देवतातये । यत्रामृतास आशत ॥ २ ॥
१२६८ एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः । प्रचक्राणं महीरिषः ॥ ३ ॥
१२६९ एष हितो वि नीयतेऽन्तः शुन्ध्यावता पथा । यदी तुञ्जन्ति भूर्णयः ॥ ४ ॥
१२७० एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः । पतिः सिन्धूनां भवन् ॥ ५ ॥
१२७१ एष शृङ्गाणि दोधुवच्छिशीते यूथ्यो३ वृषा । नृम्णा दधान ओजसा ॥ ६ ॥
१२७२ एष वस्त्रानि पिव्यनः पस्त्या॑ यावेव॑ अति । अव शादेषु गच्छति ॥ ७ ॥
१२७३ एतमु त्यं दश क्षिपो हरिं॑ हिन्वन्ति यातवे । स्वायुधं मदिन्तमम् ॥ ८ ॥ ॥ ३(के) ॥

॥ ॥ इति द्वितीयः खण्डः ॥ २ ॥ [धा० ३१ । उ० १ । स्व० ७]

१२७४ एष उ स्य वृषा रथोऽव्या वारेभिरव्यत । गच्छन्वाजं॑ सहस्रिणम् ॥ १ ॥
१२७५ एतं त्रितस्य योषणो हरिं॑ हिन्वन्त्यद्रिभिः । इन्दुमिन्द्राय पीतये ॥ २ ॥
१२७६ एष स्य मानुषीष्वा श्येनो न विक्षु सीदति । गच्छं जारो न योषितम् ॥ ३ ॥
१२७७ एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः । य इन्दुर्वारमाविशत् ॥ ४ ॥
१२७८ एष स्य पीतये सुतो हरिर्नर्षति धर्णसिः । क्रन्दन्योनिमभि प्रियम् ॥ ५ ॥
१२७९ एतं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः । याभिर्मदाय शुम्भते ॥ ६ ॥ ॥४(वी)॥

॥ इति तृतीयः खण्डः ॥ ३ ॥ [धा० २५ । उ० ८ । स्व० ४]

१२८० एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः । अव्यं वारं वि धावति ॥ १ ॥
१२८१ एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः । विश्वा धामान्यावि॑शन् ॥ २ ॥
१२८२ एष देवः शुभायतेऽधि योनावमर्त्यः । वृत्रहा देववीतमः ॥ ३ ॥
१२८३ एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः । अभि द्रोणानि धावति ॥ ४ ॥
१२८४ एष सूर्यमरोचयत्पवमानो अधि द्यवि । पवित्रे मत्सरो मदः ॥ ५ ॥

१२८५ एष सूर्येण हासते संवसानो विवस्वता । पतिर्वाचो अदाभ्यः ॥ ६ ॥ ॥ ५(के) ॥

॥ इति चतुर्थः खण्डः ॥४॥ [ऋा० २६ । उ० १ । स्व० ७]

१२८६ एष कविरभिष्टुतः पवित्रे अधि तोशते । पुनानो घ्नन्नप द्विषः ॥ १ ॥

१२८७ एष इन्द्राय वायवे स्वर्जिन्परि षिच्यते । पवित्रे दक्षसाधनः ॥ २ ॥

१२८८ एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः । सोमो वनेषु विश्वचित् ॥ ३ ॥

१२८९ एष गव्युरचिक्रदत्पवमानो हिरण्ययुः । इन्दुः सत्राजिदस्तृतः ॥ ४ ॥

१२९० एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः । पुनान इन्दुरिन्द्रमा ॥ ५ ॥

१२९१ एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति । देवावीरघशंसहा ॥ ६ ॥ ॥ ६(शु) ॥

॥ इति पञ्चमः खण्डः ॥ ५ ॥ [ऋा० ३१ । उ० ३ । स्व० ५]

१२९२ स सुतः पीतये वृषा सोमः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥ १ ॥

१२९३ स पवित्रे विचक्षणो हरिरर्षति धर्णसिः । अभि योनिं कनिक्रदत् ॥ २ ॥

१२९४ स वाजी रोचनं दिवः पवमानो वि धावति । रक्षोहा वारमव्ययम् ॥ ३ ॥

१२९५ स त्रितस्याधि सानवि पवमानो अरोचयत् । जामिभिः सूर्यं सह ॥ ४ ॥

१२९६ स वृत्रहा वृषा सुतो वरिवोविददाभ्यः । सोमो राजेवासरत् ॥ ५ ॥

१२९७ स देवः कविनेषितो ऽभि द्रोणानि धावति । इन्दुरिन्द्राय मंहयन् ॥ ६ ॥ ॥ ७(से) ॥

॥ इति षष्ठः खण्डः ॥ ६ ॥ [ऋा० २१ । उ० २ । स्व० ७]

१२९८ यः पावमानीरध्येत्यृषिभिः संभृतं रसम् । सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ॥ १ ॥

१२९९ पावमानीर्यो अध्येत्यृषिभिः संभृतं रसम् । तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ॥ २ ॥

१३०० पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः । ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हितम् ॥ ३ ॥

१३०१ पावमानीर्दिशन्तु न इमं लोकमथो अमुम् । कामान्त्समर्धयन्तु नो देवीर्देवैः समाहिताः ॥ ४ ॥

१३०२ येन देवाः पवित्रेणात्मानं पुनते सदा । तेन सहस्रधारेण पावमानीः पुनन्तु नः ॥ ५ ॥

१३०३ पावमानीः स्वस्त्ययनीस्ताभिर्गच्छति नान्दनम् ।
पुण्या च भक्षान्भक्षयत्यमृतत्वं च गच्छति ॥ ६ ॥ ॥ ८ (नी) ॥

॥ इति सप्तमः खण्डः ॥ ७ ॥ [ऋा० ४४ । उ० १ । स्व० ४]

१३०४ अगन्म महा नमसा यविष्ठं यं दीदाय समिद्धः स्वे दुरोणे ।
चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् ॥ १ ॥

१३०५ स मह्ना विश्वा दुरितानि साह्वानग्ने त्रष्वे दम आ जातवेदाः ।
स नो रक्षिषद्दुरितादघादस्मान्गृणत उत नो मघोनः ॥ २ ॥

१३०६ त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः ।
त्वे वसु सुभगनानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥ ॥२(ही)॥
[धा० २१ । उ० नास्ति स्व० ८]

१३०७ महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव । स्तोमैर्वत्सस्य वावृधे ॥ १ ॥

१३०८ कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम् । जामि ब्रुवत आयुधा ॥ २ ॥

१३०९ प्रजामृतस्य पिप्रतः प्र यक्षन्त वह्नयः । विप्रा ऋतस्य वाहसा ॥ ३ ॥ ॥१०(टि)॥
॥ इति अष्टमः खण्डः ॥ ८ ॥ [धा० ८ । उ० १ । स्व० ३]

१३१० पवमानस्य जिघ्नतो हरेश्चन्द्रा असृक्षत । जीरा अजिरशोचिषः ॥ १ ॥

१३११ पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः । हरिश्चन्द्रो मरुद्गणः ॥ २ ॥

१३१२ पवमान व्यश्नुहि रश्मिभिर्वाजसातमः । दधत्स्तोत्रे सुवीर्यम् ॥ ३ ॥ ॥११(ह)॥
[धा० ११ । उ० नास्ति । स्व० १]

१३१३ परीतो षिञ्चता सुतं सोमो य उत्तमं हविः ।
दधन्वाँ यो नर्यो अप्स्वन्तरा सुषाव सोममद्रिभिः ॥ १ ॥

१३१४ नूनं पुनानोऽविभिः परि स्रवादव्यः सुरभिनरः ।
सुते चित्वाप्सु मदामो अंधसा श्रीणन्तो गोभिरुत्तरम् ॥ २ ॥

१३१५ परि स्वानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः ॥ ३ ॥ ॥१२(स्वा)॥
[धा० १३ । उ० २ । स्व० २]

१३१६ अस्रावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारमत्येष्यव्ययं श्येनो न योनिं घृतवन्तमासदत् ॥ १ ॥

१३१७ पर्जन्यः पिता महिष्यस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।
स्वसारं आपो अभि गा उदाभरन्तं श्रावभिर्धमते वीते अध्वरे ॥ २ ॥

१३१८ कविर्वेधस्या पर्येषि माहिनमन्यो न मृष्टो अभि वाजमर्षसि ।
अपसेधन् दुरिता सोम नो मृड घृता वसानः परि यासि निर्णिजम् ॥ ३ ॥ ॥१३(गू)॥
॥ इति नवमः खण्डः ॥ ९ ॥ [धा० २६ । उ० ३ । स्व० ६]

१३१९ श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत। वसूनि जातो जनिमान्योजसा प्रति भागं न दीधिमः ॥ १ ॥

१३२० अलर्षिरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः।
यो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥२ ॥१४(लृ)॥

[धा० १५। उ० नास्ति। स्व० ६]

१३२१ यत इन्द्र भयामहे ततो नो अभयं कृधि। मघवन् छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि ॥१॥

१३२२ त्वꣳ हि राधसस्पते राधसो महः क्षयस्यासि विधर्ता।
ते त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥ २ ॥१५(वा)॥

इति दशमः खण्डः ॥ १० ॥ [धा० २०। उ० ३। स्व० २]

१३२३ त्वꣳ सोमासि धारयुरिन्द्र ओजिष्ठो अध्वरे। पवस्व मꣳहयद्रयिः ॥ १ ॥

१३२४ त्वꣳ सुतो मदिन्तमो दधन्वान्मत्सरिन्तमः। इन्दुः सत्राजिदस्तृतः ॥ २ ॥

१३२५ त्वꣳ सुष्वाणो अद्रिभिरभ्यꣳ कनिक्रदत्। द्युमन्तꣳ शुष्ममा भर ॥ ३ ॥१६॥(लौ)॥

[धा० १४। उ० नास्ति। स्व० ४]

१३२६ पवस्व देववीतय इन्दो धाराभिरोजसा। आ कलशं मधुमान्त्सोम नः सदः ॥ १ ॥

१३२७ तव द्रप्सा उदप्रुत इन्द्र मदाय वावृधुः। त्वां देवासो अमृताय कं पपुः ॥ २ ॥

१३२८ आ नः सुतास इन्दवः पुनाना धावता रयिम्। वृष्टिद्यावो रीत्यापः स्वर्विदः ॥ ३ ॥१७(वौ)॥

[धा० १५। उ० नास्ति। स्व० नास्ति]

१३२९ परि त्यꣳ हर्यतꣳ हरिं बभ्रुं पुनन्ति वारेण। यो देवान्विश्वाꣳ इत्परि मदेन सह गच्छति ॥ १ ॥

१३३० द्विर्यं पञ्च स्वयशसꣳ सखायो अद्रिसꣳहतम्। प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त ऊर्मयः ॥ २ ॥

१३३१ इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे। नरे च दक्षिणावते वीराय सदनासदे ॥ ३ ॥ १८(जौ)॥

[धा० २२। उ० ३। स्व० ४]

१३३२ पवस्व सोम मधु दक्षायाश्वो न निक्तो वाजी धनाय ॥ १ ॥

१३३३ प्र ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ॥ २ ॥

१३३४ शिशुं जज्ञानꣳ हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम् ॥ ३ ॥१९(का)॥

[धा० ११। उ० १। स्व० २]

१३३५ उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम्। इन्दुं देवा अयासिषुः ॥ १ ॥

१३३६ तमिद्वर्धन्तु नो गिरो वत्सꣳसꣳशिश्वरीरिव। य इन्द्रस्य हृदꣳ सनिः ॥ २ ॥

१३३७ अर्षा नः सोम द्यो गवे धुक्षस्व पिप्युषीमिषम् । वर्धा समुद्रमुक्थ्य ॥ ३ ॥ ॥२०(ही)॥

॥ इति एकादशः खण्डः ॥ ११ ॥ [धा० ११ । ऊ० नास्ति । स्व० ४]

१३३८ आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा ॥ १ ॥

१३३९ बृहन्निदिध्म एषां भूरि शस्रं पृथुः स्वरुः । येषामिन्द्रो युवा सखा ॥ २ ॥

१३४० अयुज्रु इद्धरी वृतर्ं शूर आजति सत्वभिः । येषामिन्द्रो युवा सखा ॥ ३ ॥ ॥२१(ट)॥

[धा० ३ । ऊ० २ । स्व० १]

१३४१ य एक इद्विदयते वसु मर्ताय दाशुषे । ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥ १ ॥

१३४२ यश्चिद्धि त्वा बहुभ्य आ सुतावाँआविवासति । उग्रं तत्पत्यते शव इन्द्रो अङ्ग ॥ २ ॥

१३४३ कदा मतमरार्धसं पदा क्षुम्पमिव स्फुरत् । कदा नः शुश्रवद्गिर इन्द्रो अङ्ग ॥ ३ ॥ ॥२२(कि)॥

[धा० ११। ऊ० १ । स्व० ३]

१३४४ गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमार्किणः । ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥ १ ॥

१३४५ यत्सानोः सान्वारुहो भूर्यस्पष्ट कर्त्वम् । तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥ २ ॥

१३४६ युंक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा । अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥ ३ ॥ ॥२३(वी)॥

॥ इति द्वादशः खण्डः ॥ १२ ॥ [धा० २५ । ऊ० ३ । स्व० ४]

इति पञ्चमप्रपाठके द्वितीयोऽर्धः, पञ्चमप्रपाठकश्च समाप्तः॥ ५-२ ॥

॥ इति दशमोऽध्यायः ॥ १० ॥

अथ एकादशोऽध्यायः ।

[१]

अथ षष्ठप्रपाठके प्रथमोऽर्धः ॥ ६ ॥

(१-११) मेधातिथिः काण्वः, २, १० वसिष्ठो मैत्रावरुणिः; ३ प्रगाथः काण्वः, ४ पराशरः शाक्त्यः, ५ प्रगाथो घौरः काण्वः; ६ मेध्यातिथिः काण्वः; ७ त्र्यरुणस्त्रैवृष्णः, त्रसदस्युः पौरुकुत्स्यः; ८ अप्नयो धिष्ण्या ऐश्वराः; ९ द्विरण्यस्तूप आङ्गिरसः; १० सार्पराज्ञी ॥ १ आग्नीसूक्तं= (१ इध्मः समिद्धोऽग्निर्वा, २ तनूनपात्, ३ नराशंसः, ४ इळः); २ आदित्याः; ३, ५-६ इन्द्रः, ४, ७-९ पवमानः सोमः; १० अग्निः; ११ आत्मा, सूर्यो वा । १-३ ११ गायत्री; ४ त्रिष्टुप्; ५-६ प्रस्तारपंक्तिः=(विषमा बृहती, समा सतोबृहती); ७ पिपीलिकमध्या अनुष्टुप्; ८ द्विपदा विराट्; ९ जगती; १० विराट् ॥

१३४७ सुषमिद्धो न आ वह देवाँ अग्ने हविष्मते । होतः पावक यक्षि च ॥ १ ॥

१३४८ मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे । अद्या कृणुह्यूतये ॥ २ ॥

१३४९ नराशंसमिह प्रियमस्मिन्यज्ञ उप ह्वये । मधुजिह्वं हविष्कृतम् ॥ ३ ॥

१३५० अग्ने सुखतमे रथे देवाꣳ ईडित आ वह । असि होता मनुर्हितः ॥ ४ ॥ ॥ १(रा) ॥

[धा० १८ । उ० नास्ति । स्व० २]

१३५१ यदद्य सूर उदितेऽनागा मित्रो अर्यमा । सुवाति सविता भगः ॥ १ ॥

१३५२ सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः । ये नो अꣳहोऽतिपिप्रति ॥ २ ॥

१३५३ उत स्वराजो अदितिरदब्धस्य व्रतस्य ये । महो राजान ईशते ॥ ३ ॥ ॥२(खि)॥

[धा० ११ । उ० २ । स्व० ३]

१३५४ उ त्वा मदन्तु सोमाः कृणुष्व राधो अद्रिवः । अव ब्रह्मद्विषो जहि ॥ १ ॥

१३५५ एदा पणीनराधसो नि बाधस्व महाꣳ असि । न हि त्वा कश्च न प्रति ॥ २ ॥

१३५६ त्वमीशिषे सुतानामिन्द्र त्वमसुतानाम् । त्वꣳ राजा जनानाम् ॥ ३ ॥ ॥३ (ठि) ॥

॥ इति प्रथमः खण्डः ॥ १ ॥ [धा० १३ । उ० २ । स्व० ३]

१३५७ आ जागृविर्विप्र ऋतं मतीनाꣳ सोमः पुनानो असदच्चमूषु ।
सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ॥ १ ॥

१३५८ स पुनान उप सूरे दधान ओभे अप्रा रोदसी वी ष आवः ।
प्रिया चिद्यस्य प्रियसास ऊती सतो धने कारिणे न प्र यꣳसत् ॥ २ ॥

१३५९ स वर्धिता वर्धनः पूयमानः सोमो मीढ्वाꣳ अभि नो ज्योतिषावित् ।
यत्र नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमिष्णन् ॥ ३ ॥ ॥४ (तै) ॥

[धा० १९ । उ० १ । स्व० ८]

१३६० मा चिदन्यद्वि शꣳसत सखायो मा रिषण्यत ।
इन्द्रमित्स्तोता वृषणꣳ सचा सुते मुहुरुक्था च शꣳसत ॥ १ ॥

१३६१ अवक्रक्षिणं वृषभं यथा जुवं गां न चर्षणीसहम् ।
विद्वेषणꣳ संवननमुभयङ्करꣳ हिष्ठमुभयाविनम् ॥ २ ॥ ५ ॥(यी) ॥

[धा० १७ । उ० ना । स्व० ४]

१३६२ उदु त्ये मधुमत्तमा गिरः स्तोमास ईरते । सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥१॥

१३६३ कण्वा इव भृगवः सूर्या इव विश्वमिदीधितमाशत ।
इन्द्रꣳ स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् ॥ २ ॥ ॥ ६(ला)॥

[धा० १४ । उ० नास्ति । स्व० २]

१३६४ पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः । द्विषस्तरध्या ऋणया न ईरसे ॥ १ ॥

१३६५ अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः । गोजीरया रंहमाणः पुरन्ध्या ॥ २ ॥

१३६६ अनु हि त्वा सुतं सोम मदामसि ॥ ३ ॥ ॥ ७(ल)॥

[धा० ९] उ० नास्ति । स्व० १]

१३६७ परि प्र धन्व ॥ १ ॥

१३६८ एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ॥ २ ॥

१३६९ इन्द्रस्ते सोम सुतस्य पेयात्क्रत्वे दक्षाय विश्वे च देवाः ॥ ३ ॥ ॥ ८(ला)॥

॥ इति द्वितीयः खण्डः ॥२॥ [धा० ९ । उ० नास्ति । स्व० २]

१३७० सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुतः साकमीरते ।
तन्तुं ततं परि सर्गास आशवो नेन्द्राहते पवते धाम किं चन ॥ १ ॥

१३७१ उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरासनि ।
पवमानः सन्तनिः सुन्वतामिव मधुमान्द्रप्सः परि वारमर्षति ॥ २ ॥

१३७२ उक्षा मिमेति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम् ।
अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत ॥ ३ ॥ ॥ ९(ग)

[धा० २६ । उ० ३ । स्व० १]

१३७३ अग्निं नरो दीधितिभिररण्योर्हस्तच्युतं जनयत प्रशस्तम् । दूरेदृशं गृहपतिमथव्युम् ॥१॥

१३७४ तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित् । दक्षाय्यो यो दम आस नित्यः ॥२॥

१३७५ प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूम्या यविष्ठ । त्वां शश्वन्त उप यन्ति वाजाः ॥३॥ ॥१०(डी)

[धा० २८ । उ० ३ । स्व० ४]

१३७६ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ १ ॥

१३७७ अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो दिवम् ॥ २ ॥

१३७८ त्रिंशद्धाम वि राजति वाक्पतङ्गाय धीयते । प्रति वस्तोरह द्युभिः ॥ ३ ॥ ॥११(छि)

॥ इति तृतीयः खण्डः ॥३॥ [धा० १७ । उ० २ । स्व० ३]

इति षष्ठप्रपाठके प्रथमोऽर्धः ॥ ६-१ ॥

एकादशोऽध्यायः समाप्तः ॥ ११ ॥

अथ द्वादशोऽध्यायः।

[१]

अथ षष्ठप्रपाठके द्वितीयोऽर्धः ॥६-२॥

(१-२०) १ (१-२) गोतमो राहूगणः; १ (३), ८, ११ वसिष्ठो मैत्रावरुणिः; २, ७ भरद्वाजो बार्हस्पत्यः; ३ प्रजापतिर्वैश्वामित्रो वाच्यो वा; ४, १३ सोभरिः काण्वः; ५ मेधातिथि-मेध्यातिथी काण्वौ; ६ (१) ऋजिश्वा भारद्वाजः; ६ (२) ऊर्ध्वसद्मा आंगिरसः, ९ तिरश्चीराङ्गिरसः; १० सुतंभर आत्रेयः; १२, १९ नृमेध-पुरुमेधावाङ्गिरसौ; १४ शुनःशेप आजीगर्तिः; १५ नोधा गौतमः १६ मेध्यातिथिः काण्वः; १७ रेणुर्वैश्वामित्रः; १८ कुत्स आङ्गिरसः; २० अगस्त्यो मैत्रावरुणः॥ १-२, ७, १०, १३-१४ अग्निः; ३, ६, ८, ११, १५, १७-१८ पवमानः सोमः; ४, ५, ९, १२, १६, १९, २० इन्द्रः॥ १-२, ७, १०, १४, गायत्री; ३,९,१९ (१-२) २० (२-३) अनुष्टुप्; ४, ६-१३ काकुभः प्रगाथः= (विषमा ककुप्, समा सतोबृहती); ५, १५ (३), बृहती; ८, ११, १५, १८ त्रिष्टुप्; १२, १६ प्रगाथः = (विषमा बृहती, समा सतोबृहती); १७ जगती; २० (१) स्कन्धोग्रीवी बृहती ॥

३ १ २ ३१ २र ३ १२ ३२ ३ १ २ ३२
१३७०. उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये। आरे अस्मे च शृण्वते ॥ १ ॥

१ २र ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
१३८०. यः ऋहितीषु पूर्व्यः संजग्मानासु कृष्टिषु। अरक्षद्दाशुषे गयम् ॥ २ ॥

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
१३८१. स नो वेदो अमात्यमग्नी रक्षतु शन्तमः। उतास्मान्पात्वंहसः ॥ ३ ॥

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
१३८२. उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि। धनञ्जयो रणेरणे ॥ ४ ॥ १(ति) ॥

॥ इति प्रथमः खण्डः ॥ १ ॥ [धा० १९ । ऋ० १ । ऋ० ३]

१ २ ३ १ २र ३ १ २ ३ १ २ ३ १ २
१३८३. अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः। अरं वहन्त्याशवः ॥ १ ॥

१ २ ३ १ २ ३ १ २र ३ १ २ २ ३ १ २र
१३८४. अच्छा नो याह्या वहाभि प्रयांसि वीतये। आ देवान्त्सोमपीतये ॥ २ ॥

१ २ ३१ २र ३१ २ ३ १ ३
१३८५. उद्ने भारत द्युमदजस्रेण दविद्युतत्। शोचा वि भाह्यजर ॥ ३ ॥ २(यी)॥

[धा० १७ । ऋ० नास्ति । ऋ० ४]

१ २ ३ १ २र ३१ ३ १ २ ३ १ २र २ ३ १ २ ३ १ २ ३ २ ३ १ २र
१३८६. प्र सुन्वानायान्धसो मतीं न वष्ट तद्दचः। अप श्वानमराधसꣳ हता मखं न भृगवः ॥ १ ॥

२ ३ १ २र ३१२ ३ २ ३क २र १ २ ३ १ २र ३ १ १२ ३ १ २
१३८७. आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः। सरज्जारो न योषणां वरो न योनिमासदम् ॥ २ ॥

२ ३ १ २ ३ १ २ ३ २ड ३ १ ३ १२ १ २ ३ १ २ ३ १ २र ३ १ २
१३८८. स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी। हरिः पवित्रे अव्यत वेधा न योनिमासदम् ॥ ३ ॥ ३(त्रै)॥

[धा० २१ । ऋ० २ । ऋ० ८]

३ २ ३ १ २र ३ १ २ ३ १ २ ३ १ २
१३८९. अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि। युधेदापित्वमिच्छसे ॥ १ ॥

१ २ ३ १ २ ३ १ २ ३ १ २ ३क २र
१३९०. न की रेवन्तꣳ सख्याय विन्दसे पीयन्ति ते सुराश्वः।
३ २ ३ १ २ ३ १ २र ३ २ड ३ १ २
यदा कृणोषि नदनुꣳसमूहस्यादित्पितेव हूयसे ॥ २ ॥ ॥ ४(वि)॥

[धा० १५ । ऋ० १ । ऋ० ३]

१३९१ आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये । ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥ १ ॥

१३९२ आ त्वा रथे हिरण्यये हरी मयूरशेप्या । शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये ॥ २ ॥

१३९३ पिबा त्वꣳस्य गिर्वणः सुतस्य पूर्वपा इव । परिष्कृतस्य रसिन इयमासुतिश्चारुमदाय पत्यते॥३॥५(प)

[धा० २० । उ० १ । स्व० १]

१३९४ आ सोता परि षिञ्चताश्वं न स्तोममप्तुरꣳरजस्तुरम् । वनप्रक्षमुदप्रुतम् ॥ १ ॥

१३९५ सहस्रधारं वृषभं पयोदुहं प्रियं देवाय जन्मने ।
ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् ॥ २ ॥६(या)॥

॥ इति द्वितीयः खण्डः ॥२॥ [धा० १२ । उ० नास्ति । स्व० २]

१३९६ अग्निवृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः ॥ १ ॥

१३९७ गर्भे मातुः पितुः पिता विदिद्युतानो अक्षरे । सीदन्नृतस्य योनिमा ॥ २ ॥

१३९८ अह्न प्रजावदा भर जातवेदो विचर्षणे । अग्ने यहीदयादिवि ॥ ३ ॥ ७(ब)॥

[धा० १० । उ० नास्ति । स्व० १]

१३९९ अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
सुतः पवित्र पर्येति रेभन्मितेव सद्म पशुमन्ति होता ॥ १ ॥

१४०० भद्रा वस्त्रा समन्याꣳ वसानो महान्कविर्निवचनानि शꣳसन् ।
आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ॥ २ ॥

१४०१ समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे ।
अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥८(रि)॥

[धा० १८ । उ० नास्ति । स्व० ३]

१४०२ एतो न्विन्द्रꣳस्तवाम शुद्धꣳशुद्धेन साम्ना । शुद्धैरुक्थैर्वावृध्वाꣳसꣳशुद्धैराशीर्वान्ममत्तु ॥ १ ॥

१४०३ इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः । शुद्धो रयिं वि धारय शुद्धो ममद्धि सोम्य ॥ २ ॥

१४०४ इन्द्र शुद्धो हि नो रयिꣳ शुद्धो रत्नानि दाशुषे ।
शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजꣳ सिषाससि ॥ ३ ॥९.(यी)॥

॥ इति तृतीयः खण्डः ॥ ३ ॥ [धा० १२ । उ० नास्ति । स्व० ४]

१४०५ अग्ने स्तोमं मनामहे सिध्रमद्य दिविस्पृशः । देवस्य द्रविणस्यवः ॥ १ ॥

१४०६ अग्निर्जुषत नो गिरो होता यो मानुषेष्वा । स यक्षद्दैव्यं जनम् ॥ २ ॥

१४०७ त्वमग्ने स्वप्रथा असि जुष्टो होता वरेण्यः। त्वया यज्ञं वि तन्वते ॥ ३ ॥ ॥१०(रि)॥

[धा० १३। उ० नास्ति। स्व० ३]

१४०८ अभि त्रिपृष्ठं वृषणं वयोधामक्षोणिषमवावशंत वाणीः।
वना वसानो वरुणो न सिन्धुर्वि रत्नधा दयते वार्याणि ॥ १ ॥

१४०९ शूरग्रामः सर्ववीरः सहावान् जेता पवस्व सनिता धनानि।
तिग्मायुधः क्षिप्रधन्वा समत्स्वसाढः साह्वान्पृतनासु शत्रून् ॥ २ ॥

१४१० उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरन्धी।
अपः सिषासन्नुषसः स्व३र्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ॥ ३ ॥ ॥११(५)॥

[धा० ३०। उ० १। स्व० ६]

१४११ त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः। त्वं वृत्राणि हर्य स्यप्रतीन्येक इत्पुरुनुत्तक्षर्षणीधृतिः ॥१॥

१४१२ तमु त्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे।
महीव कृत्तिः शरणा त इन्द्र प्र ते सुम्ना नो अश्नवन् ॥ २ ॥ ॥१२(त)॥

[धा० १४। उ० १। स्व० १]

१४१३ यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारमप्रयुम्। अस्य यज्ञस्य सुक्रतुम् ॥ १ ॥

१४१४ अपां नपातं सुभगं सुदीदितिमग्निमु श्रेष्ठशोचिषम्।
स नो मित्रस्य वरुणस्य सो अपामा सुम्ने यक्षते दिवि ॥ २ ॥ ॥१३(ता)॥

॥ इति चतुर्थः खण्डः ॥४॥ [धा० १४। उ० १। स्व० २]

१४१५ यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः। स यन्ता शश्वतीरिषः ॥ १ ॥

१४१६ न किरस्य सहन्त्य पर्येता कयस्य चित्। वाजो अस्ति श्रवाय्यः ॥ २ ॥

१४१७ स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता। विप्रेभिरस्तु सनिता ॥ ३ ॥ ॥१४(ठा)॥

[धा० १८। उ० २। स्व० २]

१४१८ साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥ १ ॥

१४१९ सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः।
मर्यो न योषामभि निष्कृतं यन्त्सं गच्छते कलशे शतयामभिः ॥ २ ॥

१४२० उत प्र पिप्य ऊधरघ्न्याया इन्दुधारासिः सचते सुमेधाः ।
मृधानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्कैः ॥ ३ ॥१२५(यू)॥
[धा० २० । उ० नास्ति । स्व० ६]

१४२१ पिबा सुतस्य रसिनो मत्सा न इन्द्र गोमतः ।
आपिर्नो बोधि सधमाद्ये वृधेऽस्माꣳ अवन्तु ते धियः ॥ १ ॥

१४२२ भूयाम ते सुमतौ वाजिनो वयं मा न स्तरभिमातये ।
अस्मां चित्राभिरवतादभिष्टिभिर्ग नः सुम्नेषु यामय ॥ २ ॥१२६(ल्ह)॥
[धा० १४ । उ० नास्ति । स्व० १]

१४२३ त्रिरस्मै सप्त धेनवो दुदुह्रिरे सत्यामाशिरं परमे व्योमनि ।
चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत ॥ १ ॥

१४२४ स भक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे ।
तेजिष्ठा अपो मरुद्भना परि व्यत यदी देवस्य श्रवसा सदो विदुः ॥ २ ॥

१४२५ ते अस्य सन्तु केतवोऽमृत्यवोऽदाभ्यासो जनुषी उभे अनु ।
येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णत ॥ ३ ॥१२७ (त्रे)।
॥ इति पञ्चमः खण्डः ॥ ५ ॥ [धा० ३२ । उ० १ । स्व० ७]

१४२६ अभि वायुं वीत्यर्षा गृणानोऽभि मित्रावरुणा पूयमानः ।
अभी नरं धीजवनꣳ रथेष्ठामभीन्द्रं वृषणं वज्रबाहुम् ॥ १ ॥

१४२७ अभि वत्सा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः ।
अभि चन्द्रा भर्तवे नो हिरण्याभ्यश्वाञ्रथिनो देव सोम ॥ २ ॥

१४२८ अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः ।
अभि येन द्रविणमश्नवामाभ्यार्षेय जमदग्निवत्सः ॥ ३ ॥ ॥१२८(खे)
[धा० २१ । उ० २ । स्व० ७]

१४२९ यज्ञायथा अपूर्व्य मघवन्वृत्रहत्याय । तत्पृथिवीमप्रथयस्तदस्त्रभ्ना उतो दिवम् ॥ १ ॥

१४३० तत्ते यज्ञो अजायत तदर्क उत हस्कृतिः । तद्विश्वमभिभूरसि यज्ञानं यज्ञ जन्वम् ॥ २ ॥

१४३१ आमासु पक्वमैरय आ सूर्यꣳ रोहयो दिवि ।
घर्मं न साम तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत् ॥ ३ ॥ ॥१२९ (पे)
(धा० ३० । उ० १ । स्व० ७)

१४३२ मत्स्यपायि ते महः पात्रस्येव हरिवो मत्सरो मदः । वृषा ते वृष्ण इन्दुर्वाजी सहस्रसातमः ॥ १ ॥

१४३३ आ नस्ते गन्तु मत्सरो वृषा मदो वरेण्यः । सहावाँ इन्द्र सानसिः पूतनाषाडमर्त्यः ॥ २ ॥

१४३४ त्वꣳ हि शूरः सनिता चोदयो मनुषो रथम् ।
सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा ॥३॥ ॥(२०)वि॥

॥ इति षष्ठः खण्डः ॥ ६ ॥ [धा० २५ । उ० ३ । स्व० ३]

॥ इति षष्ठप्रपाठके द्वितीयोऽर्धः ॥ ६-२ ॥

इति द्वादशोऽध्यायः समाप्तः ॥ १२ ॥

अथ त्रयोदशोऽध्यायः ।

[३]

अथ षष्ठप्रपाठके तृतीयोऽर्धः ॥ ६-३ ॥

(१-२०) १ कविर्भार्गवः; २, ९, १६ भरद्वाजो बार्हस्पत्यः; ३ असितः काश्यपो देवलो वा, ४ सुकक्षः आङ्गिरसः; ५ विश्वाट्सौर्यः; ६, ८ वसिष्ठो मैत्रावरुणिः; १०-१७ भार्गवः प्रागाथः; १०, १७ विश्वामित्रो गाथिनः; ११ मेधातिथिः काण्वः; १२ शतं वैखानसाः; १३ यजत आत्रेयः; १४ मधुच्छन्दा वैश्वामित्रः; १५ उशना काव्यः; १८ हर्यतः प्रागाथः; १९ कृष्णो रात्रिर्वा आथर्वणः; २० गृत्समदः शौनकः ॥ १,३, १५ पवमानः सोमः; २, ४, ६, ७, १४, १९, २० इन्द्रः; ८ सरस्वान्; ९ सरस्वती; १० सविता; ११ ब्रह्मणस्पतिः; १२ अग्निः पवमानः; १३ मित्रावरुणौ; १६-१८ अग्निः, १८ इवींधि वा; ५ सूर्यः ॥ १, ३-४, ८-१४, १६ (२-३) १८ गायत्री, २ (१-३) अनुष्टुप्, २ (४) बृहती, ६, ७ प्रगाथः=(विषमा बृहती, समा सतोबृहती), १६ (१) वर्धमाना, १९ त्रिष्टुप्; २० (१) अष्टिः; २० (२-३) अतिशाक्करी, ५ जगती ॥ १५

१४३५ पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि । अयक्ष्मा बृहतीरिषः ॥ १ ॥

१४३६ तया पवस्व धारया यया गाव इहागमन् । जन्यास उप नो गृहम् ॥ २ ॥

१४३७ घृतं पवस्व धारया यज्ञेषु देववीतमः । अस्मभ्यं वृष्टिमा पव ॥ ३ ॥

१४३८ स न ऊर्जे व्यव्ययं पवित्र धाव धारया । देवासः शृणवन् हि कम् ॥ ४ ॥

१४३९ पवमानो असिष्यदद्रक्षाꣳस्यपजङ्घनत् । प्रन्नवद्रोचयन्नुचः ॥ ५ ॥१(वी)॥

[धा० २२ । उ० १ । स्व० ४]

१४४० प्रत्यस्मै पिपीषते विश्वानि विदुषे भर । अरङ्गमाय जग्मयेऽपश्चादध्वने नरः ॥ १ ॥

१४४१ एमेनं प्रत्येतन सोमेभिः सोमपातमम् । अमत्रेभिर्ऋजीषिणमिन्द्रꣳ सुतेभिरिन्दुभिः ॥२॥

१४४२ यदी सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ । वेदा विश्वस्य मेधिरो धृषत्तन्तमिदेषते ॥३॥

१४४३ अस्माअस्मा इदन्धसोऽध्वर्यो प्र भरा सुतम् । कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्वरत् ॥२(ठ)

॥ इति प्रथमः खण्डः ॥ १ ॥ [धा० २३ । उ० २ । स्व० १]

१४४४ वभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे । सोमाय गाथमर्चत ॥ १ ॥

१४४५ हस्तच्युतेभिरद्रिभिः सुतꣳ सोमं पुनीतन । मधावा धावता मधु ॥ २ ॥

१४४६ नमसेदुप सीदत दभ्नेदभि श्रीणीतन । इन्दुमिन्द्रे दधातन ॥ ३ ॥

१४४७ अमित्रहा विचर्षणिः पवस्व सोम शं गवे । देवेभ्यो अनुकामकृत् ॥ ४ ॥

१४४८ इन्द्राय सोम पातवे मदाय परि षिच्यसे । मनश्चिन्मनसस्पतिः ॥ ५ ॥

१४४९ पवमान सुवीर्यꣳ रयिꣳ सोम रिरीहि णः । इन्द्रविन्द्रेण नो युजा ॥ ६ ॥ ॥ ३(यृ) ॥

[धा० ३२ । उ० नास्ति । स्व० ६]

१४५० उद्धेदभि श्रुतामघं वृषभं नर्यापसम् । अस्तारमेषि सूर्य ॥ १ ॥

१४५१ नव यो नवतिं पुरो बिभेद बाह्वोजसा । अहिं च वृत्रहावधीत् ॥ २ ॥

१४५२ स न इन्द्रः शिवः सखाश्वावद्गोमद्यवमत् । उरुधारेव दोहते ॥ ३ ॥ ॥ ४(नी)॥

॥ इति द्वितीयः खण्डः ॥ २ ॥ [धा० ९ । उ० १ । स्व० ४]

१४५३ विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविंहुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ॥ १ ॥

१४५४ विभ्राड् बृहन्सुभृतं वाजसातमं धर्म दिवो धरुणे सत्यमर्पितम् ।
अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर्जज्ञे असुरहा सपत्नहा ॥ २ ॥

१४५५ इदꣳ श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिज्जनजिदुच्यते बृहत् ।
विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम् ॥ ३ ॥ ॥५(जि)॥

[धा० २७ । उ० ३ । स्व० ३]

१४५६ इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा । शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि॥१

१४५७ मा नो अज्ञाता वृजना दुराध्यो३ माशिवासोऽव क्रमुः ।
त्वया वयं प्रवतः शश्वतीरपोति शूर तरामसि ॥ २ ॥ ॥६(ल) ॥

[धो० ५ । उ० नास्ति । स्व० १]

१४५८ अद्याद्या श्वःश्व इन्द्र त्रास्व परे च नः । विश्वा च नो जरितॄन्त्सत्पते अहा दिवा नक्तं च रक्षिषः ॥१॥

१४५९ प्रभङ्की शूरो मघवा तुवीमघः सम्मिश्लो वीर्याय कम् ।
उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः ॥ २ ॥ ॥ ७(वी)॥

॥ इति तृतीयः खण्डः ॥ ३ ॥ [धा० १५ । उ० नास्ति । स्व० ४]

१४६० जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः । सरस्वन्तꣳहवावहे ॥ १ ॥ ॥८(गौ)॥

[धा० ३ । उ० नास्ति । स्व० नास्ति]

१४६१ उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा । सरस्वती स्तोम्या भूत ॥ १ ॥ ॥ ९(हौ)॥

[धा० १ । उ० नास्ति । स्व० नास्ति]

१४६२ तत्सावितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ १ ॥

१४६३ सोमानां स्वरणं । ॥ २ ॥

१४६४ अग्न आयूꣳषि पवसे । ॥ ३ ॥ ॥१०(य)॥

[धा० २ । उ० नास्ति । स्व० १]

१४६५ ता नः शक्तं पार्थिवस्य ॥ १ ॥

१४६६ ऋतमृतेन सपन्तेषिरं दक्षमाशाते । अद्रुहा देवौ वर्धेते ॥ २ ॥

१४६७ वृष्टिमावा रीत्यापेस्पती दानुमत्याः । बृहन्ता गतमाशाते ॥ ३ ॥ ॥११(षा)॥

[धा० ५ । उ० १ । स्व० २]

१४६८ युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥ १ ॥

१४६९ युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥ २ ॥

१४७० केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥ ३ ॥ ॥१२(य)॥

॥ इति चतुर्थः खण्डः ॥ ४ ॥ [धा० ७ । उ० नास्ति । स्व० १]

१४७१ अयꣳसोम इन्द्र तुभ्यꣳसुन्वे तुभ्यं पवते त्वमस्य पाहि ।
त्वꣳह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् ॥ १ ॥

१४७२ स ईꣳरथो न भुरिषाडयोजि महः पुरूणि सातये वसूनि ।
आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त ॥ २ ॥

१४७३ शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।
आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न यज्ञः ॥ ३ ॥ ॥१३(त्री)॥

[धा० २६ । उ० ४ । स्व० ४]

१४७४ त्वमग्ने यज्ञानाꣳहोता विश्वेषामꣳहितः । देवेभिमानुषे जने ॥ १ ॥

१४७५ स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः । आ देवान्वक्षि यक्षि च ॥ २ ॥

१४७६ वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा । अग्ने यजेषु सुक्रतो ॥ ३ ॥ ॥१४(हौ)॥
[धा० ६ । उ० नास्ति । स्व० नास्ति]

१४७७ होता देवो अमर्त्यः पुरस्तादेति मायया । विदथानि प्रचोदयन् ॥ १ ॥

१४७८ वाजी वाजेषु धीयतेऽध्वरेषु प्र णीयते । विप्रो यज्ञस्य साधनः ॥ २ ॥

१४७९ श्रिया चक्रे वरेण्यो भूतानां गर्भमा दधे । दक्षस्य पितरं तना ॥ ३ ॥ ॥१५(रा)॥
इति पञ्चमः खण्डः ॥ ५ ॥ [धा० १३ । उ० नास्ति । स्व० २]

१४८० आ सुते सिञ्चत श्रियं रोदस्योरभिश्रियम् । रसा दधीत वृषभम् ॥ १ ॥

१४८१ ते जानत स्वमोक्यꣳ सं वत्सासो न मातृभिः । मिथो नसन्त जामिभिः ॥ २ ॥

१४८२ उप स्रक्वेषु बप्सतः कृण्वते धरुणं दिवि । इन्द्रे अशा नमः स्वः ॥ ३ ॥ ॥ १६(च)॥
[धा० १२ । उ० १ । स्व० १]

१४८३ तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥ १ ॥

१४८४ वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति ।
अव्यनच्च व्यनच्च सस्नि सं ते नवन्त प्रभृता मदेषु ॥ २ ॥

१४८५ त्वं क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः ।
स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥ ३ ॥ ॥१७(गौ)॥
[धा० २३ । उ० ५ । स्व० ४]

१४८६ त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृम्पत्सोममपिबद्विष्णुना सुतं यथावशम् ।
स ईं ममाद महि कर्म कर्तवे महामुरुꣳ सैनꣳ सश्चद्देवो देवꣳ सत्य इन्दुः सत्यमिन्द्रम् ॥ १ ॥

१४८७ सोकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः ।
दाता राध स्तुवते काम्यं वसु प्रचेतन सैनꣳ सश्चद्देवो देवꣳ सत्य इन्दुः सत्यमिन्द्रम् ॥ २ ॥

१४८८ अध त्विषीमाꣳ अभ्योजसा कृविं युधाभवदा रोदसी आपृणद्दस्य मज्मना प्र वावृधे ।
अधास्मै जठरे प्रमरिष्यत प्र चेतय सैनꣳ सश्चद्देवो देवꣳ सत्य इन्दुः सत्यमिन्द्रम् ॥३॥ ॥१८(पि)॥
॥ इति षष्ठः खण्डः ॥ ६ ॥ [धा० ५४ । उ० २ । स्व० १३]

॥ इति षष्ठप्रपाठके तृतीयोऽर्धः षष्ठः प्रपाठकश्च समाप्तः ॥ ६ ॥

इति त्रयोदशोऽध्यायः ॥ १३ ॥

अथ चतुर्दशोऽध्यायः।

[१]

अथ सप्तमप्रपाठके प्रथमोऽर्धः ॥ ७-१ ॥

(१-१६) १, ९ प्रियमेध आङ्गिरसः; २ नृमेध-पुरुमेधावाङ्गिरसौ; ३, ७ त्र्यरुणस्त्रैवृष्णः, त्रसदस्युः पौरुकुत्सः; ४ शुनःशेप आजीगर्तिः; ५ वत्सः काण्वः; ६ अग्निस्तापसः; ८ विश्वमना वैयश्वः; १० वसिष्ठो मैत्रावरुणिः; ११ सौभरिः काण्वः; १२ शतं वैखानसः; १३ वसूयव आत्रेयः; १४ गोतमो राहूगणः; १५ केतुरग्नेयः; १६ विरूप आङ्गिरसः ॥ १-२, ५, ८-९ इन्द्रः; ३, ७ पवमानः सोमः; ४, १०-११, १३-१६ अग्निः; ६ विश्वे देवाः, १२ अग्निः पवमानः ॥ १, ४-५, १२-१६ गायत्री; २, १० प्रगाथः (विषमा बृहती, समा सतोबृहती); ३, ७ ऊर्ध्वा बृहती; ६ अनुष्टुप्, ८-९ उष्णिक्; ११ बृहती ॥

१४८९ अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे । सूनुꣳ सत्यस्य सत्पतिम् ॥ १ ॥

१४९० आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि । यत्राभि संनवामहे ॥ २ ॥

१४९१ इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु । यत्सीमुपह्वरे विदत् ॥ ३ ॥ ॥१(हा)॥

[धा० ११ । उ० नास्ति । स्व० २]

१४९२ आ नो विश्वासु हव्यमिन्द्रꣳ समत्सु भूषत । उप ब्रह्माणि सवनानि वृत्रहन्परमज्या ऋचीषम ॥१॥

१४९३ त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत् ।
तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः ॥ २ ॥२(या)॥

[धा० १७ । उ० नास्ति । स्व० २]

१४९४ प्रत्नं पीयूषं पूर्व्यं यदुक्थ्यं महो गाहादिव आ निरधुक्षत । इन्द्रमभि जायमानꣳ समस्वरन् ॥ १ ॥

१४९५ आदीं के चित्पशयमानास आप्यं वसुरुचो दिव्या अभ्यनूषत । दिवो न वारꣳ सविता व्यूर्णुते ॥२॥

१४९६ अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना ।
यूथे न निष्ठा वृषभो वि राजसि ॥ ३ ॥ ३ (सू)॥

[धा० १६ । उ० २ । स्व० ६]

१४९७ इममू षु त्वमꣳक सनिं गायत्रं नव्यꣳसम् । अग्ने देवेषु प्र वोचः ॥ १ ॥

१४९८ विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ । सद्यो दाशुषे क्षरसि ॥ २ ॥

१४९९ आ नो भज परमेष्वा वाजेषु मध्यमेषु । शिक्षा वस्वो अन्तमस्य ॥ ३ ॥ ४(ता)॥

[धा० १३ । उ० १ । स्व० २]

१५०० अहमिद्धि पितुष्परि मेधामृतस्य जग्रह । अहꣳसूर्य इवाजनि ॥ १ ॥

१५०१ अहं प्रत्नेन जन्मना गिरः शुम्भामि कण्ववत् । येनेन्द्रः शुष्ममिद्दधे ॥ २ ॥

१५०२ ये त्वामिन्द्र न तुष्टुवुर्ऋषयो ये च तुष्टुवुः । ममेदुग्रस्य सुष्टुतः ॥ ३ ॥ ॥ ५(थु)॥

॥ इति प्रथमः खण्डः ॥ १ ॥ [धा० १४ । उ० २ । स्व० ५]

१५०३ अग्ने विश्वेभिरग्निभिर्जोषि ब्रह्म सहस्कृत । ये देवत्रा य आयुषु तेभिर्नो महया गिरः ॥१॥

१५०४ प्र स विश्वेभिरग्निभिरग्निः स यस्य वाजिनः । तनये तोके अस्मदा सम्यङ्वाजैः परीवृतः ॥ २ ॥

१५०५ त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय । त्वं नो देवतातये रायो दानाय चोदय ॥ ३ ॥ ॥६(डि)॥

[धा० १८ । उ० ३ । स्व० ३]

१५०६ त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः । स त्वं नो वीर वीर्याय चोदय ॥ १ ॥

१५०७ अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितम् । शयाभिर्न भरमाणो गभस्त्योः ॥२॥

१५०८ अजीजनो अमृत मर्त्याय अमृतस्य धर्मन्नमृतस्य चारुणः ।
सदासरो वाजमच्छा सनिष्यदत् ॥ ३ ॥ ॥७(ले)॥

[धा० १० । उ० नास्ति । स्व० ७]

१५०९ एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु । प्र राधाꣳसि चोदयते महित्वना ॥ १ ॥

१५१० उपो हरीणां पतिं राधः पृञ्चन्तमब्रवम् । नूनꣳश्रुधि स्तुवतो अङ्ग्यस्य ॥ २ ॥

१५११ न ह्यꣳग पुरा च न जज्ञे वीरतरस्त्वत् । न की राया नैवथा न भन्दना ॥ ३ ॥ ॥८(चा)॥

[धा० १७ । उ० १ । स्व० २]

१५१२ नदं व ओदतीनां नदं योयुवतीनाम् । पतिं वो अघ्न्यानां धेनूनामिषुध्यसि ॥ १ ॥ ॥ ९(व) ॥

॥ इति द्वितीयः खण्डः ॥ २ ॥ [धा० ५ । उ० नास्ति । स्व० १]

१५१३ देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम् । उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥१॥

१५१४ तꣳहोतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।
दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे ॥ २ ॥ ॥१०(लि)॥

[धा० १४ । उ० ना० । स्व० ३]

१५१५ अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः । उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः ॥१॥

१५१६ यस्मादेजन्त कृष्टयश्चर्कृत्यानि कृण्वतः । सहस्रसा मेधसाता इव त्मना गिर्न धीभिर्नमस्यत ॥२॥

१५१७ प्र देवोदासो अग्नि ॥ ३ ॥ ॥११(हा)॥

[धा० १६ । उ० नास्ति । स्व० २]

१५१८ अग्न आयूंषि पवस ॥ १ ॥

१५१९ अग्निऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥ २ ॥

१५२० अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् ॥ ३ ॥ ॥१२(क)॥

[धा० १० । उ० २ । स्व० १]

१५२१ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान्वक्षि यक्षि च ॥ १ ॥

१५२२ तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम् । देवाँ आ वीतये वह ॥ २ ॥

१५२३ वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमहि । अग्ने बृहन्तमध्वरे ॥ ३ ॥ ॥१३(द्वौ)॥

॥ इति तृतीयः खण्डः ॥३॥ [धा० १८ । उ० १ । स्व० नास्ति ।]

१५२४ अधा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि । विश्वासु धीषु वन्द्य ॥ १ ॥

१५२५ आ नो अग्ने रयिं भर सत्रासाहं वरेण्यम् । विश्वासु पृत्सु दुष्टरम् ॥ २ ॥

१५२६ आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसम् । मार्डीकं धेहि जीवसे ॥ ३ ॥ ॥१४(वौ)॥

[धा० १५ । उ० नास्ति । स्व० नास्ति]

१५२७ अग्निꣳ हिन्वन्तु नो धियः समिमाशुमिवाजिषु । तेन जेष्म धनंधनम् ॥ १ ॥

१५२८ यया गा आकरामहेऽनयाग्ने तवोत्या । नां नो हिन्व मघत्तये ॥ २ ॥

१५२९ आग्ने स्थूरꣳ रयिं भर पृथुं गोमन्तमश्विनम् । अक्षिꣳ वं वर्तया पविम् ॥ ३ ॥

१५३० अग्ने नक्षत्रमजरमा सूर्यꣳ रोहयो दिवि । दधज्ज्योतिर्जनेभ्यः ॥ ४ ॥

१५३१ अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उपस्थसत् । बोधा स्तोत्रे वयो दधत् ॥ ५ ॥ ॥१५(था)॥

[धा० १९ । उ० २ । स्व० २]

१५३२ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति ॥ १ ॥

१५३३ इदिषे वाधस्य हि दात्रस्याग्ने स्वः पतिः । स्तोता स्यां तव शर्मणि ॥ २ ॥

१५३४ उदग्ने शुचयस्तव शुका भ्राजन्त ईरते । तव ज्योतींष्यर्चयः ॥ ३ ॥ ॥१६(लौ)॥

॥ इति चतुर्थः खण्डः ॥ ४ ॥ [धा० ४ । उ० नास्ति । स्व० ४]

॥ इति सप्तमप्रपाठके प्रथमोऽर्धः ॥ ७-१॥

॥ इति चतुर्दशोऽध्यायः ॥ १४ ॥

अथ पञ्चदशोऽध्यायः ।

[१]

अथ सप्तमप्रपाठके द्वितीयोऽर्धः ॥७-२॥

(१–१४) १, ११ गोतमो राहूगणः; २, ५ विश्वामित्रो गाथिनः; ३ विरूप आङ्गिरसः; ४, ७ भर्गः प्रागाथः; ६ त्रित आप्त्यः; १० सोभरिः काण्वः; १२ गोपवन आत्रेयः; १३ भरद्वाजो बार्हस्पत्यो, वीतहव्य आङ्गिरसो वा; १४ प्रबोधो भार्गवः; पावकोऽग्निर्वाऽहस्पत्यो वा, गृहपति-यविष्ठौ सहसः पुत्रवान्यतरो वा ॥ अग्निः ॥ १–३, ६, ९, १४ गायत्री; ४, ७, ८ प्रगाथः= (विषमा बृहती, समा सतोबृहती); ५ त्रिष्टुप्; १० काकुभः प्रगाथः= (विषमा ककुप्, समा सतोबृहती); ११ उष्णिक्; १२ अनुष्टुब्गर्भः प्रगाथः (अनुष्टुप् + गायत्र्यौ); १३ जगती ॥

१५३५ कस्ने जामिर्जनानामग्ने को दाश्वध्वरः । को ह कस्मिन्नसि श्रितः ॥ १ ॥

१५३६ त्वं जामिर्जनानामग्ने मित्रो असि प्रियः । सखा सख्युर्य इड्यः ॥ २ ॥

१५३७ यजा नो मित्रावरुणा यजा देवाꣳ ऋतं बृहत् । अग्ने यक्षि स्वं दमम् ॥ ३ ॥ ॥१(क)॥

[धा० ८ । उ० नास्ति । स्व० ५]

१५३८ ईडेन्यो नमस्यस्तिरस्तमाꣳसि दर्शतः । समग्निरिध्यते वृषा ॥ १ ॥

१५३९ वृषो अग्निः समिध्यतेऽश्वो न देववाहनः । तꣳ हविष्मन्त ईडते ॥ २ ॥

१५४० वृषणं त्वा वयं वृषन्वृषणः समिधीमहि । अग्ने दीद्यतं बृहत् ॥ ३ ॥ ॥२(लि)॥

[धा० ९ । उ० नास्ति । स्व० २]

१५४१ उत्ते बृहन्तो अर्चयः समिधानस्य दीदिवः । अग्ने शुक्रास ईरते ॥ १ ॥

१५४२ उप त्वा जुह्वो३ मम घृताचीर्यन्तु हर्यत । अग्ने हव्या जुषस्व नः ॥ २ ॥

१५४३ मन्द्रꣳ होतारमृत्विजं चित्रभानुं विभावसुम् । अग्निमीडे स उ श्रवत् ॥ ३ ॥ ॥३(ह)॥

[धा० ६ । उ० नास्ति । स्व० १]

१५४४ पाहि नो अग्न एकया पाह्युत द्वितीयया । पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥ १ ॥

१५४५ पाहि विश्वस्माद्रक्षसो अराण्णः प्र स वाजेषु नोऽव ।
त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥ २ ॥ ॥४(यि)॥

॥ इति प्रथमः खण्डः ॥११॥ [धा० १७ । उ० नास्ति । स्व० ३]

१५४६ हनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमाꣳ अदर्शि ।
चिकिद्धि भाति भासा बृहतासिक्नीमेति रुशतामपाजन ॥ १ ॥

१५४७ कृष्णा यदेनीमभि वर्पसाभूज्जनयन्योषां बृहतः पितुर्जाम् ।
ऊर्ध्वं भानुꣳ सूर्यस्य स्तभायन् दिवो वसुभिररतिर्वि भाति ॥ २ ॥

१५४८ भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् ।
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभि राममस्थात् ॥ ३ ॥ ॥५(यो)॥
[धा० २७] उ० नास्ति । स्व० ९]

१५४९ कया ते अग्ने अङ्गिर ऊर्जो नपादुपस्तुतिम् । वराय देव मन्यवे ॥ १ ॥

१५५० दाशेम कस्य मनसा यज्ञस्य सहसो यहो । कदु वोच इदं नमः ॥ २ ॥

१५५१ अधा त्वरं हि नस्करो विश्वा असभ्यꣳ सुक्षितीः । वाजद्रविणसो गिरः ॥ ३ ॥ ॥६(ट)॥
[धा० १८ । उ० १ । स्व० १]

१५५२ अग्न आ याह्याग्निभिर्होतारं त्वा वृणीमहे । आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥१॥

१५५३ अच्छा हि त्वा सहसः सूनो अङ्गिरः सुचश्चरन्त्यध्वरे ।
ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम् ॥ २ ॥ ॥ ७ (या) ॥
[धा० १७ । उ० नास्ति । स्व० २]

१५५४ अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतम् । अच्छा यज्ञासो नमसा पुरूवसुं पुरुप्रशस्तमूतये ॥१॥

१५५५ अग्निꣳ सूनुꣳ सहसो जातवेदसं दानाय वार्याणाम् ।
द्विता यो भूदमृतो मर्त्येष्वा होता मन्द्रतमो विशि ॥ २ ॥ ॥८ (टा) ॥
॥ इति द्वितीयः खण्डः ॥२॥ [धा० ८ । उ० १ । स्व० १]

१५५६ अदाभ्यः पुरएता विशामग्निर्मानुषीणाम् । तूर्णी रथः सदा नवः ॥ १ ॥

१५५७ अभि प्रयाꣳसि वाहसा दाश्वाꣳ अश्नोति मर्त्यः । क्षयं पावकशोचिषः ॥ २ ॥

१५५८ साह्वान्विश्वा अभियुजः क्रतुर्देवानाममृक्तः । अग्निस्तुविश्रवस्तमः ॥ ३ ॥ ॥९ (वि)॥
[धा० १० । उ० नास्ति । स्व० ३]

१५५९ भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः । भद्रा ऊत प्रशस्तयः ॥ १ ॥

१५६० भद्रं मनः कृणुष्व वृत्रतूर्य येना समत्सु सासहिः ।
अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टये ॥ २ ॥ ॥१०(लि)॥
[धा० ४ । उ० नास्ति । स्व० ४]

१५६१ अग्ने वाजस्य गोमत ईशानः सहसो यहो । अस्मे देहि जातवेदो महि श्रवः ॥ १ ॥

१५६२ स इधानो वसुष्कविरग्निरीड्यो गिरा । रेवदस्मभ्यं पुर्वणीक दीदिहि ॥ २ ॥

१५६३ क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः । स तिग्मजम्भ रक्षसो दह प्रति ॥ ३ ॥ ॥११(टा)॥
॥ इति तृतीयः खण्डः ॥ ३ ॥ [धा० १३ । उ० १ । स्व०२]

१५६४ विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम्। अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ १ ॥

१५६५ यं जनासो हविष्मन्तो मित्रं न सर्पिरासुतिम्। प्रशस्तिभिः ॥ २ ॥

१५६६ पन्याꣳसं जातवेदसं यो देवतात्युद्यता। हव्यान्यैरयद्दिवि ॥ ३ ॥ ॥१२(ढा)

[धा० १३ । उ० १ । स्व० २]

१५६७ समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम्।
विप्रꣳ होतारं पुरुवारमद्रुहं कविꣳ सुम्नैरीमहे जातवेदसम् ॥ १ ॥

१५६८ त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम्।
देवासश्च मर्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे ॥ २ ॥

१५६९ विभूषन्नग्न उभयाꣳ अनु व्रता दूतो देवानाꣳ रजसी समीयसे।
यत्ते धीतिꣳ सुमतिमावृणीमहेऽध स्म नस्त्रिवरूथः शिवो भव ॥ ३ ॥ ॥१३(या)

[धा० २२ । उ० नास्ति । स्व० २]

१५७० उप त्वा जामयो गिरो देविशतीर्हविष्कृतः। वायोरनीके अस्थिरन् ॥ १ ॥

१५७१ यस्य त्रिधात्ववृतं बर्हिस्तस्थावसन्दिनम्। आपश्चिन्नि दधा पदम् ॥ २ ॥

१५७२ पदं देवस्य मीळुषोऽनाधृष्टाभिरूतिभिः। भद्रा सूर्य इवोपदृक् ॥ ३ ॥ ॥१४(डु)

॥ इति चतुर्थः खण्डः ॥ ४ ॥ [धा० १६ । उ० नास्ति । स्व० ५]

॥ इति सप्तमप्रपाठके द्वितीयोऽर्धः ॥ ७-२॥

॥ इति पञ्चदशोऽध्यायः समाप्तः ॥ १५ ॥

अथ षोडशोऽध्यायः।

[३]

अथ सप्तमप्रपाठके तृतीयोऽर्धः ॥ ७-३ ॥

(१-२१) १, ८, १८, मेध्यातिथिः काण्वः; २ विश्वामित्रो गाथिनः; ३-४ भर्गः प्रागाथः; ५ सोभरिः काण्वः; ६, १५ शुनःशेप आजीगर्तिः; ७ सुकक्ष आङ्गिरसः; ९ विश्वकर्मा भौवनः; १० अनानतः पारुच्छेपिः; ११ भरद्वाजो बार्हस्पत्यः; १२ गोतमो राहूगणः; १३ ऋजिश्वा भारद्वाजः; १४ वामदेवो गौतमः; १७ देवातिथिः काण्वः; १९ वालखिल्यः (श्रुष्टिगुः काण्वः); २० पर्वतनारदौ; २१ अत्रिर्भौमः ॥ १, ३-४, ७-८, १५, १७-१९ इन्द्रः; २ इन्द्राग्नी; ६ वरुणः; ९ विश्वकर्मा; १०, २०, २१ पवमानः सोमः; ११ पूषा; १२ मरुतः; १३ विश्वे देवाः; १४ द्यावापृथिवी, १६ अग्निः हवींषि वा ॥ १, ३-५, ८, १७-१९ प्रगाथः (विषमा बृहती, समा सतोबृहती); २, ६-७, ११-१६ गायत्री; ९ त्रिष्टुप्, १० अत्यष्टिः; २० उष्णिक्; २१ जगती ॥

१५७३ अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः। समीचीनास ऋभवः समस्वरन्रुद्रा गृणन्त पूर्व्यम् ॥१॥

१५७४ अस्येदिन्द्रो वावृधे वृष्ण्यꣳशवो मदे सुतस्य विष्णवि ।
अद्या तमस्य महिमानमायतोऽनु ष्टुवन्ति पूर्वथा ॥ २ ॥ ॥१(रि)॥

[धा० १८ । उ० नास्ति । स्व० ३]

१५७५ प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः । इन्द्राग्नी इष आ वृणे ॥ १ ॥
१५७६ इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् । साकमेकेन कर्मणा ॥ २ ॥
१५७७ इन्द्राग्नी अपसस्परि प्र यन्ति धीतयः । ऋतस्य पथ्या३ अनु ॥ ३ ॥
१५७८ इन्द्राग्नी तविषाणि वामꣳसधस्थानि प्रयाꣳसि च । युवोरप्तूर्यꣳहितम् ॥ ४ ॥ ॥२ (टा)॥

[धा० १३ । उ० १ । स्व० १]

१५७९ शन्धू३ षु शचीपत इन्द्र विश्वाभिरूतिभिः । भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥१॥
१५८० पौरो अश्वस्य पुरुकृद्गवामस्युत्सो देव हिरण्ययः ।
न किर्हि दानं परि मर्धिषत्वे यतयामि तदा भर ॥ २ ॥ ॥३ (चु)॥

[धा० १७ । उ० १ । स्व० ५]

१५८१ त्वꣳहि वस्वे विदा भगं वसुत्तये । उद्यावृषस्व मघवन्नाविष्टय उदिन्द्राश्वमिष्टये ॥ १ ॥
१५८२ त्वं पुरू सहस्राणि शतानि च यूथा दानाय मꣳहसे ।
आ पुरंदरं चकृम विप्रवचस इन्द्रं गायन्तोऽवसे ॥ २ ॥ ॥४ (फौ)॥

[धा० १५ । उ० २ । स्व० नास्ति]

१५८३ यो विश्वा दयते वसु होता मन्द्रो जनानाम् । मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्यग्नये ॥१॥
१५८४ अश्वं न गीर्भी रथ्यꣳसुदानवो मर्मृज्यन्ते देवयवः ।
उभे तोके तनये दस्म विश्पते पार्षि राधो मघोनाम् ॥ २ ॥ ॥ ५(पु) ॥

॥ इति प्रथमः खण्डः ॥ १ ॥ [धा० १५ । उ० २ । स्व० ५]

१५८५ इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युरा चके ॥ १ ॥ ॥६(ध)॥

[धा० ५ । उ० नास्ति । स्व० १]

१५८६ कया त्वं न ऊत्याभि प्र मन्दसे वृषन् । कया स्तोतृभ्य आ भर ॥ १ ॥ ॥ ७(य)॥

[धा० २ । उ० नास्ति । स्व० १]

१५८७ इद्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे । इन्द्रꣳसमीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ १ ॥
१५८८ इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत् ।
इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे स्वानास इन्दवः ॥ २ ॥ ॥ ८ (वा)॥

[धा० १५ । उ० नास्ति । स्व० २]

१५८९ विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व तन्वं३ स्वा हि ते ।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥ १ ॥ ९(ला) ॥
[धा० ९ । उ० नास्ति । स्व० २]

१५९० अया रुचा हरिण्या पुनानो विश्वा द्वेषा३सि तरति स्वयुग्वभिः सूरो न स्वयुग्वभिः ।
धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः । विश्वा यद्रूपा परियात्यृक्वभिः सप्तास्येभिर्ऋक्वभिः ॥१॥

१५९१ प्राचीमनु प्रदिशं याति केतुमत्त३ रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः ।
अग्मन्नुक्थानि पौ३स्येन्द्रं जैत्राय हर्षयन् । वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता ॥ २ ॥

१५९२ त्व३ ह त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे ।
परावतो न साम तद्धवा रणन्ति धीतयः । त्रिधातुमिररुषीभिर्वयो दधे रोचमानो वयो दधे ॥३॥ ॥१०(डे)॥
॥ इति द्वितीयः खण्डः ॥ २ ॥ [धा० ४१ । उ० ५ । स्व० ७]

१५९३ उत नो गोपणिं धियमश्वसां वाजसामुत । नृवत्कृणुह्यूतये ॥ १ ॥ ११(यौ)॥
[धा० २ । उ० नास्ति । स्व० नास्ति]

१५९४ शशमानस्य वा नरः स्वेदस्य सत्यशवसः । विदा कामस्य वेनतः ॥ १ ॥ १२(य) ॥
[धा० ५ । उ० नास्ति । स्व० १]

१५९५ उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये । सुमृडीका भवन्तु नः ॥ १ ॥ १३(रौ)॥
[धा० ३ । उ० नास्ति । स्व० नास्ति]

१५९६ प्र वां महि द्यवी अभ्युपस्तुतिं मरामहे । शुची उप प्रशस्तये ॥ १ ॥

१५९७ पुनाने तन्वा मिथः स्वेन दक्षेण राजथः । ऊह्याथे सनादृतम् ॥ २ ॥

१५९८ मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतम् । परि यज्ञं नेषथुः ॥ ३ ॥ १४(का)॥
[धा० ६ । उ० १ । स्व० २]

१५९९ अयमु ते समतसि कपोत इव गर्भधिम् । वचस्तच्चिन्न ओहसे ॥ १ ॥

१६०० स्तोत्र३ राधानां पते गिर्वाहो वीर यस्य ते । विभूतिरस्तु सूनृता ॥ २ ॥

१६०१ उर्ध्वस्तिष्ठा न ऊतये ऽस्मिन्वाजे शतक्रतो । समन्येषु ब्रवावहै ॥ ३ ॥ १५(ङ)॥
[धा० १६ । उ० नास्ति । स्व० १]

१६०२ गाय उप वदावटे महो यज्ञस्य रप्सुदा । उभा कर्णा हिरण्यया ॥ १ ॥

१६०३ अभ्यारमिन्द्रवो निषिक्तं पुष्करे मधु । अवटस्य विसर्जने ॥ २ ॥

१६०४ सिञ्चन्ति नमसावटमुद्वाचक्रं परिज्मानम्। नीचीनवारमक्षितम् ॥ ३ ॥ ॥१६(रा)॥

॥ इति तृतीयः खण्डः ॥ ३ ॥ [धा० ८ । उ० नास्ति । स्व० २]

१६०५ मा भेम मा श्रमिष्मोग्रस्य सख्ये तव। महस्ते वृष्णो अभिचक्ष्ये कृतं पश्येम तुर्वशं यदुम् ॥१॥

१६०६ सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति।
मघा संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥ २ ॥ ॥१७(घी)॥

[धा० १० । उ० नास्ति । स्व० ४]

१६०७ इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम। पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥१॥

१६०८ अयꣳ सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे।
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥ २ ॥ ॥१८(रि)॥

[धा० १८ । उ० नास्ति । स्व० ३]

१६०९ यस्यायं विश्व आर्यो दासः शेवधिपा अरिः। तिरश्चिद्यꣳ रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥१॥

१६१० तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः।
अस्मे रयिः पप्रथे वृष्ण्यꣳ शवोऽस्मे स्वानास इन्दवः ॥ २ ॥ ॥१९(न)॥

[धा० १४ । उ० १ । स्व० १]

१६११ गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव। शुचिं च वर्णमधि गोषु धारय ॥ १ ॥

१६१२ स नो हरीणां पत इन्दो देवप्सरस्तमः। सखेव सख्ये नर्यो रुचे भव ॥ २ ॥

१६१३ सनेमि त्वमस्मदा अदेवं कं चिदत्रिणम्। साह्वाꣳ इन्दो परि बाधो अप द्वयुम् ॥ ३ ॥ ॥ २०(ल)॥

[धा० ९ । उ० नास्ति । स्व० १]

१६१४ अञ्जते व्यञ्जते समञ्जते क्रतुꣳ रिहन्ति मध्वाभ्यञ्जते।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणꣳ हिरण्यपावाः पशुमप्सु गृभ्णते ॥ १ ॥

१६१५ विपश्चिते पवमानाय गायत मही न धारात्यन्धो अर्षति।
अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीडन्नसरद्वृषा हरिः ॥ २ ॥

१६१६ अध्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः।
हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥ ३ ॥ ॥ २१(ले)॥

॥ इति चतुर्थः खण्डः ॥ ४ ॥ [धा० ३९ । उ० नास्ति । स्व० ७]

॥ इति सप्तमप्रपाठकस्य तृतीयोऽर्धः, सप्तमः प्रपाठकश्च समाप्तः ॥ ७-३ ॥

॥ इति षोडशोऽध्यायः ॥ १६ ॥

अथ सप्तदशोऽध्यायः ।

[१]

अथाष्टमप्रपाठके प्रथमोऽर्धः ॥ ८-१ ॥

(१–१४) १, ७ शुनःशेप आजीगर्तिः; २ मधुच्छन्दा वैश्वामित्रः; ३ शंयुर्बार्हस्पत्यः; (तृणपाणिः) ४ वसिष्ठो मैत्रावरुणिः; ५ वामदेवो गौतमः; ६ रेभसूनू काश्यपौ; ८ नृमेध आंगिरसः; ९, ११ गोपूवस्यश्वसूक्तिनौ काण्वायनौ; १० भुतकक्षः सुकक्षो वा आङ्गिरसः; १२ विरूप आंगिरसः; १३ वत्सः काण्वः ॥ १, ३, ७, १२ अग्निः; २, ८—११, १३ इन्द्रः, ४ विष्णुः; ५ (१) वायु, ५ (२-३) इन्द्रवायू; ६ पवमानः सोमः ॥ १-२, ७, ९, १०, १२, १३ गायत्री; ३, ८ प्रगाथः = (विषमा बृहती, समा सतोबृहती); ४ त्रिष्टुप्, ५, ६ अनुष्टुप्; ११ उष्णिक् ।

१६१७ विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः । चनो धाः सहसो यहो ॥ १ ॥

१६१८ यश्चिद्धि शश्वता तना देवंदेवं यजामहे । त्वे इद्धूयते हविः ॥ २ ॥

१६१९ प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः । प्रियाः स्वग्नयो वयम् ॥ ३ ॥ ॥१(ही)॥

[धा० ११ । उ० नास्ति । स्व० ४]

१६२० इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥ १ ॥

१६२१ स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि । अस्मभ्यमप्रतिष्कुतः ॥ २ ॥

१६२२ वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा । ईशानो अप्रतिष्कुतः ॥ ३ ॥ ॥२(र)॥

[धा० ८ । उ० नास्ति । स्व० १]

१६२३ त्वं नश्चित्र ऊत्या वसो राधांसि चोदय । अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥१॥

१६२४ पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः ।
अग्ने हेडांसि दैव्या युयोधि नोऽदेवानि हरांसि च ॥ २ ॥ ॥३(की)॥

[धा० ११ । उ० १ । स्व० ४]

१६२५ किमित्ते विष्णो परिचक्ष्यं नाम प्र यद्वयक्षे शिपिविष्टो अस्मि ।
मा वर्पो अस्मदप गूह एतदन्यरूपः समिथे बभूथ ॥ १ ॥

१६२६ प्र तत्ते अद्य शिपिविष्ट नाम शंसामि वयुनानि विद्वान् ।
तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके ॥ २ ॥

१६२७ वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥ ॥ ४(ते) ॥

॥ इति प्रथमः खण्डः ॥१॥ [धा० ४४ । उ० १ । स्व० ७]

१६२८ पाथो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु। आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥ १ ॥

१६२९ इन्द्रश्च वायवेषां सोमानां पीतिमर्हथः। युवोरहि प्रणीतयो न लभ्यक् ॥ २ ॥

१६३० वायविन्द्रश्च शुचिपा सुतं सरथं शवसस्पती। नियुत्वन्ता न ऊतय आ यातꣳसोमपीतये॥३॥ ॥५(ता)॥

[ऋ० १९। उ० १। स्व० २]

१६३१ अध क्षपा परिष्कृतो वाजाꣳअभि प्र गाहसे। यदी विवस्वतो धियो हरिꣳहिन्वन्ति यातवे ॥ १ ॥

१६३२ तमस्य मर्जयामसि मदो य इन्द्रपातमः। यं गाव आसभिर्दधुः पुरा नूनं च सूरयः ॥ २ ॥

१६३३ तं गाथया पुराण्या पुनानमभ्यनूषत। उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः ॥३॥ ॥ ६(लु) ॥

[ऋ० १४। उ० नास्ति। स्व० ५]

१६३४ अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः। सम्राजन्तमध्वराणाम् ॥ १ ॥

१६३५ स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः। मीढ्वाꣳअस्माकं बभूयात् ॥ २ ॥

१६३६ स नो दूराच्चासाच्च नि मर्त्यादघायोः। पाहि सदमिद्विश्वायुः ॥ ३ ॥ ॥ ७(टि) ॥

[ऋ० १३। उ० १। स्व० ३]

१६३७ त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः। अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः ॥ १ ॥

१६३८ अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥ २ ॥ ८(ता) ॥

॥ इति द्वितीयः खण्डः ॥ २ ॥ [ऋ० १८। उ० १। स्व० २]

१६३९ यज्ञ इन्द्रमवर्धयद्वृष्टिमिं व्यवर्तयत्। चक्राण ओपशं दिवि ॥ १ ॥

१६४० व्यꣳअन्तरिक्षमतिरन्मदे सोमस्य रोचना। इन्द्रो यदभिनद्बलम् ॥ २ ॥

१६४१ उद्ना आजदङ्गिरोभ्य आविष्कृण्वन्गुहा सतीः। अर्वाञ्चं नुनुदे बलम् ॥ ३ ॥ ॥ ९(पी) ॥

[ऋ० २०। उ० १। स्व० ४]

१६४२ त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम्। आ च्यावयस्यूतये ॥ १ ॥

१६४३ युध्मꣳसन्तमनर्वाणꣳसोमपामनपच्युतम्। नरमवार्यक्रतुम् ॥ २ ॥

१६४४ शिक्षा ण इन्द्र राय आ पुरु विद्वाꣳऋचीषम। अवा नः पार्ये धने ॥ ३ ॥ ॥१०(ता)॥

[ऋ० १४। उ० १। स्व० २]

१६४५ तव त्यदिन्द्रियं बृहत्तव दक्षमुत क्रतुम्। वज्रꣳशिशाति धिषणा वरेण्यम् ॥ १ ॥

१६४६ तव द्यौरिन्द्र पौꣳस्यं पृथिवी वर्धति श्रवः। त्वामापः पर्वतासश्च हिन्विरे ॥ २ ॥

१६४७ त्वां विष्णुर्बृहन्क्षयो मित्रो गृणाति वरुणः । त्वꣳ शर्द्धो मरुत्वतु मासतम् ॥ ३ ॥ ॥११(ऊं)॥

॥ इति तृतीयः खण्डः ॥३॥ [धा० १३ । उ० २ । स्व० ४ ।]

१६४८ नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः । अमैरमित्रमर्दय ॥ १ ॥

१६४९ कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिम् । उरुकृदुरु णस्कधि ॥ २ ॥

१६५० मा नो अग्ने महाधने परा वर्ग्भारभृद्यथा । संवर्गꣳ सꣳ रयिं जय ॥ ३ ॥ ॥१२(प)॥

[धा० १५ । उ० १ । स्व० १]

१६५१ समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः । समुद्रायेव सिन्धवः ॥ १ ॥

१६५२ वि चिद्वृत्रस्य दोधतः शिरो बिभेद वृष्णिना । वज्रेण शतपर्वणा ॥ २ ॥

१६५३ ओजस्तदस्य तित्विष उभे यत्समवर्तयत् । इन्द्रश्चर्मेव रोदसी ॥ ३ ॥ ॥१३(नौ)॥

[धा० १४ । उ० १ । स्व० नास्ति]

१६५४ सुमन्मा वस्वी रन्ती सूनरी ॥ १ ॥

१६५५ सरूप वृषभा गहीमो भद्रौ धुर्यावभि । ताविमा उप सर्पतः ॥ २ ॥

१६५६ नीच शीर्षाणि मृद्वं मध्य आपस्य तिष्ठति । शूकैरभिदशाभिदिशान् ॥ ३ ॥ ॥१४(वि)॥

॥ इति चतुर्थः खण्डः ॥ ४ ॥ [धा० ७ । उ० नास्ति । स्व० १]

इत्यष्टम-प्रपाठकस्य प्रथमोऽर्धः ॥ ८-१ ॥ ॥ इति सप्तदशोऽध्यायः ॥ १७ ॥

अथाष्टादशोऽध्यायः ।

[२]

अथाष्टमप्रपाठके द्वितीयोऽर्धः ॥ ८-२ ॥

